माता के श्राद्ध का प्रतिज्ञा संकल्प

मातुः की जगह, दादी को "पितामह्याः", परदादी को "प्रपितामह्या", कहें ।

ॐ अद्य विक्रम-सम्वत्सरे (अमुक) सङ्ख्यके (अमुक) गोत्रायाः मातुः (अमुकी) देव्याः साङ्कल्पिकश्राद्धं तदङ्गत्वेन बलिवैश्वदेवाख्यं पञ्चवलि कर्म च करिष्ये। बलिवैश्वदेव तथा पञ्चबलि भी (पिछले पृष्ठ से देखकर) करें।

आसन (पत्ता आदि दक्षिण में रखें।)

"अपसव्य" तथा "दक्षिणाभिमुख़" हो बायाँ घुटना मोड़ पितृलोक से आती हुई माता का ध्यान कर नीचे लिखा संकल्पकर आसन पर छोड़ें ।

मातुः की जगह दादी को **"पितामह्याः"**, परदादी को **"प्रपितामह्याः"**, कहे । **ॐ अद्य (अमुक) गोत्रायाः मातुः (अमुकी) देव्याः साङ्कल्पिकश्राद्धे इदमासनं ते स्वधा ।**

गन्धादि

आसन पर गन्ध, पुष्प, ताम्बूल, सिन्दूर और वस्त्रादि रखें । माता की जगह, दादी को **"पितामही"**, परदादी को **"प्रपितामही"** कहें । अद्य (अमुक) गोत्रे मातुः (अमुकी) देवी एतानि गन्ध-पुष्प-ताम्बूल-पूगीफल-सिन्दूर-वासांसि ते स्वधा ।

पाक लेकर नीचे लिखे मन्त्रों से बाईं ओर भूस्वामी के निमित्त पृथ्वी पर रखें—

ॐ इदमन्नमेतद् भूस्वामि-पितृभ्यो नमः ।

पात्र में पाकादि परोस पाक के ऊपर मधु लगा मातृ-आसन के सन्मुख रखें । उस पात्र के पूर्व में जलपात्रादि तथा पत्ते पर घृत रखें पश्चात् मातृ आसन तथा अन्न-पात्रादि के चारों ओर जल से मण्डल बनायें । फिर पात्र का स्पर्श करते हुए बायाँ हाथ अपनी दाहिनी ओर उलटा, उस पर दाहिना हाथ बाईं ओर उलटा रखकर नीचे लिखा मन्त्र बोलें—

ॐ पृथ्वी ते पात्रंद्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा ।। ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समुढमस्य पाꣳ सुरे ।। ॐ कृष्णकव्यमिदं रक्ष मदीयम् ।

बायें हाथ को वैसे ही रखते हुए दाहिने हाथ के अंगूठे से अन्नादिका स्पर्श करें— **"इदमन्नम्"** (पाकस्पर्श), **"इमा आपः"** (जलस्पर्श), **"इदमाज्यम्"** (घृत-स्पर्श), **"इदं हविः"** (फिर पाकस्पर्श करें) । पाक की रक्षा के लिए नीचे लिखे वाक्य से पात्र के बाहर तिल छोड़ें—

ॐ अपहता असुरा रक्षाᳬं सि वेदिषदः ।

पाक का संकल्प

“मात्रे” की जगह, दादी को “पितामह्यै”, परदादी को “प्रपितामह्यै” कहें । ॐ अद्य (अमुक) गोत्रायै मात्रे (अमुकी देव्यै) इदमन्नं परिविष्टं परिविष्यमाणं ब्राह्मणभोजनतृप्तिपर्यन्तं सोपस्करं ते स्वधा ॥

सव्य तथा पूर्वाभिमुख होकर आशीर्वाद के लिए प्रार्थना करें ।

ॐ गोत्रं नो वर्द्धतां दातारो नोऽभिवर्द्धन्ताम् । वेदाः सन्ततिरेव च । श्रद्धा च नो मा व्यगमद्बहुदेयं च नोऽस्तु ॥ अन्नं च नो बहु भवेदतिथींश्च लभेमहि । याचितारश्च नः सन्तु मा च याचिष्म कञ्चन ॥ एताः सत्याः आशिषः सन्तुः ॥

अपसव्य तथा दक्षिणाभिमुख होकर नीचे लिखे संकल्प से वस्त्र पर दक्षिणा रखें—

कृतैतत् श्राद्धप्रतिष्ठार्थं दक्षिणाद्रव्यं यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृजे ॥

सव्य तथा पूर्वाभिमुख होकर नीचे लिखी प्रार्थना करें—

अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत् ।
तत्सर्वमच्छिद्रमस्तु पित्रादीनां प्रसादतः ॥
प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥

काक और श्वान बलिको छोड़कर बाकी सभी बलि गौको दें । पश्चात् ब्राह्मणों के पैर धोकर आसन पर बैठा, पाक परोसकर भोजन करने की प्रार्थना करें । श्राद्धकर्ता पाक का गुण वर्णन करते हुए नम्रतापूर्वक बार-बार परोसें । ब्राह्मण पाक की प्रशंसा न करें । भोजन के पश्चात् तिलक करके दक्षिणा देकर उनसे पूछें ‘शेषान्नं किं कर्त्तव्यम्’ ब्राह्मण कहें ‘इष्टैः सह भोक्तव्यम्’, पश्चात् पितृतृप्ति के लिए तर्पण, (पीछे छपे पृष्ठ से देख करके) काकबलि कौवे को और श्वानबलि कुत्ते को देकर इष्ट मित्रों सहित भोजन करें ।

इति श्राद्धकर्म सम्पूर्णम् ॥

आपोशान

नीचे लिखे प्रत्येक मन्त्र से एक-एक ग्रास देकर जल छोड़ें—

ॐ भूपतये स्वाहा १ । ॐ भुवनपतये स्वाहा २ । ॐ भूतानाम्पतये स्वाहा ३ । "ॐ अमृतोपस्तेरणमसि स्वाहा ॥"

नीचे लिखे प्रत्येक मन्त्र से ग्रास लेकर आचमन करके भोजन करें—

ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा २ । ॐ व्यानाय स्वाहा ३ । ॐ उदानाय स्वाहा ४ । ॐ समानाय स्वाहा ॥५ ॥ भोजन के अन्त में "ॐ अमृतपिधानमसि स्वाहा' बोलकर आचमन करके उच्छिष्ट अन्न को नीचे लिखे मन्त्र से दक्षिण में फेंक दें—

मद्भुक्तोच्छिष्टशेषं ये भुञ्जते पितरोऽधमाः ।
तेषामन्नं मया दत्तमक्षय्यमुपतिष्ठतु ॥

मुखशुद्धि के लिए सोलह कुल्ले करके नीचे लिखे मन्त्र बोलें ।

अगस्त्यं कुम्भकर्णञ्च शनिञ्च वडवानलम् ।
आहारपरिपाकाय संस्मरामि वृकोदरम् ॥
आतापी भक्षितो येन वातापी च महाबलः ।
समुद्रः शोषितो येन स मेगस्त्यः प्रसीदतु ॥

सूर्यास्त के बाद सूर्योदय तक घर में दीपक जलते रहने से दरिद्रता नहीं रहती है, अतः दीपक जलाकर प्रार्थना करें—

दीपोज्योतिः परं ब्रह्म दीपो ज्योतिर्जनार्दनः ।
दीपो हरतु मे पापं सन्ध्यादीप नमोऽस्तुते ॥

शयन-विधि

ब्राह्म मुहूर्त्त में उठकर हमने ऋषियों द्वारा निर्देशित मार्ग—

सन्ध्या स्नानं जपश्चैव देवतानाञ्च पूजनम् ।
वैश्वदेवं तथातिथ्यं षट् कर्माणि दिनेदिने ॥

का अनुसरण करके स्नान, सन्ध्या, जप, होम, देवपूजन, वैश्वदेव, अतिथि सत्कार आदि नित्य कर्म करते हुए दैनिक जीवन यात्रा के रात्रिकालीन पड़ाव तक आ गये ।

अब शान्त चित्त बैठकर दिन में किये कर्मों का स्मरण करना चाहिये । यदि कहीं त्रुटि समझ पड़े तो प्रभु स्मरण करके क्षमा प्रार्थना करें तथा भविष्य में त्रुटि के प्रति सावधान रहें ।

शयन के समय शिर पूर्व अथवा दक्षिण की तरफ रखें ।

परमपूज्य स्व. श्री डोंगरे जी महाराज ने बताया है कि यदि भगवान का नाम स्मरण करते-करते नींद आ जाये तो जागने तक नाम स्मरण का फल प्राप्त होता है । अतः सोते समय प्रभुस्मरण अवश्य करना चाहिये ।

देवपूजा-विधि

पूजन सामग्री को शुद्ध करके यथास्थान रखकर विधिपूर्वक पूजा करे ।

नाङ्गुष्ठैर्मर्दयेद्देवं नाधः पुष्पैः समर्चयेत् ।
कुशाग्रैर्न क्षिपेत्तोयं वज्रपातसमं भवेत् ॥ —आचारमयूख

देवताओं को अँगूठे से न मलें और पुष्प अधोमुख करके न चढ़ायें तथा कुशा के अग्रभाग से देवताओं पर जल न छिड़कें । ऐसा करना वज्रपात तुल्य है ।

त्रिर्देवेभ्यः प्रक्षालयेत् सकृत् पितृभ्यः ॥ —आपस्तम्ब

देवताओं को तीन बार और पितर को एक बार धोकर अक्षत चढ़ायें ।

नाक्षतैरर्चयेद्विष्णुं न तुलस्या गणाधिपम् ।
न दूर्वया यजेत् दुर्गां विल्वपत्रैश्च भास्करम् ॥
दिवाकरं वृन्तहीनैर्विल्वपत्रः समर्चयेत् ॥

विष्णु को चावल, गणेश को तुलसी, दुर्गा को दूब और सूर्यनारायण को विल्वपत्र न चढ़ायें । किन्तु डंडी तोड़कर विल्वपत्र सूर्यनारायण को चढ़ा सकते हैं ।

अधोवस्त्रधृतं चैव जलेऽन्तःक्षालितं च यत् ।
देवतास्तन्न गृह्णन्ति पुष्पं निर्माल्यतां गतम् ॥ —आह्निक

धोती में रखा हुआ और जल में डुबोया हुआ पुष्प निर्माल्य हो जाता है । इसलिये देवता उसे ग्रहण नहीं करते हैं ।

शिवे विवर्जयेत् कन्दमुन्मत्तं च तथा हरौ ।
देवीनामर्कमन्दारौ सूर्यस्य तगरं तथा ॥

शिवजी को कुन्द, विष्णु को धतूरा, देवी को आक तथा मदार और सूर्य को तगर का पुष्प न चढ़ायें ।

तुलसी-मञ्जरीभिर्यः कुर्यात् हरिहरार्चनम् ।
न स गर्भगृहं याति मुक्तिभागी न संशयः ॥

तुलसी की मञ्जरी से जो विष्णु भगवान् तथा शिव की पूजा करता है। उनको गर्भ में वास नहीं करना पड़ता, वह अवश्य मुक्ति पाता है।

पत्रं वा यदि वा पुष्पं फलं नेष्टमधोमुखम् ।
यथोत्पन्नं तथा देयं विल्वपत्रमधोमुखम् ॥ —आह्निक

पत्र, पुष्प तथा फल का मुख नीचे करके न चढ़ायें। वे जैसे उत्पन्न होते हैं, उनको वैसे ही चढ़ाना चाहिये। किन्तु विल्वपत्र उलटा करके चढ़ायें।

पर्णमूले भवेद् व्याधिः पर्णाग्रे पापसम्भवः ।
जीर्णपत्रं हरत्यायुः शिरा बुद्धिविनाशिनी ॥ —आचारार्क

पान की डंडी से व्याधि और अग्रभाग से पाप होता है। सड़ा पान आयु और शिरा बुद्धि को नष्ट करती है। इसलिये डंडी, अग्रभाग और शिरा निकाल दें।

वृक्ष से तुलसी ग्रहण मन्त्र

तुलस्यमृतजन्मासि सदा त्वं केशवप्रिया ।
केशवार्थे चिनोमि त्वां वरदा भव शोभने! ॥

संक्रान्ति, द्वादशी, अमावस्या, पूर्णिमा, रविवार और सन्ध्या के समय तुलसी तोड़ना निषिद्ध है। यदि विशेष आवश्यक हो तो नीचे लिखे मन्त्र से तोड़ सकते हैं।

त्वदङ्गसम्भवेन त्वां पूजयामि यथा हरिम् ।
तथा नाशय विघ्नं मे ततो यान्ति पराङ्गतिम् ॥

पूर्वाभिमुख बैठकर बायीं ओर घण्टा, धूप तथा दाहिनी ओर शंख, जल-पात्र तथा पूजन की सामग्री रख, आचमन, प्राणायाम करके संकल्प वाक्य के अन्त में, **"शालग्रामपूजनं तदङ्गत्वेन गणपत्यादिदेवानां मण्डले स्थापनं पूजनञ्च करिष्ये"** कहकर जलादि छोड़ें।

दीपक-पूजन

घीका दीपक अपनी बाईं तथा तेलका दाहिनी ओर पूर्व या उत्तरमुख करके चावल आदि पर रख प्रज्वलितकर हाथ धो नीचे लिखी प्रार्थना करें ।

भो दीप ! देवरूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत् ।
यावत्कर्मसमाप्तिः स्यात् तावत् त्वं सुस्थिरो भव ॥

घंटा-पूजन

आवाहन के लिये घंटा बजा पश्चात् घंटे का पूजन करें ।

आगमार्थन्तु देवानां गमनार्थन्तु रक्षसाम् ।
घण्टा-नादं प्रकुर्वीत पश्चात् घण्टां प्रपूजयेत् ॥

शंख-पूजन

शंख में जल भरकर शंख-मुद्रा दिखा पूजाकर नीचे लिखी प्रार्थना करें ।

त्वं पूरा सागरोत्पन्नो विष्णुना विधृतः करे ।
निर्मितः सर्वदेवैश्च पाञ्चजन्य ! नमोस्तु ते ॥

स्वस्तिवाचन

श्रीमन्महागणाधिपतये नमः १ । लक्ष्मीनारायणाभ्यां नमः २ । उमामहेश्वराभ्यां नमः ३ । वाणीहिरण्यगर्भाभ्यां नमः ४ । शचीपुरन्दराभ्यां नमः ५ । मातापितृचरणकमलेभ्यो नमः ६ । इष्टदेवताभ्यो नमः ७ । कुलदेवताभ्यो नमः ८ । ग्रामदेवताभ्यो नमः ९ । वास्तुदेवताभ्यो नमः १० । स्थानदेवताभ्यो नमः ११ । एतत्कर्मप्रधानदेवताभ्यो नमः १२ । सर्वेभ्यो देवेभ्यो नमः १३ । सर्वेभ्यो ब्राह्मणेभ्यो नमः १४ । अविघ्नमस्तु १५ । ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु १६ । ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः । पयस्वतीः प्रदिशः सन्तु मह्यम् १७ । ॐ विष्णो रराटमसि विष्णोःश्नप्त्रेस्थो विष्णोःस्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा १८ । ॐ अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता

वसवो देवता रुद्रा देवताऽऽदित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता १९। ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि २०। ॐ पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो विदथेषु जग्मयः। अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसागमन्निह २१। ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाꣳ सस्तनूभिर्व्यशेमहि देवहितं यदायुः २२। ॐ शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसंतनूनाम्। पुत्रासो यत्र पितरो भवन्ति मानो मध्या रीरिषतायुर्गन्तोः २३। ॐ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः। विश्वेदेवा अदितिः पञ्च जना अजितिर्जातमदितिर्जनित्वम् २४। ॐ यतो यतः समीहसे ततो नो अभयं कुरु। शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः २५। ॐ विश्वानि देव सवितर्दुरितानि परासुव। यद् भद्रं तन्न आसुव २६। ॐ एतं तेदेव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे। तेन यज्ञमव तेन यज्ञपतिं तेन मामव २७। ॐ मनो जूतिर्जुषतामाज्यस्यबृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधातु। विश्वे देवास इह मादयन्तामो ३ म् प्रतिष्ठ २८। एष वै प्रतिष्ठा नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितम्भवति २९। ॐगणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे निधीनां त्वा निधिपतिꣳ हवामहे वसो मम। आहमजानि गर्भधमा त्वमजासि गर्भधम् ३०। ॐ नमोगणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ३१। सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो विनायकः। धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि। विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। संग्रामे संकटे चैव विघ्नस्तस्य न जायते ३२।

पुण्याहवाचन

तत्रादौ युग्मब्राह्मणानां हस्तेषु।

(यजमानः) "शिवा आपः सन्तु"। (ब्राह्मणाः) "सन्तु शिवा आपः।" इति जलम्॥ (यजमानः) "सुगन्धाः पान्तु।" (ब्राह्मणाः) "सौमङ्गल्यं चास्तु।" इति

गंधम् ॥ (यजमानः) "सौमनस्यमस्तु ।" (ब्राह्मणाः) "अस्तु सौमनस्यम् ।" इति पुष्पम् ।(यज.) "अक्षतं चारिष्टं चास्तु ।"(ब्रा.) "अस्त्वक्षतमरिष्टं च ।" इत्यक्षतान् । (यज.) "सफलताम्बूलानि पान्तु ।" (ब्रा.) "ऐश्वर्यमस्तु ।" इति सफलताम्बूलम् । (यज.) "दक्षिणाः पान्तु ।"(ब्रा.) "बहुदेयं चास्तु" इति दक्षिणा ।(यज.) "ॐ स्वर्चितमस्तु ।" (ब्रा.) "अस्त्वर्चितं मङ्ग च ।" इति जलम् । दीर्घायुः शान्तिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो बहुपुत्रं बहुधनं चास्तु । यं कृत्वा सर्ववेदयज्ञक्रियाप्रारम्भाः शुभाः शोभनाः प्रवर्तन्ते तमहमोंकारमादिं कृत्वा ऋग्यजुः सामाथर्वणाशीर्वचनं बह्वृषिसमनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये । वाच्यतामिति ब्राह्मणवचनम् ।(पुनः यजमानो ब्रूयात्) " व्रत-जप नियमतपस्वाध्यायस्क्रतुदमदानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम्" । (ब्राह्मणाः) "समाहितमनसः स्मः" (यजमानो ब्रूयात्) "प्रसीदन्तु भवन्तः" । (ब्राह्मणाः) प्रसन्नाः स्म" । ततो यजमानः अवनीकृतजानुमण्डलः कमलमुकुलसदृशमञ्जलिं शिरस्याधाय दक्षिणेन पाणिना जलपूर्णं (सुवर्णयुक्त) कलशं धारयित्वा भूमौ स्थापिते पात्रद्वये प्रथमपात्रे किंचिदुदकं पातयेत् ।

(ततः ब्राह्मणाः वदेयुः) ॐ शान्तिरस्तु । पुष्टिरस्तु । वृद्धिरस्तु । ऋद्धिरस्तु । अविघ्नमस्तु । आयुष्यमस्तु । आरोग्यमस्तु । शिवमस्तु । शिवं कर्मास्तु । कर्मसमृद्धिरस्तु । पुत्रसमृद्धिरस्तु । वेदसमृद्धिरस्तु । शास्त्रसमृद्धिरस्तु । धनधान्यसमृद्धिरस्तु । इष्टसम्पदस्तु ॥ अरिष्टनिरसनमस्तु । यच्छ्रेयस्तदस्तु । ततो द्वितीय पात्रे पातयेत् । यत्पापमकल्याणं तद्दूरे प्रतिहतमस्तु । पुनः प्रथमपात्रे पातयेत् । उत्तरोत्तरे कर्मण्यविघ्नमस्तु । उत्तरोत्तरमहरहरभिवृद्धिरस्तु । उत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यन्ताम् । तिथिकरणमुहुर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयन्ताम् । तिथिकरणे सुमुहूर्ते सुनक्षत्रे सुग्रहे सुदैवते प्रीयेताम् । अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम् । इन्द्रपुरोगा मरुद्गणाः प्रीयन्ताम् । माहेश्वरीपुरोगा मातरः प्रीयन्ताम् । वसिष्ठपुरोगा ऋषिगणाः प्रीयन्ताम् । अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्ताम् । ब्रह्मपुरोगाः सर्ववेदाः प्रीयन्ताम् । विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम् । ऋषयश्छन्दांस्याचार्या वेदा देवा यज्ञाश्च प्रीयन्ताम् । ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम् । अम्बिकासरस्वत्यौ प्रीयेताम् । श्रद्धामेधे प्रीयेताम् । दुर्गापाञ्चाल्यौ प्रीयेताम् । भगवती

कात्यायिनी प्रीयताम्। भगवती माहेश्वरी प्रीयताम्। भगवती ऋद्धिकरी प्रीयताम्। भगवती वृद्धिकरी प्रीयताम्। भगवती पुष्टिकरी प्रीयताम्। भगवती तुष्टिकरी प्रीयताम्। भगवन्तौ विघ्नविनायकौ प्रीयेताम्। सर्वाः कुलदेवताः प्रीयन्ताम्। पुनः द्वितीयपात्रे पातयेत्। हताश्च ब्रह्मद्विषः। हताश्च परिपन्थिनः। हताश्च विघ्नकर्तारः। शत्रवः पराभवं यान्तु। शाम्यन्तु घोराणि। शाम्यन्तु पापानि। शाम्यन्त्वीतयः। पुनः प्रथमपात्रे पातयेत्। शुभानि वर्द्धन्ताम्। शिवा आपः सन्तु। शिवा ऋतवः सन्तु। शिवा अग्नयः सन्तु। शिवा आहुतयः सन्तु। शिवा वनस्पतयः सन्तु। शिवा अतिथयः सन्तु। अहोरात्रे शिवे स्याताम्। निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्ताम्। योगक्षेमो नः कल्पताम्। शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमादित्यरूपाः सर्वे ग्रहाः प्रीयन्ताम्। भगवान्नारायणः प्रीयताम्। भगवान् पर्जन्यः प्रीयताम्। भगवान् स्वामी महासेनः प्रीयताम्। पुरोनुवाक्यया यत्पुण्यं तदस्तु। याज्यया यत्पुण्यं तदस्तु। वषट्कारेण यत्पुण्यं तदस्तु। प्रातः सूर्योदये यत्पुण्यं तदस्तु।

ततो यजमानः सुवर्णकलशं भूमौ निधाय प्रथमपात्रपातितजलेन शिरः संमृज्य सपरिवारगृहांश्चाभिषेचयेत्। द्वितीयपात्रजलमेकान्ते पातयेत्।

(यजमानो ब्रूयात्) ब्राह्मं पुण्यमहर्यच्च सृष्ट्युत्पादनकारकम्। वेदवृक्षोद्भवं पुण्यं तत्पुण्याहं ब्रुवन्तु नः॥ भो ब्राह्मणाः! मम सपरिवारस्य गृहे पुण्याहं भवन्तो ब्रुवन्तु। (ब्राह्मणाः) ॐ पुण्याहम् ३। ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः। पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा॥ (यजमानः) पृथिव्यामुद्धृतायान्तु यत् कल्याणं पुराकृतम्। ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुयन्तु नः॥ भो ब्राह्मणाः। मम सपरिवारस्य गृहे कल्याणं भवन्तो ब्रुवन्तु॥ (ब्राह्मणाः) ॐ कल्याणम् ३। ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्या ँ शूद्राय चार्य्याय च स्वाय चारणाय। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृद्ध्यतामुपपादो नमतु॥ (यजमानः) सागरस्य च या लक्ष्मीर्महालक्ष्म्यादिभिः कृता। संपूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवन्तु नः॥ भो ब्रह्मणाः! मम सपरिवारस्य गृहे ऋद्धिं भवन्तो ब्रुवन्तु॥ (ब्राह्मणाः) ॐ ऋद्ध्यताम् ३। ॐ

सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम। दिवं पृथिव्या अध्याऽरुहामाविदाम देवान्त्स्वर्ज्योतिः ॥ (यजमानः) स्वस्त्यस्तु ह्यविवाशाख्या नित्यं मङ्गलदायिनी। विनायकप्रिया नित्यं तां च स्वस्ति ब्रुवन्तु नः ॥ भो ब्राह्मणाः ! मम सपरिवारस्य गृहे स्वस्ति भवन्तो ब्रुवन्तु ॥ (ब्राह्मणाः) ॐ स्वस्ति ३ ॥ ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ (यजमानः) समुद्रमथनाज्जाता जगदानन्दकारिका। हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः ॥ भो ब्राह्मणाः ! मम सपरिवारस्य गृहे श्रीरस्त्विति भवन्तो ब्रुवन्तु। (ब्राह्मणाः) ॐ अस्तु श्रीः ३ ॥ ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुं म ईषाण सर्वलोकं म ईषाण। (ततस्तिलकाशीर्वादः) अथ दक्षिणादानम्॥ ॐ अद्य पुण्याह-वाचनसाङ्गतासिद्ध्यर्थं पुण्याहवाचकेभ्यो नानानामगोत्रेभ्यो ब्राह्मणेभ्य इमां यथाशक्ति हिरण्यमूल्यद्रव्यदक्षिणां संप्रददे ॥ इति पुण्याहवाचनम्॥

अङ्गन्यास

पूरे मन्त्र शालग्राम पूजन में लिखे हैं।

ॐ सहस्रशीर्षा॰-वामकरे। ॐ पुरुष एवेद ँ सर्वं॰-दक्षिणकरे। ॐ एतावानस्य महिमा॰- वामपादे। ॐ त्रिपादूर्ध्व॰- दक्षिणपादे। ॐ ततो विराड॰-वामजानुनि। ॐ तस्माद्यज्ञात्सर्वहुत॰-दक्षिणजानुनि। ॐ तस्माद्यज्ञात्सर्वहुत ऋचः॰-वामकट्याम्। ॐ तस्मादश्वा॰-दक्षिणकट्याम्। ॐ तं यज्ञम्॰-नाभौ। ॐ यत्पुरुषं व्यदधुः॰-हृदि। ॐ ब्राह्मणोऽस्य॰— कण्ठे। ॐ चन्द्रमा मनसो॰— वामबाहौ। ॐ नाभ्या आसी॰— दक्षिणबाहौ। ॐ यत्पुरुषेण॰— मुखे। ॐ सप्तास्या॰— अक्ष्णोः। ॐ यज्ञेन यज्ञ॰— मूर्ध्नि।

पञ्चाङ्गन्यास

ॐ अद्भ्यः सम्भृतः॰ — हृदये। ॐ वेदाहमेतम्॰ — शिरसि। ॐ प्रजापतिश्च॰— शिखायाम्। ॐ यो देवेभ्य आतपति॰— कवचाय हुम्। ॐ रुचं ब्राह्मम्॰— अस्त्राय फट्।

करन्यास

ॐ ब्राह्मणोऽस्य ०— अङ्गुष्ठाभ्यां नमः । ॐ चन्द्रमा ०— तर्जनीभ्यां नमः । ॐ नाभ्या ०— मध्यमाभ्यां नमः । ॐ यत्पुरुषेण ०— अनामिकाभ्यां नमः । ॐ सप्तास्यासन् ०— कनिष्ठिकाभ्यां नमः । ॐ यज्ञेन ०—करतलकरपृष्ठाभ्यां नमः ।

गणपति तथा अम्बिका-पूजन

सुपारीपर मौली लपेट चावलोंपर स्थापित कर नीचे लिखा ध्यान करके आवाहनमंत्रसे अक्षत छोड़ें । मूर्ति हो तो पुष्प छोड़ें ।

ॐ गजाननं भूतगणादिसेवितं कपित्थजम्बूफलचारुभक्षणम् ।
उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वरपादपङ्कजम् ॥
ॐ अम्बे अम्बिके अम्बालिके न मा नयति कश्चन ।
ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥
आवाहन—आगच्छ भगवन् देव ! स्थाने चात्र स्थिरो भव ।
यावत्पूजां करिष्यामि तावत्त्वं सन्निधो भव ॥
गणेशाम्बिकाभ्यां नमः, आवाहयामि

प्रतिष्ठा — अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ।
अस्यै देवत्वमर्चायै मामहेति च कश्चन ॥ प्र.
आसन — रम्यं सुशोभनं दिव्यं सर्वसौख्यकरं शुभम् ।
आसनञ्च मया दत्तं गृहाण परमेश्वर ॥ आसनं स.
पाद्य — उष्णोदकं निर्मलं च सर्वसौगन्ध्यसंयुतम् ।
पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ॥ पा.स.
अर्घ्यं — अर्घ्यं गृहाण देवेश गन्धपुष्पाक्षतैः सह ।
करुणां कुरु मे देव ! गृहाणार्घ्यं नमोऽस्तुते ॥ अ.स.

आचमन— सर्वतीर्थसमायुक्तं सुगन्धि निर्मलं जलम् ।
आचम्यतां मया दत्तं गृहीत्वा परमेश्वर ॥ आ.स.

स्नान — गङ्गा-सरस्वती-रेवा-पयोष्णी-नर्मदाजलैः ।
स्नापितोऽसि मया देव तथा शान्तिं कुरुष्व मे ॥ स्ना.स.

दुग्धस्नान— कामधेनुसमुत्पन्नं सर्वेषां जीवनं परम् ।
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥ दु.स.

दधिस्नान— पयसस्तुसमुद्भूतं मधुराम्लं शशिप्रभम् ।
दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम् ॥ द.स.

घृतस्नान— नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् ।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥ घृ.स.

मधुस्नान— तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु ।
तेजःपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥ म.स.

शर्करास्नान— इक्षुसारसमुद्भूता शर्करापुष्टिकारिका ।
मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम् ॥ श.स.

पञ्चामृत— पयो दधि घृतं चैव मधु च शर्करायुतम् ।
पञ्चामृतं मयानीतं स्नानार्थं प्रतिगृह्यताम् ॥ पं.स.

शुद्धस्नान— मन्दाकिन्यास्तु यद्वारि सर्वपापहरं शुभम् ।
तदिदं कल्पितं देव ! स्नानार्थं प्रतिगृह्यताम् ॥ शु.स.

वस्त्र — सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे ।
मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥ व.स.

उपवस्त्र — सुजातो ज्योतिषा सह शर्म वरूथमाऽसदत्सवः ।
वासोअग्ने विश्वरूपꣳ सं व्ययस्व विभावसो ॥ उ.स.

यज्ञोपवीत— नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् ।
उपवीतं मया दत्तं गृहाण परमेश्वर ॥ य.स.

मधुपर्क — कांस्ये कास्येन पिहितो दधिमध्वाज्यसंयुतः ।
मधुपर्को मयानीतः पूजार्थं प्रतिगृह्यताम् ॥ म.स.

गन्ध — श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ ! चन्दनं प्रतिगृह्यताम् ॥ गं.स.

रक्तचन्दन— रक्तचन्दनसम्मिश्रं पारिजातसमुद्भवम् ।
मया दत्तं गृहाणाशु चन्दनं गन्धसंयुतम् ॥ र.स.

रोली — कुङ्कुमं कामनादिव्यं कामनाकामसम्भवम् ।
कुङ्कुमेनार्चितो देव गृहाण परमेश्वर ! ॥ कु.स.

सिन्दूर — सिन्दूरं शोभनं रक्तं सौभाग्यं सुखवर्द्धनम् ।
शुभदं कामदं चैव सिन्दूरं प्रतिगृह्यताम् ॥ सिं.स.

अक्षत — अक्षताश्च सुरश्रेष्ठकुङ्कुमाक्ताः सुशोभिताः ।
मया निवेदिता भक्त्या गृहाण परमेश्वर ! ॥ अ.स.

पुष्प — पुष्पैर्नानाविधैर्दिव्यैः कुमुदैरथ चम्पकैः ।
पूजार्थं नीयते तुभ्यं पुष्पाणि प्रतिगृह्यताम् ॥ पु.स.

माला — माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयानीतानि पुष्पाणि गृहाण परमेश्वर ! ॥ पु.मा.स.

विल्वपत्र— त्रिशाखैर्विल्वपत्रैश्च अच्छिद्रैः कोमलैः शुभैः ।
तव पूजां करिष्यामि गृहाण परमेश्वर ! ॥ वि.प.स.

दूर्वा — त्वं दूर्वेऽमृतजन्मासि वन्दितासि सुरैरपि ।
सौभाग्यं सन्ततिं देहि सर्वकार्यकरी भव ॥ दू.स.

दूर्वाङ्कुर — दूर्वाङ्कुरान् सुहरितानमृतान् मंगलप्रदान् ।
आनीतांस्तव पूजार्थं गृहाण गणनायक ! ॥ दुर्वा.स.

शमीपत्र— शमी शमय मे पापं शमी लोहितकण्टका ।
धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी ॥ श.स.

आभूषण— अलङ्कारान्महादिव्यान्नानारत्नविनिर्मितान् ।
गृहाण देवदेवेश ! प्रसीद परमेश्वर ! ।। आ.स.

अबीर-गुलाल— अबीरं च गुलालं च चोवा चन्दनमेव च ।
अबीरेणार्चितो देव ! अतः शान्ति प्रयच्छ मे ।। अ.स.

सुगन्ध तैल— चम्पकाशोक-वकुल-मालती-मोगरादिभिः ।
वासितं स्निग्धताहेतुं तैलं चारु प्रगृह्यताम् ।। सु.स.

धूप — वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ।। धू.आ.

दीप — आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ।
दीपं गृहाण देवेश ! त्रैलोक्यतिमिरापहम् ।। दी.द.

नैवेद्य — शर्कराघृतसंयुक्तं मधुरं स्वादु चोत्तमम् ।
उपहारसमायुक्तं नैवेद्यं प्रतिगृह्यताम् ।। नै.निवे.

मध्ये पानीयं— अतितृप्तिकरं तोयं सुगन्धि च पिबेच्छया ।
त्वयि तृप्ते जगत्तृप्तं नित्यतृप्ते महात्मनि ।। म.पा.स.

ऋतुफल— नारिकेलफलं जम्बूफलं नारङ्गमुत्तमम् ।
कूष्माण्डं पुरतो भक्त्या,कल्पितं प्रतिगृह्यताम् ।। ऋ.स.

आचमन— गङ्गाजलं समानीतं सुवर्णकलशे स्थितम् ।
आचम्यतां सुरश्रेष्ठ ! शुद्धमाचमनीयकम् ।। आ.स.

अ.ऋ. — इदं फलं मया देव ! स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ।। अ.ऋ.स.

ताम्बूलपूगीफल— पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।
एलाचूर्णादिसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ।। तां.पू.स.

दक्षिंणा — हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।। द्रव्यं स.

आरती — चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च ।
त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यताम् ॥ आ.स.

पुष्पाञ्जलि— नानासुगन्धिपुष्पाणि यथाकालोद्भवानि च ।
पुष्पाञ्जलिर्मया दत्तो गृहाण परमेश्वर ! ॥ पु.स.

प्रार्थना — रक्ष रक्ष गणाध्यक्ष ! रक्ष त्रैलोक्यरक्षक ! ।
भक्तानामभयं कर्त्ता त्राता भव भवार्णवात् ॥

अनया पूजया गणेशाम्बिके प्रीयेतां न मम ॥

अष्टदल कमल बना, धान्य रख, उसपर कलश-स्थापन करें ।

भू. स्प.— ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ।
पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीः ॥

धान्य— ॐ धान्यमसि धिनुहि देवान् प्राणाय त्वो दानाय त्वा व्यानाय त्वा । दीर्घामनु प्रसितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेणपाणिना चक्षुषे त्वा महीनां पयोऽसि ॥

सप्तधान्यपर कलश-स्थापन— ॐ आ जिघ्र कलशं मह्या त्वा विशन्त्विन्दवः । पुनरूर्जा निवर्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्माविशताद्रयिः ॥

कलश में जल— ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनी स्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद ॥

कलश में गन्ध— ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ गं.स.

कलश में सर्वौषधि— ॐ या औषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।
मनै नु बभ्रूणामहꣳशनं धामानि सप्त च ॥

कलश में दूर्वा— ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषस्परि ।
एवानो दूर्वे प्रतनु सहस्रेणशतेन च ॥ दू.स.

कलशपर पञ्च-पल्लव— ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृतः ।
गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥ प.प.

कलश में सप्तमृत्तिका— ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी ।
यच्छा नः शर्म्म सप्रथाः ॥ स.मृ.स.

पूगीफल— ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्व ँ हसः ॥ पू.स.

कलश में पञ्चरत्न— ॐ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् ।
दधद्रत्नानि दाशुषे ॥ पं.स.

कलश में सुवर्ण या द्रव्य— ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥
द्र.स.

वस्त्र — ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् । देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥ वस्त्रं स.

पूर्णपात्र— ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत । वस्नेव विक्रीणावहा इषमूर्ज- ँ शतक्रतो ॥ पू.पा.स.

(पूर्णपात्रको कलश पर रखें)

श्रीफल— ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण ॥ श्रीफलं स.

(नारियलपर लाल वस्त्र लपेटकर पूर्णपात्र पर रखें ।)

वरुणावाहन— ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्र मोषीः ॥ अस्मिन् कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि, ॐ भूर्भुवः स्वः भो वरुण ! इहागच्छ, इह तिष्ठ, स्थापयामि, पूजयामि ॥

आवाहन— सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।। आयान्तु देवपूजार्थं दुरितक्षयकारकाः ।। कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः । कुक्षौ तु सागरा सर्वे सप्तद्वीपा वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।। अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः । अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा ।। आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ।।

प्रतिष्ठा— ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञᳬं समिमं दधातु । विस्वे देवास इह मादयन्ता मो३म् प्रतिष्ठ ।।

कलशे वरुणाद्यावाहिताः देवताः सुप्रतिष्ठिताः वरदाः भवन्तु ।।
पूजनकर नीचे लिखी प्रार्थना करें ।

देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि यदा कुम्भ विधृतो विष्णुना स्वयम् ।। त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ।। शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः । त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः । त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव ।। सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ।। (अक्षत छोड़ें)

नवग्रह पूजन

बायें हाथ में अक्षत ले दाहिने हाथ से प्रत्येक मन्त्र के बाद अक्षत छोड़ें ।

सूर्य-'मण्डल के मध्य में' (गोलाकार, लाल)

ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च । हिरण्येन सविता रथेन देवो याति भुवनानि पश्यन् ।। ॐ भूर्भुवः स्वः सूर्य इहागच्छ, इह तिष्ठ । सूर्याय नमः ।

चन्द्र– 'अग्निकोण में' (अर्धचन्द्र, श्वेत)

ॐ इमं देवा आसपत्न ꣳ सुवध्वं महते क्षत्राय महते ज्येष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय। इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोऽमी राजा सोमोऽस्माकं ब्राह्मणाना ꣳ राजा ॥

ॐ भूर्भुवः स्वः चन्द्र इहागच्छ, इह तिष्ठ । सोमाय नमः ।

मङ्गल– 'दक्षिण में' (त्रिकोण, लाल)

ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाꣳ रेता ꣳ सि जिन्वति ॥

ॐ भूर्भुवः स्वः भौम इहागच्छ, इह तिष्ठ । भौमाय नमः ।

बुध– 'ईशानकोण में' (हरा बाण)

ॐ उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते स ꣳ सृजेतामयं च । अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥

ॐ भूर्भुवः स्वः बुध इहागच्छ, इह तिष्ठ । बुधाय नमः ।

बृहस्पति– 'उत्तर में' (पीला अष्टदल)

ॐ बृहस्पते अति यदर्यो अर्हाद् द्युमद्विभाति क्रतुज्जनेषु । यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥ ॐ भूर्भुवः स्वः बृहस्पते इहागच्छ, इह तिष्ठ । बृहस्पतये नमः ।

शुक्र– 'पूर्व में (श्वेत पञ्चकोण)

ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः । ऋतेन सत्यमिन्द्रियं बिपान ꣳ शुक्रमन्थस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥

ॐ भूर्भुवः स्वः शुक्र ! इहागच्छ, इह तिष्ठ । शुक्राय नमः ।

शनि— 'पश्चिम में' (काला मनुष्य)

ॐ शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभि स्रवन्तु नः ॥

ॐ भूर्भुवः स्वः शनैश्चर ! इहागच्छ, इह तिष्ठ । शनैश्चराय नमः ।

राहु— 'नैर्ऋत्यकोण में' (काला मकर)

ॐ कया नश्चित्र आ भुवदूती सदाबृधः सखा । कया शचिष्ठया वृता ।

ॐ भूर्भुवः स्वः राहो ! इहागच्छ, इह तिष्ठ । राहवे नमः ।

केतु— 'वायव्य कोण में' (काली ध्वजा)

ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे समुषद्भिरजायथाः ।

ॐ भूर्भुवः स्वः केतो ! इहागच्छ, इह तिष्ठ । केतवे नमः ।

ॐ सूर्यादि-नवग्रहेभ्यो नमः ॥ पूजन करके नीचे लिखी प्रार्थना करें ॥

ॐ ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ॥

"अनया पूजया सूर्यादिनवग्रहाः प्रीयन्तां न मम ।" अक्षत छोड़ें।

पञ्चलोकपाल-पूजन

बायें हाथ में अक्षत ले, दाहिने हाथ से प्रत्येक मंत्र के बाद अक्षत छोड़ें ।

गणपति— ॐ गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपति ꣳ हवामहे निधीनां त्वा निधिपति ꣳ हवामहे वसो मम । आहमजानिगर्भधमा त्वमजासि गर्भधम ।

ॐ भूर्भुवः स्वः गणपते ! इहागच्छ, इह तिष्ठ । गणपतये नमः ।

देवी— ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः । स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥

ॐ भूर्भुवः स्वः दुर्गे ! इहागच्छ, इह तिष्ठ । दुर्गायै नमः ॥

वायु— ॐ आ नो नियुद्भिः शतिनीभिरण्वर ꣳ सहस्त्रिणीभीरुप याहि यज्ञम्। वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥

ॐ भूर्भुवः स्वः वायो ! इहागच्छ, इह तिष्ठ। वायवे नमः ॥

आकाश— ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा ॥ ॐ भूर्भुवः स्वः आकाश ! इहागच्छ, इह तिष्ठ। आकाशाय नमः ॥

अस्विनी— ॐ या वां कशा मधुमत्यश्विना सूनृतावती। तया यज्ञं मिमिक्षतम् ॥ उपयाम गृहीतोऽस्यश्विभ्यांत्वैष ते योनिर्माध्वीभ्यां त्वा ॥

ॐ भूर्भुवः स्वरश्विना ! इहागच्छ, इह तिष्ठ, अश्विनिभ्यां नमः।

(इत्यावाह्य) ॐ गणपत्यादिपञ्चलोकपालेभ्यो नमः ॥

पूजन करें। पश्चात् "अनया पूजया पञ्चलोकपालाः प्रीयन्तां न मम" बोलकर अक्षत छोड़ें।

दश-दिक्पाल-पूजन

बायें हाथ में अक्षत लेकर दाहिने हाथ से प्रत्येक मंत्र के बाद अक्षत छोड़ें।

इन्द्र— (पूर्व में) ॐ त्रातारमिन्द्रसवितारमिन्द्र ꣳ हवे हवे सुहव ꣳ शूरमिन्द्रम्। ह्वयामि शक्रं पुरुहूतमिन्द्र ꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥ (इन्द्राय नमः)

अग्नि— (अग्निकोण में) ॐ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे। देवाँ आ सादयादिह ॥ (अग्नये नमः)

यम— (दक्षिण में) ॐ असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन। असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि ॥ (यमाय नमः)

निर्ऋति— (नैर्ऋत्य कोण में) ॐ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य। अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ (नैर्ऋत्याय नमः)

वरुण— (पश्चिम में) ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय ।
त्वामवस्युराचक्रे ॥ (वरुणाय नमः) व.आ.स्था.।

वायु— (उत्तरकोण में) ॐ वायुरग्रेगा यज्ञप्रीः साकं गन्मनसा यज्ञम् ।
शिवो नियुद्भिः शिवाभिः ॥ (वायवे नमः ।) वा.आ.

कुबेर — (उत्तर में) ॐ कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नम उक्तिं यजन्ति ॥
(कुबेराय नमः) कु.आ.स्था

ईशान— (ईशान कोण में) ॐ तमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे
वयम् । पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये ॥
(ईशानाय नमः)

ब्रह्मा— (ईशानपूर्व के मध्य में) ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो
वेन आवः । स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च
विवः ॥ (ब्रह्मणे नमः)

अनन्त— (नैर्ऋत्य पश्चिम के मध्य में) ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु ।
ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥ (अनन्ताय नमः)
अनन्तं आ. स्था. "ॐ इन्द्रादि दश दिक्पालेभ्यो नमः" से पूजन करें, पश्चात् "अनया पूजया दश दिक्पालदेवताः प्रीयन्तां न मम" कहकर अक्षत छोड़ें ।

षोडशमातृका-पूजन

बायें हाथ में अक्षत लेकर दाहिने हाथ से प्रत्येक नाम पर अक्षत छोड़ें ।

ॐ गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥
हृष्टिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवताः ।
गणेशेनाधिका ह्येता वृद्धौ पूज्याश्च षोडश ॥

"ॐ भूर्भुवः स्वः षोडशमातृकाभ्यो नमः इहागच्छन्त इह तिष्ठत" ॥

ॐगौर्यादिषोडशमातृकाभ्यो नमः ॥

पूजन करके नीचे लिखी प्रार्थना करें ।

ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥

'अनया पूजया गौर्यादिषोडशमातरः प्रीयन्तां न मम' (अक्षत छोड़ें) ।

चतुःषष्टि-योगिनी-पूजन

बायें हाथ में अक्षत लेकर दाहिने हाथ से नीचे लिखे मंत्र से छोड़ते जायें ।

आवाहयाम्यहं देवीः योगिनीः परमेश्वरीः ।
योगाभ्यासेन सन्तुष्टाः परध्यानसमन्विताः ।
चतुःषष्टिः समाख्याता योगिन्यो हि वरप्रदाः ॥

"ॐचतुःषष्टियोगिनीमातृकाभ्यो नमः" कहकर पूजन करें । पश्चात् "अनया पूजया चतुःषष्टियोगिन्यः प्रीयन्तां न मम" कहकर अक्षत छोड़ें ।

रक्षा-विधान

बायें हाथ में पीली सरसों अथवा चावल, द्रव्य और तीन तारकी मौली लेकर दाहिने हाथ से ढक कर नीचे लिखे मंत्र बोलें ।

ॐ गणाधिपं नमस्कृत्य नमस्कृत्य पितामहम् । विष्णुं रुद्रं श्रियं देवीं वन्दे भक्त्या सरस्वतीम् ॥ स्थानाधिपं नमस्कृत्य ग्रहनाथं निशाकरम् । धरणीगर्भसम्भूतं शशिपुत्रं बृहस्पतिम् ॥ दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं महाग्रहम् । राहुं केतुं नमस्कृत्य यज्ञारम्भे विशेषतः ॥ शक्राद्या देवताः सर्वाः मुनींश्चैव तपोधनान् । गर्गं मुनिं नमस्कृत्य नारदं मुनिसत्तमम् ॥ वसिष्ठं मुनिशार्दूलं विश्वामित्रं च गोभिलम् । व्यासं मुनिं नमस्कृत्य सर्वशास्त्रविशारदम् ॥ विद्याधिका ये मुनयः आचार्याश्च तपोधनाः । तान् सर्वान् प्रणमाम्येवं यज्ञरक्षाकरान् सदा ॥

नीचे लिखे मन्त्रों से दशों दिशाओं में पीली सरसों या चावल छोड़ें ।

पूर्वे रक्षतु वाराहः आग्नेय्यां गरुड़ध्वजः। दक्षिणे पद्मनाभस्तु नैर्ऋत्यां मधुसूदनः॥ पश्चिमे चैव गोविन्दो वायव्यां तु जनार्दनः। उत्तरे श्रीपती रक्षेत् ऐशान्यां तु महेश्वरः॥ ऊर्ध्वं रक्षतु धाता वो ह्यधोऽनन्तश्च रक्षतु। एवं दशदिशो रक्षेद् वासुदेवो जनार्दनः॥ रक्षाहीनन्तु यत्स्थानं रक्षत्वीशो ममाद्रिधृक्। यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा॥ स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु। अपक्रामन्तु ते भूता ये भूता भूतले स्थिताः॥ ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया। अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्॥ सर्वेषामविरोधेन पूजाकर्म समारभे॥

पश्चात् मौली गणेशजी के सन्मुख रख दें। फिर उस मौली में से गणपत्यादि समस्त देवताओं को चढ़ाकर रक्षाबन्धन करें।

ब्राह्मण-रक्षाबन्धन-मन्त्र

ब्राह्मण के हाथ में दक्षिणा देकर रक्षा बाँधे।

ॐ व्रतेन दीक्षामाप्नोति दीक्षयाऽऽप्नोति दक्षिणाम् ।
दक्षिणा-श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥

ब्राह्मण-तिलक मन्त्र

ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

यजमान-रक्षाबन्धन-मन्त्र

येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वामनुबध्नामि रक्षे मा चल मा चल ॥

यजमान-तिलक-मन्त्र

शतमानं भवति शतायुव पुरुषः ।
शतेन्द्रिय आयुरेवेन्द्रियं वीर्यमात्मन् धत्ते ॥

शालग्राम-पूजन

शालग्राम तथा प्रतिष्ठित मूर्तियों में आवाहन न करें, केवल पुष्प छोड़ें ।

आवाहन— ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमि ꣳ सर्वतस्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ आवाहयामि

आसन— ॐ पुरुष एवेद ꣳ सर्वं यद् भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहाम ॥ आसनं समर्पयामि

पाद्य — ॐ एतावानस्य महिमातो ज्यायाँश्च पुरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ पा.

अर्घ्य — ॐ त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥अर्घ्यं समर्पयामि

आचमन— ॐ ततो विराडजायत विराजो अधि पुरुषः ।
स जातो अत्यरिच्यत पश्चाद् भूमिमथो पुरः ॥ आ.स.

स्नान — तस्माद्यज्ञात सर्वहुतः सम्भृतं पृषदाज्यम ।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥ स्नान स.

दुग्ध — ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ।
पयस्वतीः प्रदिशः सन्तु मह्यम ॥ दुग्ध स्नान समर्पयामि

दधि — ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभिनो मुखा करत्प्रण आयुꣳ षि तारिषत् ॥ द.स्नान

घृत स्नान— ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा। दिशाः प्रदिश आदिशो विदिश उद्दीसो दिग्भ्यः स्वाहा ॥ घृ.स्ना.स.

मधु स्नान— ॐ मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसो मधुमत्पार्थिव ꣳ रजः। मधुद्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमांऽअस्तु सूर्यः। माध्वीर्गावो भवन्तु नः ॥ मधुस्नानांते पुनर्जलस्नानं समर्पयामि

शर्करा— ॐ अपा ꣳ रसमुद्वयस ꣳ सूर्ये सन्त ꣳ समाहितम्। अपा ꣳ रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयाम गृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम्॥ श.स्ना.स.पु.समर्पयामि।

पञ्चामृत स्नान— ॐ पञ्चनद्यः सरस्वतीमपि यन्ति सस्त्रोतसः ।
सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥पं.स्ना.स.

शुद्धोदक स्नान— कावेरी नर्मदा वेणी तुङ्गभद्रा सरस्वती ।
गङ्गा च यमुना चैव ताभ्यः स्नानार्थमाहृतम् ।
गृहाण त्वं रमाकान्त स्नानाय श्रद्धया जलम् ॥ शु.स्ना.स.

वस्त्र — तस्माद्यज्ञात सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥
वस्त्रार्थे उपवस्त्रं समर्पयामि

यज्ञोपवीत— ॐ तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ य.समर्पयामि

मधुपर्क— दधि मध्वाज्यसंयुक्तं पात्रयुग्म-समन्वितम् ।
मधुपर्कं गृहाण त्वं वरदो भव शोभन ॥ मधुपर्क समर्पयामि

गन्ध— ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ गन्धं समर्पयामि।

अक्षत— (श्वेततिल चढ़ायें किन्तु चावल नहीं) ॐ अक्षन्नमीमदन्त ह्यव प्रिया अधूषत। अस्तोषत स्वभानवो विप्रा नविष्ठया मती यो जान्विन्द्र ते हरी॥ अक्षतान् समर्पयामि

पुष्प — ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पाꣳसुरे स्वाहा ॥ पुष्पं समर्पयामि।

पुष्पमाला— ॐ ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः ।
अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥ पु. स.

तुलसीपत्र— ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखङ्किमस्यासीत् किम्बाहू किमूरू पादा उच्येते ॥ तु.स.

तुलसीं हेमरूपां च रत्नरूपाञ्च मञ्जरीम् ।
भवमोक्षप्रदां तुभ्यमर्पयामि हरिप्रियाम् ॥ तु.स.

ॐ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ।
इन्द्रस्य युज्यः सखा ॥ तु.समर्पयामि

विल्वपत्र— तुलसीविल्वनिम्बैश्च जंबीरैरामलैः शुभैः ।
पञ्चविल्वमिति ख्यातं प्रसीद परमेश्वर ! ॥ वि.स.

दूर्वा — विष्ण्वादिसर्वदेवानां दूर्वे त्वं ! प्रीतिदा सदा ।
क्षीरसागरसंभूते ! वंशवृद्धिकरी भव ॥ दू.स.

शमीपत्र— शमी शमयते पापं शमी शत्रुविनाशिनी ।
धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी ॥ श.स.

आभूषण— ॐ रत्नकङ्कणवैदूर्यमुक्ताहारादिकानि च ।
सुप्रसन्नेन मनसा दत्तानि स्वीकुरुष्व भोः ॥ आ.स.

अबीरगुलाल — नानापरिमलैर्द्रव्यैर्निर्मितं चूर्णमुत्तमम् ।
अबीरनामकं चूर्णगन्धं चारु प्रगृह्यताम् ॥ अ.स.

सु. तै. — ॐ तैलानि च सुगन्धीनि द्रव्याणि विविधानि च ।
मया दत्तानि लेपार्थं गृहाण परमेश्वर ॥ सु.तैलं स.

धूप — ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
उरू तदस्य यद् वैश्यः पद्भ्याꣳ शूद्रो अजायत ॥

धूप — ॐ धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामः ।
देवानामसि वह्नितमꣳ सस्नितमं पप्रितमं जुष्टतमन्देवहूतमम् ।।
धूपमाघ्रापयामि ।

दीप — ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ।। दीपं दर्शयामि ।

नैवेद्य (तुलसी छोड़कर पाँच ग्रास-मुद्रा दिखायें)

'प्राणाय स्वाहा'— कनिष्ठा, अनामिका और अँगूठा मिलायें ।।१ ।।

'अपानाय स्वाहा'— अनामिका, मध्यमा और अँगूठा मिलायें ।।२ ।।

'व्यानाय स्वाहा'— मध्यमा, तर्जनी और अँगूठा मिलायें ।।३ ।।

'उदानाय स्वाहा'— तर्जनी, मध्यमा, अनामिका और अँगूठा मिलायें ।।४ ।।

'समानाय स्वाहा'— सब अँगूलियाँ तथा अँगूठा मिलायें ।।५ ।।

ॐ नाभ्या आसीदन्तरिक्ष ꣳ शीर्ष्णो द्यौः समवर्त्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ २ अकल्पयन् ।। यत् पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ।। सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञन्तन्वाना अबध्नन् पुरुषम्पशुम् ।। यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्तिदेवाः ।। अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे । तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ।। वेदाहमेतं पुरुषंमहान्तमादित्यवर्णन्तमशः परस्तात् । तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ।। प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते । तस्य योनिं परिपश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा ।। यो देवेभ्य आतपति यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ।। रुचम्ब्राह्मञ्जनयन्तो देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन् वशे ।। श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुं म इषाण सर्वलोकं म इषाण ।। नैवेद्यं निवेदयामि ।

मध्ये पानीयं— एलोशीरलवङ्गादि कर्पूरपरिवासितम् ।
प्राशनार्थं कृतं तोयं गृहाण परमेश्वर ! ।।म.पा.समर्पयामि।

ऋतुफल-पनस— बीजपूराम्र-खर्जूरी-कदली-फलम् ।
नारिकेलफलं दिव्यं गृहाण परमेश्वर ! ।। ऋतु फलं समर्पयामि ।

आचमन— कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् ।
आचम्यतां जगन्नाथ ! मया दत्तं हि भक्तितः ।। आ.स.

अखण्ड ऋतुफल— फलेन फलितं सर्वं त्रैलोक्यं सचराचरम् ।
तस्मात् फलप्रदानेन पूर्णाः सन्तु मनोरथाः ।। अ.स.

ताम्बूल-पूगीफल— ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ।। तां.स.

दक्षिणा— पूजाफलसमृद्ध्यर्थं दक्षिणा च तवाग्रतः ।
स्थापिता तेन मे प्रीतः पूर्णान् कुरु मनोरथान् ।। दक्षिणा स.

आरती

प्रथम चरणोंकी चार, नांभीकी दो, मुखकी एक या तीन बार और समस्त अङ्गोंकी सात बार आरती करें । पश्चात् शंख का जल भक्तोंपर छिड़कें ।

कदलीगर्भसम्भूतं कर्पूरस्तु प्रदीपितम् ।
आरार्तिकमहं कुर्वे पश्य मां वरदो भव ।।

श्रीसत्यनारायणजीकी आरती

जय लक्ष्मीरमणा श्रीलक्ष्मीरमणा ।
सत्यनारायण स्वामी जनपातकहरणा ।।जय ।। टेर ।।

रत्न जड़ित सिंहासन अद्भुत छवि राजे ।
नारद करत निराजन घण्टाध्वनि बाजे ॥जय॰ ॥

प्रगट भये कलिकारण द्विजको दरश दियो ।
बूढ़ो ब्राह्मण बनके कञ्चनमहल कियो ॥जय॰ ॥

दुर्बल भील कठारो जिनपर कृपा करी ।
चन्द्रचूड़ एक राजा जिनकी विपति हरी ॥जय॰ ॥

वैश्य मनोरथ पायो श्रद्धा तज दीनी ।
सो फल भोग्यो प्रभुजी फिर स्तुति कीनी ॥जय॰ ॥

भावभक्ति के कारण छिन-छिन रूप धर्‍यो ।
श्रद्धा धारण कीनी तिनको काज सर्‍यो ॥जय॰ ॥

ग्वालबाल संग राजा बनमें भक्ति करी ।
मनवांछित फल दीन्यो दीनदयाल हरी ॥जय॰ ॥

चढ़त प्रसाद सवायो कदलीफल मेवा ।
धूप दीप तुलसीसे राजी सतदेवा ॥जय॰ ॥

श्रीसत्यनारायणजीकी आरती जो गावे ।
भणत शिवानन्द स्वामी सुख सम्पति पावे ॥जय॰ ॥

विष्णु-स्तुति

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥१॥

आदौ रामतपोवनादिगमनं हत्वा मृगं काञ्चनम् ।
वैदेहीहरणं जटायुमरणं सुग्रीवसम्भाषणम् ।
बालीनिग्रहणं समुद्रतरणं लङ्कापुरीदाहनम् ।
पश्चाद्रावणकुम्भकर्णहननं चैतद्धि रामायणम् ॥२॥

आदौ देवकिदेवगर्भजननं गोपीगृहे वर्द्धनम् ।
मायापूतनजीवितापहरणं गोवर्द्धनोद्धारणम् ।
कंसच्छेदनकौरवादिहननं कुन्तीसुतापालनम् ।
एतद्भागवतं पुराणकथितं श्रीकृष्णलीलामृतम् ॥३॥

कस्तूरीतिलकं ललाटपटले वक्षःस्थले कौस्तुभम् ।
नासाग्रे वरमौक्तिकं करतले वेणुं करे कंकणम् ।
सर्वाङ्गे हरिचन्दनं सुललितं कण्ठे च मुक्तावली ।
गोपस्त्रीपरिवेष्टितो विजयते गोपालचूड़ामणिः ॥४॥

फुल्लेन्दीवरकान्तिमिन्दुवदनं वर्हावतंसप्रियम् ।
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ।
गोपीनां नयनोत्पलार्चिततनुं गोगोपसङ्घावृतम् ।
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे ॥५॥

यं ब्रह्मावरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवै- ।
र्वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो ।
यस्यान्तं न विदुः सुरासुरगणाः देवाय तस्मै नमः ॥६॥

आदौ पाण्डवधार्तराष्ट्रजननं लाक्षागृहे दाहनम् ।
द्यूतस्त्रीहरणं वने विचरणं मत्स्यालयावेक्षणम् ।

लीला गोहरणं रणे विचरणं सन्ध्याक्रियावर्धनम् ।
पश्चाद्भीष्मसुयोधनादिहननं चैतन्महाभारतम् ॥७॥

श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियांपतिर्लोकपतिर्धरापतिः । पतिर्गतिश्चान्धकवृष्णिसात्वतां प्रसीदतां मे भगवान् सतां पतिः ॥८॥ मत्स्याश्वकच्छपनृसिंहवराहहंस राजन्यविप्रविबुधेषु कृतावतारः । त्वं पाहि नस्त्रिभुवनञ्च यथाधुनेश ! भारं भुवो हर यदूत्तम ! वन्दनं ते ॥९॥ सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितञ्च सत्ये । सत्यस्य सत्यामृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः ॥१०॥ नमोऽस्त्वनन्ताय सहस्त्रमूर्तये, सहस्त्रपादाक्षि शिरोरुबाहवे । सहस्त्रनाम्ने पुरुषाय शाश्वते, सहस्त्रकोटियुगधारिणे नमः ॥११॥ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च । जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥१२॥ आकाशात्पतितं तोयं यथा गच्छति सागरम् । सर्वदेव नमस्कारः केशवं प्रतिगच्छति ॥१३॥ मूकं करोति वाचालं पंगु लङ्घयते गिरिम् । यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥१४॥ त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव । त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव ॥१५॥ पापोऽहं पापकर्माहं पापात्मा पापसम्भवः । त्राहि मां पुण्डरीकाक्ष ! सर्व पापहरो भव ॥१६॥ कृष्णाय वासुदेवाय देवकीनन्दनाय च । नन्दगोपकुमाराय गोविन्दाय नमोनमः ॥१७॥ ध्येयं सदा परिभवघ्नमभीष्टदोहं, तीर्थास्पदं शिवविरञ्चिनुतं शरण्यम् । भृत्यार्तिहं प्रणतपालभवाब्धिपोतं, वन्दे महापुरुष ते चरणारविन्दम् ॥१८॥ त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं, धर्मिष्ठ आर्यवचसा यदगादरण्यम् । मायामृगं दयितयेत्सितमन्वधावन्, वन्दे महापुरुष ते चरणारविन्दम् ॥१९॥ अपराधसहस्त्रभाजनं पतितं भीमभवार्णवोदरे । अगतिं शरणागतं हरे ! कृपया केवलमात्मसात् कुरु ॥२०॥ एकोऽपि कृष्णस्य कृतः प्रणामो, दसाश्वमेधावभृथेन तुल्यः । दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ॥२१॥

पुष्पाञ्जलि

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्न । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ ॐ राजाधिराजाय प्रसह्य साहिने । नमो

वयं वैश्रवणाय कुर्महे स मे कामान् कामकामाय मह्यम्। कामेश्वरो वैश्रवणो ददातु। कुबेराय वैश्रवणाय महाराजाय नमः॥ ॐ स्वस्ति साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुष आन्तादापरार्धात् पृथिव्यै समुद्रपर्यन्ताया एकराडिति। तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे आवि क्षितस्य कामप्रेर्विश्वेदेवाः सभासदः॥ पुष्पाञ्जलिं समर्पयामि॥ ॐ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो बाहुरुत विश्वतस्पात्। संबाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः। कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात्। करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पये तत्॥

प्रदक्षिणा

ये तीर्थानि प्रचरन्ति सृकाहस्तानिषङ्गिणः ।
तेषांᳪ सहस्रयोजनेऽव धन्वानि तन्मसि ॥

क्षमा-प्रार्थना

मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन ।
यत्पूजितं मया देव ! परिपूर्णं तदस्तु मे ॥
यदक्षरपदभ्रष्टं मात्राहीनं च यद् भवेत् ।
तत्सर्वं क्षम्यतां देव ! प्रसीद परमेश्वर ! ॥

विसर्जन

यजमानहितार्थाय पुनरागमनाय च ।
गच्छन्तु च सुरश्रेष्ठाः ! स्वस्थानं परमेश्वर ! ॥

यजमान को आशीर्वाद का मन्त्र (अक्षत दें)।

अक्षतान् विप्रहस्तात्तु नित्यं गृह्णन्ति ये नराः।
चत्वारि तेषां वर्धन्ते आयुर्विद्यायशोबलम् ॥

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥
श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात् पवमानं महीयते ।
धनं धान्यं पशुं बहुपुत्रलाभं शतसम्वत्सरं दीर्घमायुः ॥

चरणामृत-ग्रहण-विधि

बायें हाथपर दोहरा वस्त्र रखकर दाहिना हाथ रखें, पश्चात् चरणामृत लेकर पान करें । जमीन पर न गिरने दें ।

तुलसी-ग्रहण-मन्त्र

पूजनानन्तरं विष्णोरर्पितं तुलसीदलम् ।
भक्षये देहशुद्ध्यर्थं चान्द्रायणशताधिकम् ॥

चरणामृत-ग्रहण-मन्त्र

कृष्ण ! कृष्ण ! महाबाहो ! भक्तानामार्तिनाशनम् ।
सर्वपापप्रशमनं पादोदकं प्रयच्छ मे ॥

पश्चात् नीचे लिखा मन्त्र बोलते हुए चरणामृत पान करें ।

अकालमृत्युहरणं सर्वव्याधिविनाशनम् ।
विष्णुपादोदकं पीत्वा पुनर्जन्म न विद्यते ॥

पञ्चामृत-ग्रहण-मन्त्र

दुःखदौर्भाग्यनाशाय सर्वपापक्षयाय च ।
विष्णोः पञ्चामृतं पीत्वा पुनर्जन्म न विद्यते ॥

नैवेद्य-ग्रहण-मन्त्र

नैवेद्यमन्नं तुलसीविमिश्रितं विशेषतः पादजलेन विष्णोः ।
योऽश्नाति नित्यं पुरतो मुरारेः प्राप्नोति यज्ञायुतकोटिपुण्यम् ॥

शिव-पूजन

पवित्र होकर आचमन-प्राणायाम करके संकल्प वाक्यके अन्तमें "श्रीसाम्ब-सदाशिवप्रीत्यर्थं गणपत्यादि सकलदेवता-पूजन-पूर्वकं श्रीभवानीशङ्करपूजनं करिष्ये" कहकर संकल्प करें। नीचे लिखे आवाहन मन्त्रों से मूर्तियोंके समीप पुष्प छोड़ें। मूर्ति न हो तो आवाहन करके पूजन करें।

गणपति-पूजन— आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः ।
इहागत्य गृहाण त्वं पूजां यागं च रक्ष मे ॥

पूजन करके निचे लिखी प्रार्थना करें।

प्रार्थना — लम्बोदर ! नमस्तुभ्यं सततं मोदकप्रिय ! ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

पार्वती-पूजन— हिमाद्रितनयां देवीं वरदां शङ्करप्रियाम् ।
लम्बोदरस्य जननीं गौरीमावाहयाम्यहम् ॥

पूजन करके नीचे लिखी प्रार्थना करें।

ॐ अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन ।
ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् ॥

नन्दीश्वर-पूजन

आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ।
पितरञ्च प्रयन्त्स्वः ॥

पूजन करके नीचे लिखी प्रार्थना करें।

प्रैतु वाजी कनिक्रदन्नानदद्रासभः पत्वा ।
भरन्नग्निपुरीष्यं मा पाद्यायुषः पुरा ॥

वीरभद्र-पूजन

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाᳪं सस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥

पूजन करके नीचे लिखी प्रार्थना करें ।

भद्रो ने अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः ।
भद्रा उत प्रशस्तयः ॥

स्वामीकार्तिक-पूजन

यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥

पूजन करके नीचे लिखी प्रार्थना करें ।

यत्र बाणाः सम्पतन्ति कुमारा विशिषा इव ।
तन्न इन्द्रो बृहस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ॥

कुबेर-पूजन

कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कुणुहि भोजनानि ये बर्हिषो नम उक्तिं यजन्ति ॥

पूजन करके नीचे लिखी प्रार्थना करें ।

वयꣳ सोमव्रते तव मनस्तनूषु बिभ्रतः प्रजावन्तः सचेमहि ॥

कीर्तिमुख-पूजन

असवे स्वाहा वशवे स्वाहा विभुवे स्वाहा विवस्वते स्वाहा गणश्रिये स्वाहा गणपतये स्वाहाऽभिभुवे स्वाहाऽधिपतये स्वाहा शूषाय स्वाहा सꣳसर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा दिवापतये स्वाहा ॥

पूजन करके नीचे लिखी प्रार्थना करें ।

ओजश्च मे सहश्च मे आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थीनि च मे परूꣳषि च मे शरीराणि च मे आयुश्च मे जरा च मे यज्ञेन कल्पन्ताम् ।

जलहरी में सर्प का आकार हो तो सर्प का पूजनकर पश्चात् शिव-पूजन करें ।

पाद्य — ॐ नमोस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्वानोऽहन्तेभ्योऽकरं नमः ॥ पा.स.

अर्घ्य — ॐ गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह ।
बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु त्वा ॥ अ.स.

आचमन— ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥ आ.स.

स्नान — ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्ज्जनी स्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद ॥

स्नानं समर्पयामि ।

दुग्धस्नान—गोक्षीरधामन् देवेश ! गोक्षीरेण मया कृतम् ।
स्नपनं देवदेवेश ! गृहाण शिवशङ्कर ॥

दु.स्ना.स.। पुनर्जलस्नानं समर्पयामि ।

दधिस्नान— दध्ना चैव मया देव ! स्नपनं क्रियते तव ।
गृहाण भक्त्या दत्तं मे सुप्रसन्नो भवाव्यय ! ॥ द.स.,पु.स.

घृतस्नान— सर्पिषा देवदेवेश ! स्नपनं क्रियते मया ।
उमाकान्त ! गृहाणेदं श्रद्धया सुरसत्तम ! ॥ घृ.स.,पु.स.

मधुस्नान— इदं मधु मया दत्तं तव तुष्ट्यर्थमेव च ।
गृहाण शम्भो ! त्वं भक्त्या मम शान्तिप्रदो भव ॥ म.स.,पु.स.

शर्करास्नान—सितया देवदेवेश ! स्नपनं क्रियते मया ।
गृहाण शम्भो ! मे भक्त्या मम शान्तिप्रदो भव ॥ श.स.,पु.स.

पञ्चामृतस्नान—पञ्चामृतं मयानीतं पयोदधिसमन्वितम् ।
घृतं मधु शर्करया स्नानार्थं प्रतिगृह्यताम् ॥ पं.स.

शुद्धोदकस्नान— ॐ शुद्धवालः सर्वशुद्धवालो मणिवालस्त। अश्विनाः श्येतः श्येताक्षोरुणस्ते रुद्राय पशुपतये कर्णा। यामा अवलिप्ता रौद्रा नभोरूपाः पार्जन्याः ॥ शुद्धोदकस्नानं समर्पयामि।

अभिषेक (जलधारा छोड़ें)

ॐ नमस्ते रुद्र मन्यव उतो त इषवे नमः। बाहुभ्यामुत ते नमः ॥१ ॥ या ते रुद्र शिवा तनूरघोराऽपापकाशिनी। तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ॥२ ॥ यामिषुङ्गिरिशन्त हस्ते विभर्ष्यस्तवे। शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषञ्जगत् ॥३ ॥ शिवेन वचसा त्वा गिरिशाच्छा व्वदामसि। यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमना असत् ॥४ ॥ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्। अहींश्च सर्वाञ्जम्भयन् सर्वाश्च यातुधान्योऽधराचीः परासुव ॥५ ॥ असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः। ये चैनꣳ रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाꣳ हेड ईमहे ॥६ ॥ असौ योऽवसर्पति नीलग्रीवो विलोहितः। उतैनङ्गोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः ॥७ ॥ नमोस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे। अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन्नमः ॥८ ॥ प्रमुञ्च धन्वनस्त्वमुभयो रार्त्न्योर्ज्याम्। याश्च ते हस्त इषवः पराता भगवो वप ॥९ ॥ विज्यन्धनुः कपर्दिनो विशल्यो बाणवां २ उत। अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः ॥१० ॥ या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः। तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज ॥११ ॥ परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः। अथो य इषुधिस्तवारे अस्मिन्नि धेहि तम् ॥१२ ॥ अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे। निशीर्य शल्यानाम्मुखा शिवो नः सुमना भव ॥१३ ॥ नमस्त आयुधायानातताय धृष्णवे। उभाभ्यामुत ते नमो बाहुभ्यान्तव धन्वने ॥१४ ॥ मा नो महान्तमुत मा नो अर्भकम्मा न उक्षन्तमुत मा नः उक्षितम्। मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥१५ ॥ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। मा नो व्वीरान्रुद्र भामिनो व्वधीर्हविषमंतः सदमित्त्वा हवामहे ॥१६ ॥ अभिषेकं समर्पयामि।

विजया — ॐ विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ २ उत ।
अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः ॥ वि.स.

वस्त्र-उपवस्त्र— ॐ प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् ।
यश्च ते हस्त इषवः परा ता भगवो वप ॥वस्त्रं उपवस्त्रं स.

यज्ञोपवीत—ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो
वेन आवः। स बुध्न्या उपमा अस्य विष्ठाः
सतश्च योनिमंसतश्च विवः ॥ य.स., आचमनं समर्पयामि।

गन्ध — ॐ नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च ॥
गन्धं समर्पयामि।

अक्षत — ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। अ.स.

पुष्प — ॐ नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कुल्याय च नमः शष्प्याय च फेन्याय च ॥ पुष्पं समर्पयामि।

पुष्पमाला— नानापङ्कजपुष्पैश्च ग्रथितां पल्लवैरपि ।
विल्वपत्रयुतां मालां गृहाण सुमनोहराम् ॥ मा.स.

विल्वपत्र—ॐ नमो विल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च ॥१ ॥ काशीवास निवासो च कालभैरवपूजनम्। प्रयागे माघमासे च विल्वपत्रं शिवार्पणम् ॥२ ॥ दर्शनं विल्वपत्रस्य स्पर्शनं पापनाशनम्। अघोरपापसंहारं विल्वपत्रं शिवार्पणम् ॥३ ॥ त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रिधायुधम्। त्रिजन्मपापसंहारं विल्वपत्रं शिवार्पणम् ॥४ ॥ अखण्डैर्विल्वपत्रैश्च पूजये शिवशङ्करम्। कोटिकन्यामहादानं विल्वपत्रं शिवार्पणम् ॥५ ॥ गृहाण विल्वपत्राणि सपुष्पाणि महेश्वर। सुगन्धीनि भवानीश शिवत्वं कुसुमप्रिय ॥ विल्वपत्राणि समर्पयामि।

तुलसी मंजरी—ॐ शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः ।
मा द्यावापृथिवी अभि शोचीर्मान्तरिक्षं मा वनस्पतीन् ॥
तुलसी-पत्राणि समर्पयामि ।

दूर्वा— ॐ काण्डात् काण्डात्प्ररोहन्ती परुषः परुषस्परि ।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥दूर्वा समर्पयामि ।

शमीपत्र —ॐ अमङ्गलानां शमनीं शमनीं दुष्कृतस्य च ।
दुःस्वप्ननाशिनीं धन्यां प्रपद्येऽहं शमीं शुभाम् ॥ श.समर्पयामि ।

आभूषण— व्रज-माणिक-वैदूर्य-मुक्ता-विद्रुममण्डितम् ।
पुष्पराग-समायुक्तं भूषणं प्रतिगृह्यताम् ॥ आ.स.

सुगन्ध तैल—(अतर)—अहिरिव भोगैः पर्येति बाहुँ ज्याया- हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान् पुमाᳪं सं परिपातु विश्वतः ॥
सु.तैल स.

धूप — ॐ नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो
गिरिशयाय च शिपिविष्टाय च नमो मिढुष्टमाय चेषुधिमते च ॥
धूपमाघ्रापयामि ।

दीप — ॐ नमः आशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च नमः ऊर्म्याय
चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ॥
दीपं दर्शयामि । हस्तप्रक्षालनम्

नैवेद्य — नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय
चापगल्भाय च नमो जघन्याय च बुध्न्याय च ॥ नैवेद्यं निवेदयामि

मध्ये पानीयं—ॐ नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नमः
श्लोक्याय चावसान्याय च नम ऊर्वर्याय च खल्याय च ॥
मध्ये पानीयं समर्पयामि ।

ऋतुफल— फलानि यानि रम्याणि स्थापितानि तवाग्रतः ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ ऋ.स.

अखण्ड फल— कूष्माण्डं मातुलुङ्गञ्च नारिकेलफलानि च ।
रम्याणि पार्वतीकान्त सोमेश प्रतिगृह्यताम् ॥ अ.ऋ.स.

ताम्बूल पूगीफल—ॐ इमा रुद्राय़ तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मती: ।
यथा समसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥
तां.पू.फ.समर्पयामि ।

दक्षिणा— न्यूनातिरिक्तपूजायां सम्पूर्णफलहेतवे ।
दक्षिणां काञ्चनीं देव स्थापयामि तवाग्रत: ॥ द.द्रव्यं.स.

आरती

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥

शिवजी की आरती

जै शिव ओंकारा, हो शिव-पार्वती प्यारा,
हो शिव ऊपर जलधारा ।
ब्रह्मा विष्णु सदाशिव अर्द्धङ्गी धारा ॥१ ॥
ॐ हर हर हर महादेव ॥टेक ॥
एकानन चतुरानन पञ्चानन राजै ।
हंसासन गरुड़ासन वृषवाहन साजै ॥२ ॥ ॐहर. ॥
दोय भुज चार चतुर्भुज दशभुज ते सोहै ।
तीनों रूप निरखता त्रिभुवनजन मोहै ॥३ ॥ ॐ हर. ॥
अक्षमाला वनमाला रुण्डमालाधारी ।
चन्दन मृगमद चन्दा भाले शुभकारी ॥४ ॥ ॐ हर. ॥
श्वेताम्बर पीताम्बर बाघाम्बर अंगे ।
सनकादिक प्रभुतादिक भूतादिक संगे ॥५ ॥ ॐ हर. ॥

करमध्ये कमण्डलु चक्र त्रिशूल धरता ।
जगकर्त्ता जगहर्त्ता जगपालनकर्त्ता ॥६ ॥ ॐ हर. ॥
ब्रह्मा विष्णु सदाशिव जानत अविवेका ।
प्रणव अक्षर ॐ मध्ये ये तीनों एका ॥७ ॥ ॐ हर. ॥
त्रिगुण स्वामी की आरती जो कोई नर गावै ।
भणत शिवानन्द स्वामी वांछित फल पावै ॥८ । ॐ हर. ॥
जै शिव ओंकारा, हो मन भज शिव ओंकारा,
हो मन रट शिव ओंकारा, हो शिव गल रुण्डनमाला,
हो शिव ओढ़त मृगछाला, हो शिव पीते भंगप्याला,
हो शिव रहते मतवाला, हो शिव पार्वती प्यारा,
हो शिव ऊपर जलधारा ॥ ब्रह्माविष्णु सदाशिव अर्द्धङ्गी धारा ॥९ ॥
ॐ हर हर हर महादेव ॥

शिव-स्तुति (पुष्पांजलि)

असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे ।
सुरतरुवरशाखा लेखनीपत्रमूर्वी ॥
लिखति यदि गृहीत्वा शारदा सर्वकालं ।
तदपि तव गुणानामीश पारं न याति ॥१ ॥
वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत् कारणं ।
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्य-शशांक-वह्निनयनं वन्दे मुकुन्दप्रियम् ।
वन्दे भक्तजनाश्रयञ्च वरदं वन्दे शिवं शङ्करम् ॥२ ॥
शान्तं पद्मासनस्थं शशधरमुकुटं पञ्चवक्त्रं त्रिनेत्रं ।
शूलं वज्रं च खड्गं परशुमभयदं दक्षिणाङ्गे वहन्तम् ।

नागंपाशं च घण्टां डमरुकसहितं साङ्कुशं वामभागे ।
नानालङ्कारयुक्तं स्फटिकमणिनिभं पार्वतीशं नमामि ॥३॥
श्मशानेष्वाक्रीड़ा स्मरहर पिशाचाः सहचरा-
श्चिताभस्मालेपः स्त्रगपि नृकरोटीपरिकरः ।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तृणां वरद परमं मंगलमसि ॥४॥
त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥५॥
पापोऽहं पापकर्माहं पापात्मा पापसम्भवः ।
त्राहि मां पार्वतीनाथ सर्वपापहरो भव ॥

"कालहर कण्टकहर दुःखहर दारिद्र्यहर ।"

आगे लिखे मन्त्रों से गाल बजाते हुए वं-वं बोलकर जलहरी का जल नेत्रों पर लगायें ।

निरावलम्बस्य ममावलम्बं विपाटिताशेषविपत्कदम्बम् ।
मदीयपापाचलपातशम्बं प्रवर्ततां वाचि सदैव बम्-बम् ।

पञ्चाङ्ग-प्रणाम, मन में स्मरण, नेत्रों से दर्शन, वाणी से नामोच्चारण करते हुए, दोनो हाथ जोड़कर मस्तक झुकाकर प्रणाम करें ।

प्रदक्षिणा (अर्ध प्रदक्षिणा करें)

यानि कानि च पापानि ज्ञाताज्ञातकृतानि च ।
तानि सर्वाणि नश्यन्ति प्रदक्षिण पदे-पदे ॥

क्षमा-प्रार्थना—प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ।
आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षमस्व परमेश्वर ॥

शिवे भक्तिः शिवे भक्तिः शिवे भक्ति र्भवे भवे ।
अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात् कारुण्य-भावेन रक्ष मां परमेश्वर ! ॥
"अनेन पूजनेन श्रीसाम्बसदाशिवः प्रीयताम्"

पार्थिव-शिव-पूजन

पवित्र होकर संकल्पवाक्य के अन्त में "पार्थिवलिङ्गपूजनं करिष्ये" कहकर सङ्कल्प का जल छोड़ें ।

भूमि-प्रार्थना

ॐ सर्वाधारे धरे देवी त्वद्रूपां मृत्तिकामिमाम् ।
ग्रहिष्यामि प्रसन्ना त्वं लिङ्गार्थं भव सुप्रभे ॥
"ॐ ह्रां पृथिव्यै नमः ।"
उद्धृतासि वराहेण कृष्णेन शतबाहुना ।
मृत्तिके त्वां च गृहणामि प्रजया च धनेन च ॥

"ॐ हराय नमः" यह कहकर मृत्तिका ग्रहण करें ॥ "ॐ बं अमृताय नमः" इससे जल को अभिमन्त्रित करे । "ॐ महेश्वराय नमः" से मूर्ति बनायें । "ॐ शूलपाणये नमः" से मूर्ति-स्थापना करें ।

ॐ अस्य श्रीशिवपञ्चाक्षरमन्त्रस्य वामदेव ऋषिनुष्टुप् छन्दः श्रीसदाशिवो देवता ॐ बीजं, नमः शक्तिः, शिवाय कीलकं मम साम्बसदाशिवप्रीत्यर्थं न्यासे पूजने जपे च विनियोगः ।

अङ्गन्यासः—ॐ वामदेवाय ऋषये नमः शिरसि । ॐअनुष्टुप्छन्दसे नमः मुखे । ॐ सदाशिवदेवतायै नमः हृदि । ॐ बीजाय नमो गुह्ये । ॐ शक्तये नमः पादयोः । ॐ शिवाय कीलकाय नमः सर्वाङ्गे । ॐ नं तत्पुरुषाय नमो हृदये । ॐ मं अघोराय नमः पादयोः । ॐ शिं सद्योजाताय नमो गुह्ये । ॐ वां वामदेवाय नमो मूर्ध्नि । ॐ यं ईशानाय नमो मुखे । ॐ अङ्गुष्ठाभ्यां नमः । ॐ नं तर्जनीभ्यां

स्वाहा। ॐ मं मध्यमाभ्यां वषट्। ॐ शिं अनामिकाभ्यां हुं। ॐ वां कनिष्ठाभ्यां वौषट्। ॐ यं करतलकरपृष्ठाभ्यां फट्। ॐ हृदयाय नमः। ॐ नं शिरसे स्वाहा। ॐ मं शिखायै वषट्। ॐ शिं कवचाय हुं। ॐ वां नेत्रत्रायाय वौषट्। ॐ यं अस्त्राय फट्।

विनियोगः—ॐ अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्म-विष्णु-महेश्वरा ऋषयः ऋग्यजुःसामानिच्छन्दांसि क्रियामयवपुः प्राणाख्या देवता आं बीजं, ह्रीं शक्तिः, क्रौं कीलकं देवप्राणप्रतिष्ठापने विनियोगः॥

प्रतिष्ठाः—ॐ ब्रह्माविष्णु-रुद्रऋषिभ्यो नमः शिरसि। ऋग्यजुः सामच्छन्देभ्यो नमो मुखे। प्राणाख्यदेवतायै नमः हृदि। आं बीजाय नमो गुह्ये। ह्रीं शक्तये नमः पादयोः। क्रौं कीलकाय नमः सर्वाङ्गे। इति अङ्गन्यासं कृत्वा।

ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोऽहं शिवस्य प्राणा इह प्राणाः। आं ह्रीं क्रौं यं रं० शिवस्य जीव इह स्थितः। ॐ आं ह्रीं क्रौं यं रं शिवस्य सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुः श्रोत्रघ्राणजिह्वापाणिपादपायूपस्थानि इहागत्य सुखं चिरं तिष्ठन्ति स्वाहा॥

नीचे लिखे मन्त्र से पुष्प समर्पण करें।

ॐ भूः पुरुषं साम्बसदाशिवमावाहयामि। ॐ भुवः पुरुषं साम्बसदाशिवमावाहयामि। ॐ स्वः पुरुषं साम्बसदाशिवमावाहयामि। इत्यावाहयेत्। ॐ स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम्। तावत्त्वम्प्रीतिभावेन लिङ्गेऽस्मिन् सन्निधिं कुरु॥

पूजन करके नीचे लिखे मन्त्र से विसर्जन करे।

हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक्।
शिवः पशुपतिश्चैव महादेव-विसर्जनम्॥

दुर्गा-पूजन

शुद्धमृत्तिका में यव अथवा गेहूँ रोपण कर उसपर कलश स्थापनविधि से कलश स्थापन करें, आचमन प्राणायाम करके संकल्पवाक्य के अन्त में “ममेह-

जन्मनि दुर्गा-प्रीतिद्वारा सर्वापच्छान्तिपूर्वकं दीर्घायुर्विपुलधनपुत्रपौत्राद्यविच्छिन्नसन्ततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजजयप्रमुखचतुर्विधपुरुषार्थसिद्ध्यर्थं कलशस्थापनं दुर्गापूजनं तत्र निर्विघ्नतासिद्ध्यप्रर्थं स्वस्तिवाचनम्, पुण्याहवाचनम्, गणपत्यादिपूजनं च करिष्ये" कहकर संकल्प करें। पश्चात् नीचे लिखे संकल्प से ब्राह्मण का वरण करें।

ॐ अद्य दुर्गापूजनपूर्वकं मार्कण्डेयपुराणान्तर्गतदुर्गासप्तशतीपाठकरणार्थं एभिर्वरणद्रव्यैः अमुकगोत्रं अमुकशर्माणं ब्राह्मणं त्वामहं वृणे॥ पश्चात् ब्राह्मण "वृतोस्मि" कहें।

पूर्वोक्त विधि से स्वस्तिवाचन, पुण्याहवाचन, गणपतिगौरीपूजन, कलशस्थापन, नवग्रह, पंचलोकपाल, दशदिक्पाल, षोडषमातृका तथा चतुःषष्ठियोगिनी पूजन करके भगवतीवाहन, भैरव, क्षेत्रपाल तथा ध्वजा आदिका पूजन करें।

भैरव-पूजन

ॐ करकलितकपालः कुण्डली दण्डपाणिस्तरुणतिमिरनीलो व्यालयज्ञोपवीती। क्रतुसमयसपर्या विघ्नविच्छेदहेतुर्जयति बटुकनाथः सिद्धिदः साधकानाम्।

देवीध्यान

पूजन करके नीचे लिखी प्रार्थना करें।

ॐ विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेवितां ।
हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं
विभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥

आवाहन— आगच्छ वरदे देवि दैत्यदर्पनिषूदिनि ।
पूजां गृहाण सुमुखि नमस्ते शङ्करप्रिये ॥

आसन— अनेकरत्नसंयुक्तं नानामणिगणान्वितम् ।
कार्तस्वरमयं दिव्यमासनं प्रतिगृह्यताम् ॥

पाद्य — गङ्गादिसर्वतीर्थेभ्यो मया प्रार्थनयाहृतम् ।
तोयमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यताम् ॥ पा.स.

अर्घ्य — गन्धपुष्पाक्षतैर्युक्तमर्घ्यं सम्पादितं मया ।
गृहाण त्वं महादेवि प्रसन्ना भव सर्वदा ॥ अ.स.

आचमन— आचम्यतां त्वया देवि ! भक्तिं मे ह्यचलां कुरु ।
ईप्सितं मे वरं देहि परत्र च पराङ्गतिम् ॥ आ.स.

स्नान — जाह्नवी तोयमानीतं शुभं कर्पूरसंयुतम् ।
स्नापयामि सुरश्रेष्ठे त्वां पुत्रादिफलप्रदाम् ॥ स्ना.स.

पञ्चामृतस्नान— पयो दधि घृतं क्षौद्रं सितया च समन्वितम् ।
पञ्चामृतमनेनाद्य कुरु स्नानं दयानिधे ॥ पं.स.

शुद्धोदकंस्नान—ॐ परमानन्दबोधाब्धिनिमंग्ननिजमूर्तये ।
साङ्गोपाङ्गमिद स्नानं कल्पयाम्यहमीशिते ॥ शु.स्ना.स.

वस्त्र — वस्त्रञ्च सोमदैवत्यं लज्जायास्तु निवारणम् ।
मया निवेदितं भक्त्या गृहाण परमेश्वरि ॥ व.स.

उपवस्त्र — ॐ यामाश्रित्य महामाया जगत्सम्मोहिंनीं सदा ।
तस्यै ते परमेशायै कल्पयाम्युत्तरीयकम् ॥ उपवस्त्रं स.

मधुपर्क— दधिमध्वाज्यसंयुक्तं पात्रयुग्मसमन्वितम् ।
मधुपर्कं गृहाण त्वं वरदा भव शोभने ॥ म.स.

गन्ध — परमानन्दसौभाग्य-परिपूर्णदिगन्तरे ।
गृहाण परमं गन्धं — कृपया परमेश्वरि ॥ ग.स.

कुंकुम — कुङ्कुमं कान्तिदं दिव्यं कामिनीकामसंभवम् ।
कुङ्कुमेनार्चिते देवि प्रसीद परमेश्वरि ॥ कुं.स.

आभूषण— हारकङ्कणकेयूरमेखलाकुण्डलादिभिः ।
रत्नाढ्यं कुण्डलोपेतं भूषणं प्रतिगृह्यताम् ॥ आ.स.

सिन्दूर — सिन्दूरमरुणाभासं जपाकुसुमसन्निभम् ।
पूजितासि मया देवि प्रसीद परमेश्वरि ॥ सिं.स.

कज्जल— चक्षुर्भ्यां कज्जलं रम्यं सुभगे ! शान्तिकारिके ! ।
कर्पूरज्योतिरुत्पन्नं गृहाण परमेश्वरि ॥ क.स.

सौभाग्यद्रव्य— सौभाग्यसूत्रवरदे ! सुवर्णमणिसंयुते ।
कण्ठे बध्नामि देवेशि ! सौभाग्यं देहि मे सदा ॥ सौ.द्र.स.

सुगन्ध तैल (अतर)—चन्दनागरुकर्पूरैः संयुतं कुङ्कुमं तथा ।
कस्तूर्यादिसुगन्धांश्च सर्वाङ्गेषु विलेपनम् ॥ सु.स.

परिमलद्रव्य— हरिद्रारञ्जिते देवि सुखसौभाग्यदायिनि ।
तस्मात्त्वां पूजयाम्यत्र सुखशांतिं प्रयच्छ मे ॥ परि.द्र.स.

अक्षत — रञ्जिताः कुङ्कुमौघेन अक्षताश्चातिशोभनाः ।
ममैषां देवि दानेन प्रसन्ना भव शोभने ॥ अ.स.

पुष्प — मन्दारपारिजातादि-पाटलीकेतकानि च ।
जातींचम्पकपुष्पाणि गृहाणेमानि शोभने ॥ पु.स.

पुष्पमाला—सुरभिपुष्पनिचयैः ग्रथितां शुभमालिकाम् ।
ददामि तव शोभार्थं गृहाण परमेश्वरि ॥ पु.मा.स.

विल्वपत्र—अमृतोद्भवः श्रीवृक्षो महादेवि ! प्रियः सदा ।
विल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरि ॥ विल्वपत्रं स.

धूप — दशाङ्गगुग्गुलं धूपं चन्दनागरुसंयुतम् ।
समर्पितं मया भक्त्या महादेवि ! प्रगृह्यताम् ॥ धूपमाघ्रापयामि ।

दीप — घृतवर्तिसमायुक्तं महातेजो महोज्ज्वलम् ।
दीपं दास्यामि देवेशि सुप्रीता भव सर्वदा ॥

दीपं दर्शयामि । हस्त-प्रक्षालनम् ।

नैवेद्य — अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् ।
नैवेद्यं गृह्यतां देवि भक्तिं मे ह्यचलां कुरु ॥

ऋतुफल— द्राक्षाखर्जूरकदलीपनसाम्रकपित्थकम् ।
नारिकेलेक्षुजम्ब्वादि फलानि प्रतिगृह्यताम् ॥ ऋ.स.

आचमन— कामारिवल्लभे देवि कुर्वाचमनमम्बिके ।
निरन्तरमहं वन्दे चरणौ तव चण्डिके ॥ आ.स.

अखण्ड-ऋतुफल— नारिकेलं च नारङ्गं कलिङ्गं मञ्जिरं तथा ।
उर्वारुकं च देवेशि फलान्येतानि गृह्यताम् ॥ अ.ऋ.स.

ताम्बूलपूगीफल—एलालवङ्गकस्तूरीकर्पूरैः पुष्पवासिताम् ।
वीटिकां मुखवासार्थमर्पयामि सुरेश्वरि ॥ तां.पू.स.

दक्षिणा— पूजाफलसमृद्ध्यर्थं तवाग्रे द्रव्यमीश्वरि ।
स्थापितं तेन मे प्रीता पूर्णान् कुरु मनोरथान् ॥ द.द्र.स.

पुस्तक-पूजन (जल से नहीं करें)

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥

ज्योति-पूजन (पूजन करके प्रार्थना करें)

शुभं भवतु कल्याणमारोग्यं पुष्टिवर्धनम् ।
आत्मतत्त्वप्रबोधाय दीपज्योतिर्नमोऽस्तु ते ॥

कुमारी-पूजन

२ वर्ष से १० वर्ष तक की कन्या का पूजन करके भोजन करायें ।

प्रार्थना — सर्वस्वरूपे ! सर्वेशे सर्वशक्तिस्वरूपिणी ।
पूजां गृहाण कौमारि ! जगन्मातर्नमोऽस्तु ते ॥

आरती — नीराजनं सुमाङ्गल्यं कर्पूरेण समन्वितम् ।
चन्द्रार्कवह्निसदृशं महादेवि ! नमोस्तु ते ॥

दुर्गाजी की आरती

जय अम्बे गौरी ! मैया जय मंगलमूरती ! मैया जय आनन्दकरणी ।
तुमको निशिदिन ध्यावत हरि ब्रह्मा शिवजी ॥ जय अम्बे. ॥ टेर ॥
माँग सिन्दूर विराजत टीको मृगमदको ।
उज्ज्वलसे दोऊ नैना चन्द्रवदननीको ॥ जय अम्बे. ॥
कनकसमानकलेवर रक्ताम्बर राजैं ।
रक्तपुष्प बनमाला कण्ठन पर साजैं ॥ जय अम्बे. ॥
केहरिवाहन राजत खड्ग खप्परधारी ।
सुरनरमुनिजनसेवत तिनके दुःखहारी ॥ जय अम्बे. ॥
कानन कुण्डल शोभित नासाग्रेमोती ।
कोटिकचंद्रदिवाकर राजत सम ज्योति ॥ जय अम्बे. ॥
शुम्भनिशुम्भ विडारे महिषासुरघाती ।
धूम्रविलोचननाशिनि निशिदिन मदमाती ॥ जय अम्बे. ॥
चौंसठ योगिनि गावत नृत्य करत भैरूँ ।
बाजत ताल मृदंगा और बाजत डमरू ॥ जय अम्बे. ॥
भुजा चार अति शोभित खड्गखप्परधारी ।
मनवाञ्छित फल पावत सेवत नरनारी ॥ जय अम्बे. ॥
कञ्चनथाल विराजत अगरकपूरबाती ।
श्रीमालकेतु में राजत कोटिरतन ज्योती ॥ जय अम्बे. ॥
या अम्बेजी की आरती जो कोई नर गावैं ।
भणत शिवानन्द स्वामी सुखसम्पति पावैं ॥ जय अम्बे. ॥

पुष्पांजलि—दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।

दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्र चिता ॥

प्रदक्षिणा— नमस्ते देवि-देवेशि नमस्ते ईप्सितप्रदे ।
नमस्ते जगतां धात्रि नमस्ते भक्तवत्सले ॥

दण्डवत् प्रणाम— नमः सर्वहितार्थायै जगदाधारहेतवे ।
साष्टाङ्गोऽयं प्रणामस्तु प्रयत्नेन मया कृतः ॥

प्रार्थना— पुत्रान् देहि धनं देहि सौभाग्यं देहि मङ्गले ।
अन्यांश्च सर्वकामांश्च देहि देवि नमोस्तु ते ॥

विसर्जन— इमां पूजां मया देवि यथाशक्त्युपपादिताम् ।
रक्षार्थं त्वं समादाय व्रज स्थानमनुत्तमम् ॥

श्रीमहालक्ष्मी-पूजन

आचमन प्राणायाम करके संकल्पवाक्य के अन्त में "स्थिरलक्ष्मीप्राप्त्यर्थं श्रीमहालक्ष्मीप्रीत्यर्थं सर्वारिष्टनिवृत्तिपूर्वकसर्वाभीष्टफलप्राप्त्यर्थं आयुरारोग्यैश्वर्याभिवृद्ध्यर्थं व्यापारे लाभार्थञ्च गणपतिनवग्रहकलशादिपूजनपूर्वकं श्रीमहाकाली-महालक्ष्मी-महासरस्वती-लेखनी-कुबेरादीनां च पूजनं करिष्ये" कहकर जल छोड़ें । पश्चात् गणपति, कलश और नवग्रहादि का पूर्वोक्त विधि से पूजन करके महालक्ष्मी का पूजन करें ।

ध्यान — या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी, गम्भीरावर्तनाभिस्तनभरनमिता शुभवस्त्रोत्तरीया । या लक्ष्मीर्दिव्यरूपैर्मणिगणखचितैः स्नापिता हेमकुम्भैः, सा नित्यं पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥

आवाहन— ॐ सर्वलोकस्य जननीं शूलहस्तां त्रिलोचनाम् ।
सर्वदेवमयीमीशां देवीमावाहयाम्यहम् ॥ आवाहयामि ।

आसन— ॐ तप्तकाञ्चनवर्णाभं मुक्तामणिविराजितम् ।
अमलं कमलं दिव्यमासनं प्रतिगृह्यताम् ॥ आ.स.

पाद्य — ॐ गङ्गादितीर्थसम्भूतं गन्धपुष्पादिभिर्युतम् ।
पाद्यं ददाम्यहं देवि गृहाणाशु नमोऽस्तु ते ॥ पा.स.

अर्घ्य — ॐ अष्टगन्धसमायुक्तं स्वर्णपात्रप्रपूरितम् ।
अर्घ्यं गृहाण मद्दत्तं महालक्ष्मि ! नमोऽस्तु ते ॥ अ.स.

आचमन—ॐ सर्वलोकस्य या शक्तिर्ब्रह्मविष्ण्वादिभिः स्तुता ।
ददाम्याचमनं तस्यै महालक्ष्म्यै मनोहरम् ॥ आ.स.

स्नान— ॐमन्दाकिन्याः समानीतैर्हेमाम्भोरुहवासितैः ।
स्नानं कुरुष्व देवेशि ! सलिलैश्च सुगन्धिभिः ॥ स्ना.स.

दूध, दही, घृत, मधु और शर्करास्नान पिछले पृष्ठों पर देखें ।

पंचामृतस्नान—ॐ पञ्चामृतसमायुक्तं जाह्नवीसलिलं शुभम् ।
गृहाण विश्वजननि ! स्नानार्थं भक्तवत्सले ! ॥ पं.स

शुद्धोदकस्नान—ॐ तोयं तव महादेवि ! कर्पूरागरुवासितम् ।
तीर्थेभ्यः सुसमानीतं स्नानार्थं प्रतिगृह्यताम् ॥ शु.स.

वस्त्र— ॐ दिव्याम्बरं नूतनं हि क्षौमं त्वतिमनोहरम् ।
दीयमानं मया देवि गृहाण जगदम्बिके ॥ व.स.

उपवस्त्र— कञ्चुकीमुपवस्त्रं च नानारत्नैः समन्वितम् ।
गृहाण त्वं मया दत्तं मङ्गले जगदीश्वरि ॥ उ.स.

मधुपर्क— ॐ कापिलं दधि कुन्देन्दुधवलं मधुसंयुतम् ।
स्वार्णपात्रस्थितं देवि ! मधुपर्कं गृहाण भोः ॥ म.स.

आभूषण—ॐ स्वभावसुन्दराङ्गायै नानादेवाश्रये शुभे ।
भूषणानि विचित्राणि कल्पयाम्यमरार्चिते ॥ आ.स.

गन्ध — ॐ श्रीखण्डागरुकर्पूरमृगनाभिसमन्वितम् ।
विलेपनं गृहाणाशु नमोऽस्तु भक्तवत्सले ॥ गं.स.

रक्त चन्दन— ॐ रक्तचन्दनसम्मिश्रं पारिजातसमुद्भवम् ।
मया दत्तं गृहाणाशु चन्दनं गन्धसंयुतम् ॥ र.स.

सिंदूर — ॐ सिन्दूरं रक्तवर्णं च सिन्दूरतिलकप्रिये ।
भक्त्या दत्तं मया देवि सिन्दूरं प्रतिगृह्यताम् ॥ सि.स.

कुंकुम — ॐ कुङ्कुमं कामदं दिव्यं कुङ्कुमं कामरूपिणम् ।
अखण्डकामसौभाग्यं कुङ्कुमं प्रतिगृह्यताम् ॥ कुं.स.

अक्षत — ॐ अक्षतान्निर्मलाञ्छुद्धान् मुक्तमणिसमन्वितान् ।
गृहाणेमान्महादेवि ! देहि मे निर्मलां धियम् ॥ अ.स.

पुष्प — ॐ मन्दारपारिजाताद्याः पाटली केतकी तथा ।
मरुवा मोगरं चैव गृहाणाशु नमो नमः ॥ पु.स.

पुष्पमाला— ॐ पद्मशङ्खजपापुष्पैः शतपत्रैर्विचित्रिताम् ।
पुष्पमालां प्रयच्छामि गृहाण त्वं सुरेश्वरि ! ॥ मा.स.

दूर्वा — विष्णवादिसर्वदेवानां प्रियां सर्वसुशोभनाम् ।
क्षीरसागरसम्भूते दूर्वा स्वीकुरु सर्वदा ॥ दू.स.

अतर — ॐ स्नेहं गृहाण स्नेहेन लोकेश्वरि ! दयानिधे ।
सर्वलोकस्य जननि ! ददामि स्नेहमुत्तमम् ॥ सु.स.

अथाङ्गपूजा

‘ॐ चपलायै नमः’, पादौपूजयामि ॥१॥ ‘ॐ चञ्चलायै नमः’, जानुनि पूजयामि ॥२॥ ‘ॐ कमलायै नमः’, कटिं पूजयामि ॥३॥ ‘ॐ कात्यायिन्यै नमः’, नाभिं पूजयामि ॥४॥ ॐ जगन्मात्रे नमः’, जठरं पूजयामि ॥५॥ ‘ॐ विश्ववल्लभायै नमः’, वक्षस्थलं पूजयामि ॥६॥ ‘ॐ कमलवासिन्यै नमः’, भुजौ पूजयामि ॥७॥ ‘ॐ पद्मकमलायै नमः’, मुखं पूजयामि ॥८॥ ‘ॐ कमलपत्राक्ष्यै नमः’, नेत्रत्रयं पूजयामि ॥९॥ ‘ॐ श्रियै नमः’, शिरः पूजयामि ॥१०॥ इत्यङ्गपूजा ॥

अथ पूर्वादिक्रमेण अष्टदिक्षु अष्टसिद्धीः पूजयेत्

ॐ अणिम्ने नमः ॥१ ॥ ॐ महिम्ने नमः ॥२ ॥ ॐ गरिम्णे नमः ॥३ ॥ ॐ लघिम्ने नमः ॥४ ॥ ॐ प्राप्त्यै नमः ॥५ ॥ ॐ प्राकाम्यै नमः ॥६ ॥ ॐ ईशितायै नमः ॥७ ॥ ॐ वशितायै नमः ॥८ ॥ इति अष्टसिद्धिपूजनम् ।

तथैवं पूर्वादि-क्रमेण अष्टलक्ष्मी-पूजनम्

ॐ आद्यलक्ष्म्यै नमः ॥१ ॥ ॐ विद्यालक्ष्म्यै नमः ॥२ ॥ ॐ सौभाग्यलक्ष्म्यै नमः ॥३ ॥ ॐ अमृतलक्ष्म्यै नमः ॥४ ॥ ॐ कामलक्ष्म्यै नमः ॥५ ॥ ॐ सत्यलक्ष्म्यै नमः ॥६ ॥ ॐ भोगलक्ष्म्यै नमः ॥७ ॥ ॐ योगलक्ष्म्यै नमः ॥८ ॥

इति अष्टलक्ष्मी-पूजनम्

धूप — ॐ वनस्पतिरसोत्पन्नो गन्धाढ्यः सुमनोहरः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ धूपमाघ्रा.

दीप — ॐ कार्पासवर्तिसंयुक्तं घृतयुक्तं मनोहरम् ।
तमोनाशकरं दीपं गृहाण परमेश्वरि ! ॥ दी.द.,ह.प्र.

नैवेद्य — ॐ नैवेद्यं गृह्यतां देवि भक्ष्यभोज्यसमन्वितम् ।
षड्रसैरन्वितं दिव्यं लक्ष्मि ! देवि ! नमोऽस्तु ते ॥
नैवेद्यं निवेदयामि,मध्ये पानीयम् ।

ऋतुफल— ॐ फलेन पलितं सर्वं त्रैलोक्यं सचराचरम् ।
तस्मात् फलप्रदानेन पूर्णाः सन्तु मनोरथाः ॥ ऋ.स.

आचमन— ॐ शीतलं निर्मलं तोयं कर्पूरेण सुवासितम् ।
आचम्यतामिदं देवि ! प्रसीद त्वं महेश्वरि ! ॥ आ.स.

अखण्डऋतुफल— ॐ इदं फलं मयाऽनीतं सरसं च निवेदितम् ।
गृहाण परमेशानि ! प्रसीद प्रणमाम्यहम् ॥ अ.ऋ.स.

ताम्बूल-पुगीफल— एलालवङ्गकर्पूरनागपत्रादिभिर्युतम् ।
पूगीफलेन संयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ ता.पू.स.

दक्षिणा— ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ द.स.

प्रार्थना— ॐ सुरासुरेन्द्रादिकिरीटमौक्तिकैर्युक्तं सदा यत्तवपादपङ्कजम् । परावरं पातु वरं सुमङ्गलं नमामि भक्त्या तव कामसिद्धये ॥ भवानि ! त्वं महालक्ष्मीः सर्वकामप्रदायिनी । सुपूजिता प्रसन्ना स्यान्महालक्ष्मि ! नमोऽस्तु ते ॥ नमस्ते सर्वदेवानां वरदासि हरिप्रिये ! या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्चनात् ॥

दवातमें मौली बाँधकर तथा स्वस्तिक बनाकर नीचे लिखा ध्यान करें—

ॐ मषि त्वं लेखनीयुक्ता चित्रगुप्ताशयस्थिता । सदक्षराणां पत्रे च लेख्यं कुरु सदा मम । या माया प्रकृतिः शक्तिश्चण्डमुण्डविमर्दिनी । सा पूज्या सर्वदेवैश्च ह्यस्माकं वरदा भव ॥ ॐ श्रीमहाकाल्यै नमः ॥

पूजन करके नीचे लिखी प्रार्थना करें ।

या कालिका रोगहरा सुवन्द्या वैश्यैः समस्तैर्व्यवहारदक्षैः । जनैर्जनानां भयहारिणी च सा देवमाता मयि सौख्यदात्री ॥

लेखनी-पूजन

कलमपर मौली बाँधकर नीचे लिखा ध्यान करके पूजन करें ।

ॐ शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं, वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम् हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां, वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥ लेखिन्यै नमः ॥

पूजन करके नीचे लिखी प्रार्थना करें ।

प्रार्थना — कृष्णानने द्विजिह्वे च चित्रगुप्तकरस्थिते ।
सदक्षराणां पत्रे च लेख्यं कुरु सदा मम ॥

बही, बसना आदिमें केसर या रोलीसे स्वस्तिक बनाकर नीचे लिखा ध्यान करके पूजन करें ।

ॐ या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता, या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना। या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता, सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥ ॐ वीणापुस्तकधारिण्यै नमः ॥

पूजन करके नीचे लिखी प्रार्थना करें।

प्रार्थना— ॐ शारदा शारदाम्भोजवदना वदनाम्बुजे ।
सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात् ॥

कुबेर-पूजन

संदूक आदिमें सिन्दूरसे स्वस्तिक बनाकर आवाहन करके पूजन करें।

आवाहयामि देव ! त्वमिहायाहि कृपां कुरु ।
कोशं वर्द्धय नित्यं त्वं परिरक्ष सुरेश्वर ! ॥

प्रार्थना— धनाध्यक्षाय देवाय नरयानोपवेशिने ।
नमस्ते राजराजाय कुबेराय महात्मने ॥

तुला तथा मान-पूजन

सिन्दूरसे स्वस्तिक बनाकर पूजन करें। पश्चात् नीचे लिखी प्रार्थना करें।

नमस्ते सर्वदेवानां शक्तित्वे सत्यमाश्रिता ।
साक्षिभूता जगद्धात्री निर्मिता विश्वयोनिना ॥

दीपावली-पूजन

दीपक जलाकर पात्रमें रख पूजन करके नीचे लिखी प्रार्थना करें।

भो दीप त्वं ब्रह्मरूप अन्धकारनिवारक ।
इमां मया कृतां पूजां गृहणँस्तेजः प्रवर्धय ॥
ॐ दीपेभ्यो नमः ॥

आरती— ॐ चक्षुर्दं सर्वलोकानां तिमिरस्य निवारणम् ।
आर्तिक्यं कल्पितं भक्त्या गृहाण परमेश्वरि ॥

श्रीलक्ष्मीजीकी आरती

जय लक्ष्मी माता, मैया जय लक्ष्मी माता ।
तुमको निशि दिन सेवत हर विष्णु धाता ॥ टेर ॥
ब्रह्माणी रुद्राणी कमला तूही है जगमाता ।
सूर्य चन्द्रमा ध्यावत नारद ऋषि गाता ॥ जय. ॥
दुर्गारूप निरञ्जनि सुख सम्पति दाता ।
जो कोई तुमको ध्यावत ऋधि सिधि धन पाता ॥ जय. ॥
तूही है पाताल वसन्ती तूही है शुभदाता ।
कर्मप्रभाव-प्रकाशक जगनिधिसे त्राता ॥ जय. ॥
जिस घर तेरो बासो वाहिमें गुण आता ।
कर न सकै सोई करले मन नहिं धड़काता ॥ जय. ॥
तुम बिन यज्ञ न होवे वस्त्र न होय राता ।
खान पानको विभवै तुम बिन कुण दाता ॥ जय. ॥
शुभ गुण सुन्दरयुक्ता क्षीरनिधी जाता ।
रत्न चतुर्दश तोकूं कोई भी नहिं पाता ॥ जय. ॥
यह आरती लक्ष्मीजीकी कोई नर गाता ।
उर आनन्द अति उमँगे पाप उतर जाता ॥ जय. ॥
स्थिर चर जगत बचावै कर्म प्रेरलाता ।
राम प्रताप मैयाकी शुभ दृष्टि चाहता ॥ जय लक्ष्मी माता ॥

श्रीसत्यनारायणाष्टक

आदिदेवं जगत्कारणं श्रीधरं, लोकनाथं विभुं व्यापकं शङ्करम् । सर्वभक्तेष्टदं मुक्तिदं माधवं, सत्यनारायणं विष्णुमीशम्भजे ॥१ ॥ सर्वदा लोककल्याणपारायणं, देवगोविप्ररक्षार्थसद्विग्रहम् । दीनहीनात्मभक्ताश्रयं सुन्दरं, सत्य. ॥२ ॥

दक्षिणे यस्य गङ्गा शुभा शोभते, राजते सा रमा यस्य वामे सदा। यः प्रसन्नाननो भाति भव्यश्च तं, सत्य. ॥३ ॥सङ्कटे सङ्गरे यं जनाः सर्वदा, स्वात्मभीनाशनाय स्मरेत् पीडितः। पूर्णकृत्यो भवेद् यत्प्रसादाच्च तं, सत्य. ॥४ ॥वाञ्छितं दुर्लभं यो ददाति प्रभुः, साधवे स्वात्मभक्ताय भक्तिप्रियः। सर्वभूताश्रयं तं हि विश्वम्भरं, सत्य. ॥५ ॥ ब्राह्मणः साधु-वैश्यश्च तुङ्गध्वजो, येऽभवन् विश्रुता यस्य भक्त्याऽमराः। लीलया यस्य विश्वं ततं तं विभुं, सत्य. ॥६ ॥ येन चाब्रह्मवालतृणं धार्यते, सृज्यते पाल्यते सर्वमेतज्जगत्। भक्तभावप्रियं श्रीदयासागरं, सत्य. ॥७ ॥ सर्वकामप्रदं सर्वदा सत्प्रियं, वन्दितं देववृन्दैर्मुनीन्द्रार्चितम् पुत्रपौत्रादिसर्वेष्टदं शाश्वतं, सत्य. ॥८ ॥ अष्टकं सत्यदेवस्य भक्त्या नरः भावयुक्तो मुदा यस्त्रिसन्ध्यं पठेत् ॥ तस्य नश्यन्ति पापानि तेनाग्निना, इन्धनानीव शुष्काणि सर्वाणि वै ॥९ ॥

श्रीसत्यनारायणाष्टकं सम्पूर्णम्।

श्रीमहालक्ष्म्यष्टक

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते। शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ॥१ ॥ नमस्ते गरुडारूढे कोलासुरभयङ्करि। सर्वपापहरे देवि महालक्ष्मि० ॥२ ॥ सर्वज्ञे सर्ववरदे सर्वदुष्टभयंङ्करि। सर्वदुःखहरे देवि महालक्ष्मि० ॥३ ॥ सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनी। मन्त्रमूर्ते सदा देवि महा लक्ष्मि० ॥४ ॥ आद्यन्तरहिते देवि आद्यशक्ति महेश्वरि। योगजे योगसम्भूते महालक्ष्मि० ॥५ ॥ स्थूलसूक्ष्ममहारौद्रे महाशक्ति महोदरे। महापापहरे देवि महालक्ष्मि० ॥६ ॥ पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि। परमेशि जगन्मातर्महालक्ष्मि० ॥७ ॥ श्वेताम्बरधरे देवि नानालङ्कारभाषिते। जगत्स्थिते जगन्मातर्महालक्ष्मि० ॥८ ॥ महालक्ष्म्यष्टकस्तोत्रं यः पठेद्भक्तिमान्नरः। सर्वसिद्धिमवाप्नोति राज्यमाप्नोति सर्वदा ॥९ ॥ एककालं पठेन्नित्यं महापापविनाशनम्। द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितः ॥१० ॥ त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम्। माहलक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ॥११ ॥

इन्द्रकृतं श्रीमहालक्ष्म्यष्टकस्तोत्रं सम्पूर्णम्।

कनकधारा-स्तोत्र

अङ्गं हरेः पुलकभूषणमाश्रयन्ती, भृङ्गाङ्गनेव मुकुलाभरणं तमालम्। अङ्गीकृताखिलविभूतिरपाङ्गलीला, माङ्गल्यदाऽस्तु मम मङ्गलदेवतायाः ॥१॥ मुग्धा मुहुर्विदधती वदने मुरारेः, प्रेमत्रपाप्रणिहितानि गतागतानि। मालादृशोर्मधुकरीव महोत्पले या, सा मे श्रियं दिशतु सागरसम्भवायाः ॥२॥ विश्वामरेन्द्र-पदविभ्रमदानदक्ष, मानन्दहेतुरधिकं मुरविद्विषोऽपि। ईषन्निषीदतु मयि क्षणमीक्षणार्धमिन्दीवरोदरसहोदरमिन्दिरायाः ॥३॥ आमीलिताक्षमधिगम्य मुदा मुकुन्द, मानन्दकन्दमनिमेषमनङ्गतन्त्रम्। आकेकरस्थितकनीनिकपक्ष्मनेत्रं, भूत्यै भवेन्मम भुजङ्गशयाङ्गनायाः ॥४॥ बाह्वन्तरे मधुजितः श्रितकौस्तुभे या, हारावलीव हरिनीलमयी विभाति। कामप्रदा भगवतोऽपि कटाक्षमाला, कल्याणमावहतु मे कमलालयायाः ॥५॥ कालाम्बुदालिललितोरसि कैटभारे, -र्धाराधरे स्फुरति या तडिदङ्गनेव। मातुः समस्तजगतां महनीयमूर्तिर्भद्राणि मे दिशतु भार्गवनन्दनायाः ॥६॥ प्राप्तं पदं प्रथमतः किल यत् प्रभावा, न्माङ्गल्यभाजि मधुमाथिनि मन्मथेन। मय्यापतेत्तदिह मन्थरमीक्षणार्धं, मन्दालसञ्च मकरालयकन्यकायाः ॥७॥ दद्याद्दयानुपवनो द्रविणाम्बुधारा, -मस्मिन्नकिञ्चनविहङ्गशिशौ विषण्णे। दुष्कर्मधर्ममपनीय चिराय दूरं, नारायणप्रणयिनीनयनाम्बुवाहः ॥८॥ इष्टातिशिष्टमतयोऽपि यथा दयार्द्र, दृष्ट्या त्रिविष्टपपदं सुलभं लभन्ते। दृष्टिः प्रहृष्ट-कमलोदर-दीप्तिरिष्टां, पुष्टिं कृपीष्ट मम पुष्करविष्टरायाः ॥९॥ गीर्देवतेति गरुडध्वजभामिनीति, शाकम्भरीति शशिशेखर-वल्लभेति। सृष्टिस्थिति-प्रलयसिद्धिषु संस्थितायै, तस्यै नमस्त्रिभुवनैकगुरोस्तरुण्यै ॥१०॥ श्रुत्यै नमस्त्रिभुवनैक-फलप्रसूत्यै, रत्यै नमोस्तु रमणीयगुणाश्रयायै। शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै, पुष्ट्यै नमोऽस्तु पुरुषोत्तम-वल्लभायै ॥११॥ नमोऽस्तु नालीकनिभेक्षणायै, नमोऽस्तु दुग्धोदधि-जन्मभूत्यै नमोऽस्तु सोमामृतसोदरायै, नमोऽस्तु नारायण-वल्लभायै ॥१२॥ सम्पत् कराणि सकलेन्द्रिय-नन्दनानि,

पूज्या माताजी रुक्मणी देवी सिंघानिया

निर्वाण— श्रावण शुक्ल १०, सम्वत् २०४२

(सन् २५-८-८५)

साम्राज्य-दानविभवानि सरोरुहाक्षि। त्वद्वन्दनानि दुरिताहरणोद्यतानि, मामेव मातरनिशं कलयन्तु नान्यत् ।।१३ ।। यत्कटाक्षसमुपासनाविधिः सेवकस्य सकलार्थसम्पदः। सन्तनोति वचनाङ्गमानसैस्त्वां मुरारिहृदयेश्वरीं भजे ।।१४ ।। सरसिज-निलये सरोजहस्ते धवलतरांशुक-गन्धमाल्यशोभे। भगवति हरिवल्लभे मनोज्ञे त्रिभुवन-भूतिकरि प्रसीद मह्यम् ।।१५ ।। दिग्घस्तिभिः कनककुम्भमुखावसृष्ट, -स्वर्वाहिनीविमलचारुजलप्लुताङ्गीम्। प्रातर्नमामि जगतां जननीमशेष, लोकाधिराजगृहिणीममृताब्धिपुत्रीम् ।।१६ ।। कमले कमलाक्षवल्लभे, त्वं करुणापूरतरङ्गितैरपाङ्गैः। अवलोकय मामकिञ्चनानां, प्रथमं पात्रमकृत्रिमं दयायाः ।।१७ ।। स्तुवन्ति ये स्तुतिभिरमुभिरन्वहं, त्रयीमयीं त्रिभुवनमातरं रमाम्। गुणाधिका गुरुधन-भोगभागिनी, भवन्ति ते भुवि बुधभाविताशया ।।१८ ।।

श्रीभगवत्पाद-शङ्करविरचितं कनकधारास्तोत्रं सम्पूर्णम्।

श्री भगवतीस्तोत्रम्

जय भगवति देवि नमो वरदे, जय पापविनाशिनि बहुफलदे ।
जय शुम्भनिशुंभकपालधरे, प्रणमामि तु देवि नरार्तिहरे ।।१ ।।
जय चन्द्रदिवाकरनेत्रधरे, जय पावकभूषितवक्त्रवरे ।
जय भैरवदेहनिलीनपरे, जय अन्धकदैत्यविशोषकरे ।।२ ।।
जय महिषविमर्दिनि शूलकरे, जय लोकसमस्तकपापहरे ।
जय देवि पितामहविष्णुनते, जय भास्करशक्रशिरोऽवनते ।।३ ।।
जय षण्मुखसायुधईशनुते, जय सागरगामिनि शम्भुनुते ।
जय दुःखदरिद्र विनाशकरे, जय पुत्रकलत्रविवृद्धिकरे ।।४ ।।
जय देवि समस्त शरीरधरे, जय नाक विदर्शिनि दुःख हरे ।
जय व्याधि विनाशिनि मोक्षकरे, जय वांछित दायिनि सिद्धिवरे।।५ ।।
एतद् व्यासकृतं स्तोत्रं यः पठेन्नियतः शुचिः ।
गृहे वा शुद्ध भावेन प्रीता भगवती सदा ।।६ ।।

राम-पूजनविधिः

प्रातः काल स्नान, सन्ध्या आदि नित्यकर्मसे निवृत्त होकर रामपूजनार्थ पवित्र आसन पर बैठकर आचमन, प्राणायाम कर 'ॐ अपवित्रः पवित्रो वा' इससे अपने शरीरका और पूजनसामग्रीका पवित्र जलसे सम्प्रोक्षण करें। पश्चात् अपने दाहिने हाथमें अक्षत, पुष्प तथा जल लेकर इस प्रकार सङ्कल्प करें—

"ॐ विष्णुर्विष्णुर्विष्णुः आर्यावर्तैकदेशान्तर्गते अमुकक्षेत्रे अमुकनगरे (अमुकग्रामे) विक्रमशकेसम्वत्सरे बौद्धावतारे अमुकनामसंवत्सरे अमुकायने अमुकर्तौ महामाङ्गल्यप्रदमासोत्तमेमासे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते सूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथाराशिस्थानस्थितेषु सत्सु एवं ग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकशर्माऽहम् (अमुकवर्माऽहम्, अमुकगुप्तोऽहम्) ममात्मनः श्रुति-स्मृति-पुराणोक्तफलप्राप्त्यर्थं धर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं यथोपचारैः श्रीरामपूजनमहं करिष्ये।"

ध्यान

नीलाम्बुजश्यामलकोमलाङ्गं सीतासमारोपितवामभागम् ।
पाणौ महासायकचारुचापं नमामि रामं रघुवंशनाथम् ॥

आवाहन

ॐ सहस्त्रशीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात् ।
स भूमिꣳ सर्व्वतस्पृत्त्वाऽत्त्यतिष्ठद्दशाङ्गुलम् ॥
आवाहयामि विश्वेशं जानकीवल्लभं प्रभुम् ।
कौसल्यातनयं विष्णुं श्रीरामं प्रकृतेः परम् ॥

श्री भगवते रामाय नमः आवाहनं समर्पयामि ।

ॐ पुरुषऽएवेदꣳ सर्व्वं यद् भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥
राजाधिराज राजेन्द्र रामचन्द्र महीपते ।
स्वर्णसिंहासनं दिव्यं गृहाण करुणाकर ॥
श्रीभगवते रामाय नमः आसनं समर्पयामि ।

पाद्य

ॐ एतावानस्य महिमाऽतो ज्यायांश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥
त्रैलोक्यपावनानन्त सूर्यवंशमहामणे ।
पाद्यं गृहाण देवेश राम-राजीवलोचन ॥

श्रीभगवते रामाय नमः पादयोः पाद्यं समर्पयामि ।

अर्घ्य

रजत अथवा ताम्रके अर्घ्यपात्रमें गङ्गाजल, चन्दन, अक्षत, पुष्प, तुलसीदल लेकर भगवान् रामको अर्घ्य-प्रदान करें—

ॐ त्रिपादूर्ध्वं ऽउदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्क्रामत्साशनाशने ऽअभि ॥
परिपूर्ण परानन्द कौशल्यानन्दवर्द्धन ।
गृहाणार्घ्यं मया दत्तं सर्वलोकैकरक्षक ॥

श्रीभगवते रामाय नमः अर्घ्यं समर्पयामि ।

आचमन

ॐ ततो विराडजायत विराजो ऽअधिपूरुषः ।
स जातो ऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥

सत्यप्रिय सत्यसन्ध रावणान्तक प्रभो ।
गृहाणाचमनं देव सर्वलौकैकरक्षक ॥

श्रीमधुपर्क भगवते रामाय नमः आचमनीयं जलं समर्पयामि ।

ॐ यन्मधुनो मधव्यं परमꣳ रूपमन्नाद्यम्। तेनाहं मधुनोमधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽ-न्नादोऽसानि ॥

जानकीहृदयानन्द प्रजावत्सलतत्पर ।
मधुपर्कं गृहाणेमं मर्यादापालक प्रभो ॥

श्रीभगवते रामाय नमः मधुपर्कं समर्पयामि ।

स्नान

ॐ तस्माद्यज्ञात्सर्व्वहुतः सम्भृतं पृषदाज्यम् ।
पशूँस्ताँश्चक्क्रे व्वायव्यानारण्या ग्राम्याश्च ये ॥

गङ्गासरस्वतीरेवापयोष्णीनर्मदाजलैः ।
स्नापितोऽसि मया देव तथा शान्तिं कुरुष्व मे ॥

श्रीभगवते रामाय नमः स्नानार्थं जलं समर्पयामि ।

पञ्चामृतस्नान

ॐ पञ्चनद्यः सरस्वतीमपि यन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥

पञ्चामृतं मयानीतं पयो दधि घृतं मधु ।
शर्करा च मया दत्तं गृहाण परमेश्वर ॥

श्रीभगवते रामाय नमः पञ्चामृतस्नानं समर्पयामि ।

शुद्धोदकस्नान

ॐ शुद्धवालः सर्व्वशुद्धवालो मणिवालस्त ऽआश्विनाः ।
श्येतः श्येताक्षोऽरुणस्ते कर्ण्णा यामा ऽअवलिप्ता रौद्रा नभोरूपाः पार्ज्जन्याः ॥

ब्रह्माण्डोदरमध्यस्थैस्तीर्थैश्च रघुनन्दन ।
स्नापयिष्याम्यहं भक्त्या प्रसीद परमेश्वर ॥

श्रीभगवते रामाय नमः शुद्धोदकस्नानं समर्पयामि ।

सुगन्धिद्रव्यस्नान

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमाऽमृतात् ॥

मनोहरं गन्धद्रव्यं रुचिरागुरुवासितम् ।
देहशोभकरं नित्यं गृहाण परमेश्वर ॥

श्रीभगवते रामाय नमः सुगन्धिद्रव्यस्नानं समर्पयामि ।

पश्चात् 'ॐ सहस्त्रशीर्षा पुरुषः०' इस पुरुषसूक्त (३१।१-१६) से तथा 'ॐ इदं विष्णुर्व्विचक्रमे०', 'ॐ व्विष्णोः कर्म्माणि०', 'ॐ तद्विष्णोः परमं पदम्०', 'ॐ तद्विप्रासो व्विपन्यवः०' इन मन्त्रोंसे भगवान् रामका अभिषेक करें।

वस्त्र

ॐ तस्माद्यज्ञात् सर्व्वहुत ऽऋचः सामानि जज्ञिरे ।
छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥

तप्तकाञ्चनवर्णाभं पट्टवस्त्रमिदं प्रभो ।
गृहाण त्वं जगन्नाथ रामचन्द्र महाद्युते ॥

श्री भगवते रामाय नमः वस्त्रं समर्पयामि ।

यज्ञोपवीत

ॐ तस्मादश्वा ऽअजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता ऽअजावयः ॥
रामचन्द्र महाराज श्रीधरानन्द राघव ।
ब्रह्मसूत्रं सोत्तरीयं गृहाण रघुनन्दन ॥

श्रीभगवते रामाय नमः यज्ञोपवीतं समर्पयामि । यज्ञोपवीतान्ते आचमनीयं जलं समर्पयामि ।

चन्दन

ॐ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः ।
तेन देवा ऽअयजन्त साध्या ऋषयश्च ये ॥
कुङ्कुमागरुकस्तूरीकर्पूरयुतचन्दनम् ।
भक्त्या समर्पये तुभ्यं संगृहाण रघूत्तम ॥

श्रीभगवते रामाय नमः चन्दनं समर्पयामि ।

पुष्पमाला

ॐ यत्पुरुषं व्यदधुः कतिधाव्यकल्पयन् ।
मुखं किमस्यासीत् किं बाहू किमूरू पादा ऽउच्येते ॥
प्रत्यग्रनीलकमलैः पुष्पमाल्यैश्च राघव ।
भक्त्या त्वां भूषयिष्यामि गृहाण रघुनायक ॥

श्रीभगवते रामाय नमः पुष्पमालां समर्पयामि ।

तुलसीदल

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पाꣳसुरे स्वाहा ॥

तुलसीं हेमरूपां च रत्नरूपां च मञ्जरीम् ।
भवमोक्षप्रदां तुभ्यमर्पयामि हरिप्रियाम् ॥

श्रीभगवते रामाय नमः तुलसीदलानि समर्पयामि ।

अङ्गपूजन

ॐ रामचन्द्राय नमः पादौ पूजयामि ॥१॥ ॐ राजीवलोचनाय नमः गुल्फौ पूजयामि ॥२॥ ॐ रावणान्तकाय नमः जानुनी पूजयामि ॥३॥ ॐ वाचस्पतये नमः ऊरू पूजयामि ॥४॥ ॐ विश्वरूपाय नमः जङ्घे पूजयामि ॥५॥ ॐ लक्ष्मणाग्रजाय नमः कटिं पूजयामि ॥६॥ ॐ विश्वमूर्तये नमः मेढ्रं पूजयामि ॥७॥ ॐ विश्वामित्रप्रियाय नमः नाभिं पूजयामि ॥८॥ ॐ परमात्मने नमः हृदयं पूजयामि ॥९॥ ॐ श्रीकण्ठाय नमः कण्ठं पूजयामि ॥१०॥ ॐ सर्वास्त्रधारिणे नमः बाहू पूजयामि ॥११॥ ॐ रघूद्वहाय नमः मुखं पूजयामि ॥१२॥ ॐ पद्मनाभाय नमः जिह्वां पूजयामि ॥१३॥ ॐ दामोदराय नमः दन्तान् पूजयामि ॥१४॥ ॐ सीतापतये नमः ललाटं पूजयामि ॥१५॥ ॐ ज्ञानगम्याय नमः शिरः पूजयामि ॥१६॥ ॐ सर्वात्मने नमः सर्वाङ्गं पूजयामि ॥१७॥

धूप

ॐ ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्याᳬ शूद्रो ऽअजायत ॥

वनस्पतिरसोद्भूतो गन्धाढ्यः सुमनोहरः ।
रामचन्द्र देवरूप धूपोऽयं प्रतिगृह्यताम् ॥

श्रीभगवते रामाय नमः धूपमाघ्रापयामि ।

दीप

ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्य्यो ऽअजायत ।
श्रोत्राद् वायुश्च प्राणश्च मुखादग्निरजायत ॥

चन्द्र-सूर्य-बह्निनेत्र सर्वज्योतिप्रवर्त्तक ।
गृहाण दीपकं दिव्यं त्रैलोक्यतिमिरापहम् ॥

श्रीभगवते रामाय नमः दीपं दर्शयामि । हस्तप्रक्षालनम् ।

नैवेद्य

ॐ नाभ्या ऽआसीदन्तरिक्षᳪं शीर्ष्णो द्यौः समवर्त्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ ऽअकल्पयन् ॥
इदं दिव्यान्नममृतं रसैः षड्भिः समन्वितम् ।
रामचन्द्रेण देवेश नैवेद्यं प्रतिगृह्यताम् ॥

श्रीभगवते रामाय नमः नैवेद्यं निवेदयामि । नैवेद्यान्ते आचमनीयं जलं समर्पयामि ।

करोद्वर्त्तन (चन्दन)

ॐ अᳪं शुनाते ऽअᳪं शुः पृच्यतां परुषा परुः ।
गन्धस्ते सोममवतु मदाय रसो ऽअच्युतः ॥
करोद्वर्त्तनकं देव सुगन्धैः परिवासितैः ।
गृहीत्वा मे वरं देहि परत्र च परां गतिम् ॥

श्रीभगवते रामाय नमः करोद्वर्त्तनार्थे गन्धं समर्पयामि । हस्तप्रक्षालनार्थं जलं समर्पयामि ।

ऋतुफल

ॐ याः फलिनीर्य्या ऽअफला ऽअपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वᳪं हसः ॥
नानाविधानि दिव्यानि मधुराणि फलानि वै ।
भक्त्यार्पितानि सर्वाणि गृहाण परमेश्वर ॥

श्रीभगवते रामाय नमः ऋतुफलानि समर्पयामि ।

ताम्बूल (पूगीफल-एला-लवङ्गसहित)

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
व्वसन्तोऽस्यासीदाज्यं ग्रीष्म ऽइध्मः शरद्धविः ॥

नागवल्लीदलैर्युक्तं पूगीफलसमन्वितम् ।
ताम्बूलं गृह्यतां देव कर्पूरैलादिसंयुतम् ॥

श्रीभगवते रामाय नमः ताम्बूलं समर्पयामि ।

दक्षिणा

ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक ऽआसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा व्विधेम ॥

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्ति प्रयच्छ मे ॥

श्रीभगवते रामाय नमः दक्षिणाद्रव्यं समर्पयामि ।

आरती

ॐ इदꣳ हविः प्रजननं मे ऽअस्तु दशवीरꣳ सर्व्वगणꣳ स्वस्तये। आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि। अग्निः प्रजां बहुलां मे करोत्त्वन्नं पयो रेतो ऽअस्मासु धत्त ॥१॥

ॐ आ रात्रि पार्थिवꣳ रजः पितुरप्रायि धामभिः। दिवः सदाꣳसि बृहती व्वि तिष्ठस ऽआ त्वेषं व्वर्त्तते तमः ॥२॥

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥

श्रीभगवते रामाय नमः आरार्तिक्यं समर्पयामि ।

प्रदक्षिणा

ॐ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना ऽअबध्नन्पुरुषं पशुम् ॥

यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि तानि प्रणश्यन्ति प्रदक्षिणपदे पदे ॥

श्रीभगवते रामाय नमः प्रदक्षिणां समर्पयामि ।

मन्त्रपुष्पाञ्जलि

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्व्वे साध्याः सन्ति देवाः ॥

ॐ राजाधिराजाय प्रसह्य साहिने। नमो वयं वैश्रवणाय कुर्महे। स मे कामान् कामकामाय मह्यम्। कामेश्वरो वैश्रवणो ददातु। कुबेराय वैश्रवणाय महाराजाय नमः ॥

ॐ स्वस्ति। साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात्, सार्वभौमः सार्वायुष आन्तादापरार्धात्, पृथिव्यै समुद्रपर्यन्ताया एकराडिति ॥

तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे। आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासदः इति ॥ श्रीभगवते रामाय नमः मन्त्रपुष्पाञ्जलिं समर्पयामि ।

ॐ विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात्। सम्बाहुब्भ्यां धमति सम्पतत्त्रैर्द्यावाभूमी जनयन्देवऽ एकः ॥

राम-गायत्री

ॐ दाशरथाय विद्महे सीतावल्लभाय धीमहि ।
तन्नो रामः प्रचोदयात् ॥

प्रणाम

नीलाम्बुजश्यामलकोमलाङ्गं सीतासमारोपितवामभागम् ।
पाणौ महासायकचारुचापं नमामि रामं रघुवंशनाथम् ॥

क्षमा-प्रार्थना

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥१॥

आवाहनं न जानामि न जानामि तवार्चनम् ।
पूजां चैव न जानामि क्षमस्व परमेश्वर ॥२॥

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर ॥३॥

अनायासेन मरणं विना दैन्येन जीवनम् ।
देहि मे कृपया राम त्वयि भक्तिमचञ्चलाम् ॥४॥

मत्समो नास्ति पापिष्ठः त्वत्समो नास्ति पापहा ।
इति मत्वा दयासिन्धो यथेच्छसि तथा कुरु ॥५॥

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव ॥६॥

अनन्तर निम्नाङ्कित वाक्य कह कर यह पूजनकर्म भगवान् रामको समर्पित करें—

अनेन यथाशक्तिकृतेन पूजनेन भगवान् श्रीरामः प्रीयतां न मम ।

पश्चात् भगवान् रामका स्मरण करें—

प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ।
यस्य स्मृत्या च नामोक्त्या तपोयज्ञकियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

ॐ विष्णवे नमः ॥ ॐ विष्णवे नमः ॥ ॐ विष्णवे नमः ॥

हनुमत्पूजनविधिः

प्रातःकाल स्नान, सन्ध्या आदि नित्यकर्म से निवृत्त होकर हनुमत्पूजनार्थ पवित्र आसन पर बैठकर आचमन, प्राणायाम कर 'ॐ अपवित्रः पवित्रो वा०' इससे अपने शरीर का और पूजन सामग्री का पवित्र जल से सम्प्रोक्षण करें। पश्चात् अपने दाहिने हाथ में अक्षत, पुष्प तथा जल लेकर इस प्रकार सङ्कल्प करें—

"ॐ विष्णुर्विष्णुर्विष्णुः० आर्यावर्तैकदेशान्तर्गत् अमुकक्षेत्रे अमुक नगरे (अमुकग्रामे) विक्रमशके सम्वत्सरे बौद्धावतारे अमुकनामसंवत्सरे अमुकायने अमुकऋतौ महामाङ्गल्यप्रदमासोत्तमेमासे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयामे अमुककरणे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथाराशिस्थानस्थितेषु सत्सु एवं ग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगौत्रः अमुकशर्माऽहम् (अमुकवर्माऽहम्, अमुकगुप्तोऽहम्) ममात्मनः श्रुति-स्मृति-पुराणोक्तफलप्राप्त्यर्थं धर्मार्थकाममोक्षचतुर्विधपुरुषार्थसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं यथोपचारैः श्रीहनुमत्पूजनमहं करिष्ये।"

ध्यान

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥

आवाहन

ॐ नमस्ते रुद्र मन्यव ऽउतो त ऽइषवे नमः ।
बाहुभ्यामुतते नमः ॥

श्रीरामचरणाम्भोज-युगलस्थिरमानसम् ।
आवाहयामि देवेश हनुमंस्त्वां समर्चितम् ॥

श्रीहनुमते नमः आवाहनं समर्पयामि। आवाहनार्थे पुष्पाणि समर्पयामि।

आसन

ॐ या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ॥

नवरत्नमयं दिव्यं चतुरस्त्रमनुत्तमम् ।
सौवर्णमानसं तुभ्यं कल्पये कपिनायक ॥

श्रीहनुमते नमः आसनं समर्पयामि । आसनार्थे अक्षतान् समर्पयामि ।

पाद्य

ॐ यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवाङ्गिरित्रताङ्कुरु मा हिंꣳ सीः पुरुषं जगत् ॥

सुवर्णकलशानीतं जलं सुष्ठ सुवासितम् ।
पादयोः पाद्यमञ्जनीनन्दन प्रतिगृह्यताम् ॥

श्रीहनुमते नमः पाद्यं समर्पयामि ।

अर्घ्य

ॐ शिवेन व्वचसा त्त्वा गिरिशाच्छा व्वदामसि ।
यथा नः सर्व्वमिज्जगदयक्ष्मꣳ सुमना ऽअसत् ॥

कुसुमाक्षतसम्मिश्रं दिव्यार्घ्यं रत्नसंयुतम् ।
दास्यामि प्रेमतस्तुभ्यं गृह्यतां कपिपुङ्गव ॥

श्रीहनुमते नमः अर्घ्यं समर्पयामि ।

आचमन

ॐ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहींश्च सर्व्वाञ्जम्भयन्त्सर्व्वाश्च यातु धान्योऽधराचीः परासुव ॥

हृद्यं सुगन्धसम्पन्नं शुद्धं शुद्धाम्बुसत्कृतम् ।
वीरध्वज दयासिन्धो गृहाणाचमनादिकम् ॥

श्रीहनुमते नमः आचमनीयं जलं समर्पयामि ।

स्नान

ॐ असौ यस्ताम्रो ऽअरुण ऽउत बब्भ्रुः सुमङ्गलः ।
ये चैनꣳ -रुद्द्राऽअभितो दिक्षु श्रिताः सहस्त्रशोऽवैषाꣳ हेड ऽईमहे ॥

मन्दाकिन्याः समानीतैर्हैमाम्भोरुहवासितैः ।
स्नानं कुरुष्व देवेश सलिलैश्च सुगन्धिभिः ॥

श्रीहनुमते नमः स्नानीयं जलं समर्पयामि ।

पञ्चामृतस्नान

ॐ पञ्च नद्यः सरस्वतीमभ्भयन्ति सस्त्रोतसः ।
सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥

पञ्चामृतं मयाऽऽनीतं पयोदधि घृतं मधु ।
शर्करा च समायुक्तं स्नानार्थं प्रतिगृह्यताम् ॥

श्रीहनुमते नमः पञ्चामृतस्नानं समर्पयामि । पञ्चामृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि । आचमनीयं जलं समर्पयामि ।

शुद्धोदकस्नान

ॐ शुद्धवालः सर्व्वशुद्धवालो मणिवालस्त ऽआश्विनाः ।
श्येतः श्येताक्षोऽरुणस्ते रुद्द्राय पशुपतये कर्ण्णा यामा ऽ
अवलिप्ता रौद्द्रा नभोरूपाः पार्ज्जन्याः ॥

सुवर्णकलशानीतैर्गङ्गादिसरिदुद्भवैः ।
शुद्धोदकैः कपीश त्वां संस्नापयामि मारुते ॥

श्रीहनुमते नमः शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि ।

मेखला

ग्रथितां नवभी रत्नैर्मेखलां त्रिगुणीकृताम् ।
मौञ्जीं मुञ्जामयीं पीतां गृहाण पवनात्मज ॥

श्रीहनुमते नमः मेखलां समर्पयामि ।

कौपीन (लँगोट)

कौशेयं कपिशार्दूल हरिद्राक्तं सुशोभनम् ।
कटिसूत्रं गृहाणेदं कौपीनं मङ्गलास्पदम् ॥

श्रीहनुमते नमः कौपीनं समर्पयामि ।

वस्त्र

ॐ असो योऽवसर्प्पति नीलग्ग्रीवो व्विलोहितः ।
उतैनं गोपा ऽअदृश्रन्नदृश्रन्नुदहार्य्यः स दृष्टो मृडयाति नः ॥

पीताम्बरसुवर्णाभं दिव्यतेजः समन्वितम् ।
अङ्गसंरक्षणं देव गृह्यतां कपिनायक ॥

श्रीहनुमते नमः वस्त्रं समर्पयामि । वस्त्रान्ते आचमनीयं जलं समर्पयामि ।

यज्ञोपवीत

ॐ नमोस्तु नीलग्ग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये ऽअस्य सत्त्वानोऽहन्तेभ्योऽकरं नमः ॥

ब्रह्मणा निर्मित्तं सूत्रं विष्णुग्रन्थिसमन्वितम् ।
दिव्यं यज्ञोपवीतं ते ददामि पवनात्मज ॥

श्रीहनुमते नमः यज्ञोपवीतं समर्पयामि । यज्ञोपवीतान्ते आचमनीयं जलं समर्पयामि ।

गन्ध (चन्दन)

ॐ प्रमुञ्च धन्वनस्त्वमुभयोरात्त्न्योर्ज्याम् ।
याश्च ते हस्त ऽइषवः पराता भगवो व्वप ॥

दिव्यकर्पूरसंयुक्तं मृगनाभिसमन्वितम् ।
संकुङ्कुमं पीतगन्धं ललाटे धारय प्रभो ॥

श्रीहनुमते नमः गन्धं समर्पयामि ।

अक्षत

ॐअक्षन्नमीमदन्त ह्यवप्रिया ऽअधूषत ।
अस्तोषत स्वभानवो व्विप्रा नविष्ठया मती योजान्विन्द्रते हरी ॥

अक्षतान्निर्मलान् दिव्यान् कुङ्कुमाक्तान् सुशोभनान् ।
गृहाणेमान् वायुपुत्र प्रसीद परमेश्वर ॥

श्रीहनुमते नमः अक्षतान् समर्पयामि ।

पुष्पमाला

ॐ व्विज्यं धनुः कपर्द्दिनो व्विशल्ल्यो बाणवाँ२ ऽउत ।
अनेशन्नस्य या ऽइषव ऽआभुरस्य निषङ्गधिः ॥

प्रत्यग्रनीलकमलैः पुष्पमाल्यैश्च वानर ।
भक्त्या त्वां भूषयिष्यामि गृहाण कपिपुङ्गव ॥

श्रीहनुमते मनः पुष्पमालां समर्पयामि ।

तुलसीदल

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पꣳ सुरे स्वाहा ॥

श्रीहनुमते नमः तुलसीदलानि समर्पयामि ।

अबीर (गुलाल)

ॐ अहिरिव भोगैः पर्य्येति बाहुँ ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो व्विश्वा व्वयुनानि व्विद्वान् पुमान् पुमाꣳ सं परि पातु व्विश्वतः ॥

अवीरं च गुलालं च हरिद्रादिसमन्वितम् ।
नानापरिमलं द्रव्यं गृहाण परमेश्वर ॥

श्रीहनुमते नमः गुलालं समर्पयामि ।

सिन्दूर

ॐ सिन्धोरिव प्राद्ध्वने शूघनासो
व्वतप्रमियः पतयन्ति यह्वाः ।
घृतस्य धारा ऽअरुषो न व्वाजी
काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥
दिव्यनागसमुद्भुतं सर्वमङ्गलकारकम् ।
तैलेनाभ्यङ्गयिष्यामि सिन्दूरं गृह्यतां प्रभो ॥

श्रीहनुमते नमः सिन्दूरं समर्पयामि ।

सुगन्धिद्रव्य

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमाऽमृतात् ॥
मनोहरं गन्धद्रव्यं रुचिरागरुवासितम् ।
देहशोभाकरं नित्यं गृहाण कपिपुङ्गव ॥

श्रीहनुमते नमः सुगन्धिद्रव्यं समर्पयामि ।

अङ्गपूजन

हनुमते नमः पादौ पूजयामि ॥१॥ सुग्रीवसखाय नमः गुल्फौ पूजयामि ॥२॥ अङ्गदमित्राय नमः जंघे पूजयामि ॥३॥ रामदासाय नमः ऊरू पूजयामि ॥४॥ अक्षघ्नाय नमः कटिं पूजयामि ॥५॥ लङ्कादहनाय नमः बालं पूजयामि ॥६॥ [illegible] नमः नाभिं पूजयामि ॥७॥ सागरोल्लङ्घनाय नमः

मध्ये पूजयामि ॥८ ॥ लङ्कामर्दनाय नमः केशावलिं पूजयामि ॥९ ॥ सञ्जीवनीहर्त्रे नमः स्तनौ पूजयामि ॥१० ॥ सौमित्रप्राणदाय नमः वक्षः पूजयामि ॥११ ॥ कुण्ठितदशकण्ठाय नमः कण्ठं पूजयामि ॥१२ ॥ रामाभिषेककारिणे नमः हस्तौ पूजयामि ॥१३ ॥ मन्त्ररचितरामायणाय नमः वक्त्रं पूजयामि ॥१४ ॥ प्रसन्नवदनाय नमः वदनं पूजयामि ॥१५ ॥ पिङ्गनेत्राय नमः नेत्रे पूजयामि ॥१६ ॥ श्रुतिपारगाय नमः श्रुतिं पूजयामि ॥१७ ॥ ऊर्ध्वपुण्ड्रधारिणे नमः कपोलं पूजयामि ॥१८ ॥ मणिकण्ठमालिने नमः शिरः पूजयामि ॥१९ ॥ सर्वाभीष्टप्रदाय नमः सर्वाङ्गं पूजयामि ॥२० ॥

धूप

ॐ या ते हेतिर्म्मीढुष्टम हस्ते बभूव ते धनुः ।
तयास्मान् व्विश्वतस्त्वमयक्ष्मया परिभुज ॥
दिव्यं सुगुग्गुलं साज्यं दशाङ्गं ससुगन्धकम् ।
गृहाण मारुते धूपं सुप्रियं घ्राणतर्पणम् ॥

श्रीहनुमते नमः धूपमाघ्रापयामि ।

दीप

ॐ परि ते धन्वनो हेतिरस्मान् व्वृणक्तु विश्वतः ।
अथो य ऽइषुधिस्तवारे ऽअस्मन्निधेहि तम् ॥
घृतपूरितमुज्ज्वालं वर्तिकर्पूरसंयुतम् ।
दीपं गृहाणं देवेश अञ्जन्यानन्दवर्धक ॥

श्रीहनुमते नमः दीपं दर्शयामि । हस्तप्रक्षालनम् ।

नैवेद्य

ॐ अवतत्त्य धनुष्ट्वᳬं सहस्राक्ष शतेषुधे ।
निशीर्य्य शल्यानां मुखा शिवो नः सुमना भव ॥

शाल्यन्नं मोदकं दिव्यं शाकापूपसमन्वितम् ।
साज्यं दधि पायसं च नैवेद्यं गृह्यतां प्रभो ॥

श्रीहनुमते नमः नैवेद्यं निवेदयामि । नैवेद्यान्ते आचमनीयं जलं समर्पयामि ।

ऋतुफल

ॐ याः फलिनीर्य्या ऽअफला ऽअपुष्पा यश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳ ह़सः ॥

फलं नानाविधं स्वादु पक्वं शुद्धं सुशोभितम् ।
समर्पितं मया देव गृह्यतां कपिनायक ॥

श्रीहनुमते नमः ऋतुफलानि समर्पयामि ।

ताम्बूल (पूगीफल-एला-लवङ्गसहित)

ॐ उत स्मास्य द्द्रवतस्तुरण्यतः पर्ण्णन्नवे रनुवातिप्रगर्द्धिनः ।
श्येनस्येव द्ध्रजतो अङ्कसं परि दधिक्राब्णः सहोर्ज्जा तरित्रतः स्वाहा ॥

ताम्बूलं भगवद्भोग्यं मुखसौगन्धिकृत्परम् ।
पावनेय महाबाहो ताम्बूलं गृह्यतां कपे ॥

श्रीहनुमते नमः ताम्बूलं समर्पयामि ।

दक्षिणा

ॐ हिरण्यगर्ब्भः समवर्त्तताग्ग्रे भूतस्य जातः पतिरेक ऽआसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा व्विधेम ॥

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसो ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

श्रीहनुमते नमः दक्षिणां समर्पयामि ।

आरती

ॐ इदꣳ हविः प्रजननं मे ऽअस्तु दशवीरꣳ सर्वगणꣳ स्वस्तये। आत्मसनि प्प्रजासनि पशुसनि लोकसन्यभयसनि। अग्निः प्प्रजां बहुलां मे करोत्वन्नं पयो रेतोऽअस्मासु धत्त ॥१॥

ॐ आ रात्रि पार्थिवꣳ रजः पितुरप्प्रायि धामभिः ।
दिवः सदाꣳसि बृहती व्वि तिष्ठसऽआ त्त्वेषं व्वर्तते तमः ॥२॥
कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदा बसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥

प्रदक्षिणा

ॐ मा नो महान्तमुत मा नो ऽअर्ब्भकं मा न ऽउक्षन्तमुत मा न ऽउक्षितम् ।
मा नो व्वधीः पितरं मोत मातरं मा नःप्रियांस्तन्वो रुद्द्र प्रिरीरिषः ॥
यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि तानि प्रणश्यन्ति प्रदक्षिण पदे पदे ॥

श्रीहनुमते नमः प्रदक्षिणां समर्पयामि।

मन्त्रपुष्पाञ्जलि

ॐ मा नस्तोके तनये मा न ऽआयुषि मा नो गोषु मा नो ऽअश्वेषु रीरिषः। मा नो व्वीरानुद्द्र भामिनो व्वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्प्रथमान्या सन्। ते ह नाकं महिमानः सचन्त यत्पूर्व्वे साध्याः सन्ति देवाः ॥

ॐ राजाधिराजाय प्रसह्य साहिने। नमो वयं वैश्रवणाय कुर्महे। स मे कामान् कामकामाय मह्यम्। कामेश्वरो वैश्रवणो ददातु। कुबेराय वैश्रवणाय महाराजाय नमः।

ॐ स्वस्ति । साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात्, सार्वभौमः सार्वायुष आन्तादापरार्धात्, पृथिव्यै समुद्रपर्यन्ताया एकराडिति ।

तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे । आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ॥

ॐ व्विश्वतश्चक्षुरुत व्विश्वतो मुखो व्विश्वतो बाहुरुत व्विश्वतस्पात् । सम्बाहुभ्यां धमति सम्पतत्त्रैर्द्यावाभूमीजनयन्देव ऽएकः ॥

श्रीहनुमते नमः मन्त्रपुष्पाञ्जलिं समर्पयामि ।

हनुमद्-गायत्री

ॐ रामदूताय विद्महे वायुपुत्राय धीमहि ।
तन्नो हनुमत्प्रचोदयात् ॥

क्षमा-प्रार्थना

मन्त्रहीनं क्रियाहीनं भक्तिहीनं कपीश्वर ।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥१ ॥
आवाहनं न जानामि न जानामि तवार्चनम् ।
पूजां चैव न जानामि क्षमस्व परमेश्वर ॥२ ॥
त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देव देव ॥३ ॥

अनया पुजया श्रीहनुमद्देवता प्रीयतां न मम ।

ॐ विष्णवे नमः । ॐ विष्णवे नमः । ॐ विष्णवे नमः ॥

महामृत्युञ्जय मन्त्र-जप-विधि

जब किसी व्यक्ति को महाव्याधि या शारीरिक महाअरिष्ट उपस्थित हो जाय तब महामृत्युञ्जय का जप स्वयं करे या किसी योग्य ब्राह्मण द्वारा करावे। जप आरम्भ के पूर्व पार्थिव शिव या नर्मदेश्वर शिव की या अन्य शिवलिंग की पूजा करके यथा सम्भव महामृत्युञ्जय मन्त्र का जप करना उत्तम है।

आचमन-प्राणायाम करके शान्तिपाठ, गणेश स्मरण करके संकल्प करे—

संकल्प

ॐ अद्येत्यादि अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकगोत्रोत्पन्नोऽमुकशर्माहं मम (अथवा अमुकगोत्रोत्पन्नस्य यजमानस्य) शरीरे समुत्पन्नाखिलारिष्टनिवृत्तये श्रीमृत्युञ्जयप्रसादाद्दीर्घायुष्यसततारोग्यतावाप्तये अमुक संख्य परिमितं श्रीमहामृत्युञ्जय मन्त्र जपं करिष्ये।

विनियोगः

ॐ अस्य श्री महामृत्युञ्जय मंत्रस्य वशिष्ठ ऋषिः श्री मृत्युञ्जय रुद्रो देवता। अनुष्टप्छन्दः। ह्रौं बीजं जूं शक्तिः। सः कीलकं मृत्युञ्जय प्रीत्यर्थं जपे विनियोगः॥

ऋष्यादिन्यासः

ॐ वशिष्ठर्षये नमः शिरसि। ॐ अनुष्टप्छन्दसे नमो मुखे। ॐ श्री महामृत्युञ्जय रुद्र देवतायै नमो हृदये। ॐ ह्रौं बीजाय नमो गुह्ये। ॐ जूं शक्तये नमः पादयोः। ॐ सः कीलकाय नमः सर्वाङ्गेषु॥

कराङ्गन्यासः

ॐ त्र्यम्बकं अङ्गुष्ठाभ्यां नमः। ॐ यजामहे तर्जनीभ्यां नमः। ॐ सुगन्धिम्पुष्टि वर्द्धनं मध्यमाभ्यां नमः। ॐ उर्व्वारुकमिव बन्धनात् अनामिकाभ्यां नमः। ॐ मृत्योर्मुक्षीय कनिष्ठिकाभ्यां नमः। ॐ मामृतात् करतलकरपृष्ठाभ्यां नमः॥

हृदयादिन्यासः

ॐ त्र्यम्बकं हृदयाय नमः। यजामहे शिरसे स्वाहा। सुगन्धि पुष्टिवर्धनं शिखायै वषट्। उर्वारुकमिव बन्धनात् कवचाय हुम्। मृत्योर्मुक्षीय नेत्रत्रयाय वौषट्। मामृतात् अस्त्राय फट्॥

पदन्यासः

त्र्यम्बकं शिरसि। यजामहे भ्रुवोः। सुगन्धि नेत्रयोः। पुष्टिवर्द्धनं मुखे। ऊर्वारुकं गण्डयोः। इव हृदये। बन्धनात् जठरे। मृत्योः लिङ्गे। मुक्षीय उर्वोः। मा जान्वोः। अमृतात् पादयोः।

इस प्रकार न्यास कर मूल मन्त्र से दोनों हाथों द्वारा मस्तक से पैर तक सभी अंगों का स्पर्शकर मृत्युञ्जय भगवान शिव का ध्यान करें।

ध्यान

हस्ताम्भोजयुगस्थकुम्भयुगलादुद्धृत्य तोयं शिरः ।
सिञ्चन्तं करयोर्युगेन दधतं स्वांके सकुम्भौ करौ ॥
अक्षस्त्रग्मृगहस्तमम्बुजगतं मूर्द्धस्थचन्द्रंस्त्रवत् ।
पीयूषोत्रतनुं भजे सगिरिजं मृत्युञ्जयं त्र्यम्बकम् ॥१॥
चन्द्रोद्भासितमूर्द्धजं सुरपतिं पीयूषपात्रं दधत् ।
हस्ताब्जेन दधत्सुदिव्यममलं हास्यास्यपंकेरुहम् ॥
सूर्येन्द्वग्निविलोचनं करतलैः पाशाक्षसूत्रांकुशाम् ।
भोजं विभ्रतमक्षयं पशुपतिं मृत्युञ्जयं संस्मरेत् ॥२॥

इस प्रकार ध्यान कर मानसोपचार से भगवान् मृत्युञ्जयी शिव की पूजा करें।

मानस पूजा

ॐ लं पृथिव्यात्मकं गन्धं समर्पयामि। ॐ हं आकाशात्मकं पुष्पं समर्पयामि। ॐ यं वाय्वात्मकं धूपं समर्पयामि। ॐ रं तेजसात्मकं दीपं सम-

र्पयामि। ॐ यं अमृतात्मकं नैवेद्यं समर्पयामि। ॐ सं सर्वात्मकं मन्त्रपुष्पं समर्पयामि।

महामृत्युञ्जय मूल मन्त्र

ॐ ह्रौं जूं सः ॐ भूर्भुवः स्वः ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्। ऊर्व्वारुकमिवबन्धनान्मृत्योर्मु क्षीयमामृतात्। ॐ स्वः भुवः भू ॐ सः जूं ह्रौं ॐ॥

दाहिने हाथ में गोमुखी में माला रखकर जप-मुद्रा द्वारा जप करें।

प्रार्थना— गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर॥

जप करने के उपरान्त निम्न वाक्य का उच्चारण करें—

अनेन महामृत्युञ्जयजपाख्येन कर्मणा श्री महामृत्युञ्जयः प्रीयतां न मम।

यह वाक्य बोलकर जप अर्पण करें व मूर्ति की तरफ जल छोड़ें। जप की साङ्गता सिद्धि के लिए जप का दशांश हवन, हवन का दशांश तर्पण, तर्पण का दशांश मार्जन. तद्दशांश ब्राह्मण भोजन करावें। इसका पुरश्चरण सवा लक्ष है।

कामना भेद से महामृत्युञ्जय जप हवन-विधान

विल्व के फल, विल्वपत्र, खजूर और अन्य यज्ञफल नारियल आदि का घी के साथ हवन और ब्राह्मण भोजन कराने से समस्त कामनाओं की सिद्धि होती है।

आयु की कामना से केवल घी द्वारा एक लाख, दश हजार, एक हजार या एक सौ आठ आहुति से हवन करे। आरोग्य की कामना से घी मिले आक के काष्ठ से या गाय के घी मिली खीर से उपर्युक्त संख्या में हवन करें। रोगों की शान्ति के लिये घी मिले पलाश काष्ठ से हवन करे।

ज्वर के उपद्रव में बिना छेदवाले आम के पत्ते को दूध में भिगो कर हवन करें। गुरिच के टुकड़े अथवा खैर काष्ठ को दूध या घी के साथ हवन करने से प्रमेह की बीमारी शान्त होती है। गूलर के काष्ठ, आँवला, चावल या काले तिल का घी

के साथ हवन करने से गुल्म रोग नष्ट होता है। शमी काष्ठ के द्वारा हवन करने से अतिसार की बीमारी मिटती है। पलाश काष्ठ के हवन करने से आँख की बीमारी मिट जाती है। धत्तूर काष्ठ द्वारा हवन करने से मृगी रोग शान्त होता है। विजौरा या गुरिच काष्ठ द्वारा हवन करने से पीलिया रोग दूर होता है। तीन प्रकार के मधुर घी, गुड़, मधु से होम करने पर राजयक्ष्मा शान्त होता है। तीन मधुर युक्त मसूर में घी मिलाकर हवन करने से कुष्ठ रोग मिटता है। श्वेत सरसों के तेल के साथ हवन करने से भी कुष्ठ रोग मिटता है। दूध मिली दूर्वा, रक्त चन्दन या पीपल काष्ठ से हवन करे तो रक्तस्राव शान्त होता है। तीन प्रकार का मधुर तीन फल इनमें मधु, दूध और घी मिलाकर हवन करने से भी सभी रोग शान्त होते हैं। आयुर्वेद शास्त्र में जिस रोग की जो औषध है, उस औषध को घी में भिंगो कर हवन करने से भी रोग शान्त हो जाता है। विल्व के काष्ठ, फल या पत्र में घी मिलाकर हवन करने से अतुल लक्ष्मी प्राप्त होती है। गीले वस्त्र पहन कर बरगद के काष्ठ से हवन करने से वर्षा होती है।

नाभि मात्र जल में खड़े होकर शिवजी का ध्यान करते हुए मृत्युञ्जय मन्त्र के जप करने से सद्यः वर्षा होती है।

आयुवृद्धि के लिए जन्मोत्सव (वर्षगाँठ)

जन्म के दिन स्त्री-पुत्र सहित यजमान ब्राह्म मुहूर्त में उठकर तिल और तण्डुलचूर्ण मिले गंगाजल से स्नान कर सन्ध्या आदि नित्यक्रिया करे। इसके बाद पूजासामग्री एकत्र करके नवीन वस्त्र और आभूषण धारण कर शुभ आसन पर पूर्वमुख बैठकर अपने से दाहिने भाग में पत्नी और पत्नी के दाहिने पुत्र को विराजमान करें। आचमन-प्राणायाम आदि करके स्वस्तिवाचन एवं गणेश स्मरण करे। अपने दाहिने हाथ में अक्षत, पुष्प, जल, द्रव्य लेकर संकल्प करें—

अमुकगोत्रोऽमुक शर्मा (वर्मा गुप्तो वा) हं अस्य बालकस्य (मम वा) दीर्घायुः श्रीकीर्तितेजोवृद्धिद्वारा श्रीजगदीश्वरप्रीतये च अद्य दिने वर्धापनाख्यं कर्म करिष्ये। आदौ निर्विघ्नतासिद्धये गणपत्यादिदेवानां पूजनं [illegible] करिष्ये।

संकल्प करके गणेश पूजा, वरुण, कलश पूजा, नवग्रह पूजा, षोडश मातृका पूजा, रक्षाबन्धन आदि कर लें।

इसके बाद पाटे पर वस्त्र बिछाकर २१ स्थान पर चावल के आसन बनाकर निम्नलिखित २१ देवताओं का बायें हाथ में अक्षत लेकर निम्ननाम मन्त्र से दाहिने हाथ द्वारा छोड़ते हुए आवाहन करें—

ॐ गणपतये नमः गणपतिमावाहयामि ॥१॥ ॐ कुलदेव्यै नमः कुलदेवीमा० ॥२॥ ॐ प्रजापतये नमः प्रजापतिमा० ॥३॥ ॐविष्णवे नमः विष्णुमा० ॥४॥ ॐ महेश्वराय नमः महेश्वरमा० ॥५॥ ॐ इष्टदेवताय नमः इष्टदेवतामा० ॥६॥ ॐ सूर्याय नमः सूर्यमा० ॥७॥ ॐ जन्मर्क्षाय नमः जन्मर्क्षमा० ॥८॥ षष्ठीदेव्यै नमः षष्ठीदेवीमा० ॥९॥ मार्कण्डेयाय नमः मार्कण्डेयमा० ॥१०॥ ॐ अश्वत्थाम्नै नमः अश्वत्थामामा० ॥११॥ ॐ बलये नमः बलिमा० ॥१२॥ ॐ व्यासाय नमः व्यासमा० ॥१३॥ ॐ विभीषणाय नमः विभीषण मा० ॥१४॥ ॐ कृपाचार्याय नमः कृपाचार्यमावा० ॥१५॥ ॐ परशुरामाय नमः परशुराममा० ॥१६॥ ॐ वलभद्राय नमः वलभद्रमा० ॥१७॥ ॐ हनुमते नमः हनुमन्तमा० ॥१८॥ ॐ स्थानदेवतायै नमः स्थानदेवतामा० ॥१९॥ ॐ वास्तुदेवतायै नमः वास्तुदेवतामा० ॥२०॥ ॐ श्री क्षेत्रपालाय नमः क्षेत्रपालमा० ॥२१॥

ॐ आवो देवा स ईमहं यामं प्रयत्यध्वरे। आशो देवा स आशिषो यज्ञियाहो हवामहे ॐ भूर्भुवः स्वः श्रीगणपत्याद्यावाहित देवताभ्यो नमः आवाहनं समर्पयामि। —इतना वाक्य बोलकर चावल छोड़ें।

पश्चात् गन्ध अक्षत्, पुष्प, धूप, दीप, नैवेद्य आदि उपचारों से आवाहितेभ्यः सर्वेभ्यो देवेभ्यो नमः इस वाक्य द्वारा पूजा करके प्रार्थना करें।

प्रार्थना— जय देवी जगन्मातर्जगदानन्दकारिणि ।
प्रसीद मम कल्याणि महाषष्ठि नमोऽस्तुते ॥
मार्कण्डेयाय मुनये नमस्ते महदायुषे ।
चिरञ्जीवी यथा त्वं हि भविष्यामि तथा मुने ॥

रूपवान् वित्तवानायुः श्रिया युक्तं च मां कुरु ।
कुरुष्व मुनिशार्दूल तथा मां चिरजीविनम् ॥

त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ।
ब्रह्मविष्णुशिवैः सार्धं रक्षां कुर्वन्तु तानि मे ॥

अश्वत्थामा वलिर्व्यासो हनुमांश्च विभीषणः ।
कृपः परशुरामश्च सप्तैते चिरजीविनः ॥

सप्तैतांश्च स्मरेन्नित्यं मार्कण्डेयमथाष्टमम् ।
जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः ॥

प्रीयन्तां देवता सर्वाः पूजां गृहणन्तु ता मम ।
प्रयच्छन्त्वायुरारोग्यं यशः सौखञ्च सर्वदा ॥

मन्त्रन्यूनं क्रियान्यूनं द्रव्यन्यूनं महामुने ।
यदर्चितं मया देव परिपूर्णं तदस्तु मे ॥

ब्राह्मण भोजन कराने के बाद दक्षिणा देवें और बड़ों को प्रणाम कर आशीर्वाद प्राप्त करें ।

सन्तान गोपाल मन्त्र प्रयोग

पुत्र प्राप्ति के लिए भगवान कृष्ण की आराधना एवं चार लाख मन्त्र जाप किया जाता है ।

मूल मन्त्र— ॐ क्लीं श्रीं ह्रीं जीं ॐ भूर्भुवः स्वः ॐ देवकीसुत गोविन्द वासुदेव जगत्पते । देहि मे तनयं कृष्ण त्वामहं शरणं गतः । ॐ स्वः भुवः भूः ॐ जीं ह्रीं श्रीं क्लीं ॐ ।

जप-विधि

चम्मच में जल लेकर विनियोग मंत्र बोलकर जल छोड़ें—

ॐ अस्य श्रीसबीजसन्तानगोपालमन्त्रस्य नारायणऋषिरनुष्टुप् छन्दः पुत्रप्रदश्रीगोपालोदेवता क्लीं बीजम् ह्रीं शक्तिः जीं कीलकम् श्रीसन्तानगोपालप्रसाद सिद्धिपूर्वकं मम (यजमानस्य वा) चिरायुः पुत्रप्राप्तर्थं जपे विनियोगः।

न्यास

ॐ नारायण ऋषये नमः शिरसि। ॐ अनुष्टुप्छन्दसे नमः मुखे। ॐ पुत्रप्रदश्रीगोपालदेवतायै नमः हृदि। ॐ क्लीं बीजाय नमः गुह्ये। ॐ श्रीं ह्रीं शक्तये नमः पादयोः। ॐ जीं क्रीलकाय नमः सर्वाङ्गे। इति ऋष्यादि न्यासः। ॐ देवकीसुतगोविन्द अगुष्ठाभ्यां नमः। ॐ वासुदेवजगत्पते तर्जनीभ्यां नमः। देहि मे तनयं कृष्ण मध्यमाभ्यां नमः। त्वामहं शरणंगतः अनामिकाभ्यां नमः। ॐ देवकीसुतगोविन्द वासुदेवजगत्पते कनिष्ठिकाभ्यां नमः। देहि मे तनयं कृष्ण त्वामहं शरणंगतः करतलकरपृष्ठाभ्यां नमः। इति करन्यासः। ॐ देवकीसुतगोविन्द हृदयाय नमः। वासुदेवजगत्पते शिरसे स्वाहा। देहि मे तनयं कृष्ण शिखायै वषट्। त्वामहं शरणं गतः कवचाय हुं। देवकीसुतगोविन्द वासुदेवजगत्पते देहि मे तनयं कृष्ण त्वामहं शरणं गतः। अस्त्राय फट्।

इस प्रकार पञ्चाङ्ग-न्यास करके निम्नलिखित ध्यान करें।

ध्यान

ॐ वैकुण्ठतेजसा दीप्तमर्जुनेन समन्वितम्।
समर्पयन्तं विप्राय नष्टानानीय बालकान् ॥

ध्यान करके मानसोपचार से पूजन के बाद मूलमन्त्र का जप करें।

इसके साथही गर्भिणी में गर्भ के चिह्न जब स्पष्ट हो जायें अर्थात् जब गर्भ २-३ मास का हो जाये तब शुभ मुहूर्त में गणेश आदि देवताओं का पूजन कर

वटवृक्ष के नवीन अङ्कुरों तथा पल्लवों एवं कुश की जड़ को जल के साथ पीस कर छान कर वह जल लगभग १ तोला गर्भिणी को पति द्वारा दाहिने नाक से पिलाना चाहिये। पुत्र की कामना से—

ॐ हिरण्य गर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम्॥ (यजु. १३/४)

मंत्र का उच्चारण करना चाहिये। इस प्रकार नारी के मन में पुत्र भाव प्रवाहित होकर गर्भ के मांस पिण्ड में पुरुष चिह्न उत्पन्न होते हैं।

मङ्गलगीतम्

श्रितकमलाकुचमण्डल धृतकुण्डल ए। कलितललितवनमाल जय जय देव हरे ॥१॥
दिनमणिमण्डलमण्डन भवखंण्डन ए। मुनिजनमानसहंस जय जय देव हरे ॥२॥
कालियविषधरगञ्जन जनरञ्जन ए। यदुकुलनलिनदिनेश जय जय देव हरे ॥३॥
मधुमुरनरकविनाशन गरुडासन ए। सुरकुलकेलिनिदान जय जय देव हरे ॥४॥
अमलकमलदललोचन भवमोचन ए। त्रिभुवनभवननिधान जय जय देव हरे ॥५॥
जनकसुताकृतभूषण जितदूषण ए। समरशमितदशकण्ठ जय जय देव हरे ॥६॥
अभिनवजलधरसुन्दर धृतमन्दर ए। श्रीमुखचन्द्रचकोर जय जय देव हरे ॥७॥
तव चरणे प्रणता वयमिति भावय ए। कुरु कुशलं प्रणतेषु जय जय देव हरे ॥८॥
श्रीजयदेवकवेरुदितमिदं कुरुते मुदम्। मङ्गलमञ्जुलगीतं जय जय देव हरे ॥९॥

इति श्री जयदेवविरचितं मङ्गलगीतं सम्पूर्णम्।

श्रीगङ्गाष्टक

मातः शैलसुतासपत्नि वसुधा शृङ्गारहारावलि, स्वर्गारोहणवैजयन्ति भवतीं भागीरथीं प्रार्थये। त्वत्तीरे वसन्तत्वदम्बुपिवतस्त्वद्वीचिषु प्रेङ्खतस्त्वन्नाम स्मरतस्त्वदर्पितदशः स्यान्मे शरीरव्ययः ॥१ ॥ त्वत्तीरे तरुकोटरान्तरगतो गङ्गे विहङ्गोवरं, त्वन्नीरे नरकान्तकारिणि वरं मत्स्योऽथवा कच्छपः। नैवान्यत्र मन्दान्धसिन्धुरघटासंघट्टघण्टारणत्कारत्रस्तमसस्तवैरिवनितालब्धस्तुतिर्भूपतिः ॥२ ॥ उक्षा पक्षी तुरग उरगः कोऽपि वा वारणो वा वाराणस्याः जननमरणक्लेशदुःखासहिष्णुः। न त्वन्यत्र प्रविरलरणत्कङ्कणक्वाणमिश्रं वारस्त्रीभिश्चमरमरुत्तावीजिसो भूमिपालः ॥३ ॥ काकैर्निष्कुषितं श्वभिः कवलितं गोमायुभिर्लुण्ठितं स्रोतोभिश्चलितं तटाम्बुलुलितं वीचीभिरान्दोलितम्। दिव्यस्त्रीकरचारुचामरमरुत्सम्वीज्यमानः कदा, द्रक्ष्येऽहं परमेश्वरि त्रिपथगे भागीरथि स्वं वपुः ॥४ ॥ अभिनवविसवल्ली पादपद्मस्य विष्णोर्मदनमथनमौलेर्मालतीपुष्पमाला। जयति जयपताका काप्यसौ मोक्षलक्ष्म्याः क्षपितकलिकलङ्का जाह्नवी नः पुनातु ॥५ ॥ एतत्तालतमालसालसरलव्यालोलवल्लीलताच्छन्नं सूर्यकरप्रतापरहितं शङ्खेन्दुकुन्दोज्ज्वलम्। गन्धर्वामरसिद्धकिन्नरवधूतुङ्गस्तनास्फालितं स्नानाय प्रतिवासरं भवतु मे गाङ्गं जलं निर्मलम् ॥६ ॥ गाङ्गं वारि मनोहारि मुरारिचरणच्युतम्। त्रिपुरारिशिरश्चारि पापहारि पुनातु माम् ॥७ ॥ पापापहारि दुरितारि तरङ्गधारि शैलप्रचारि गिरिराजगुहाविदारि। झङ्कारकारि हरिपादरजोपहारि गाङ्गं पुनातु सततं शुभकारि वारि ॥८ ॥ गङ्गाष्टकं पठति यः प्रयतः प्रभाते वाल्मीकिना विरचितं शुभदं मनुष्यः। प्रक्ष्याल्य गात्रकलिकल्मषपङ्कमाशु मोक्षं लभेत् पतति नैव नरो भवाब्धौ ॥९ ॥

श्रीवाल्मीकिविरचितं गङ्गाष्टकं सम्पूर्णम् ॥

श्रीराधाकृष्णयुगलस्तोत्र

अनादिमाद्यं पुरुषोत्तमोत्तमं, श्रीकृष्णचन्द्रं निजभक्तवत्सलम्। स्वयं त्वसङ्ख्याण्डपतिं परात्परं, राधापतिं त्वां शरणं व्रजाम्यहम् ॥१ ॥ गोलोकनाथस्त्वमतीवलीलो लीलावतीयं निजलोकलीला। वैकुण्ठनाथोऽसि यदा त्वमेव,

लक्ष्मीस्तदेयं वृषभानुजा हि ॥२॥ त्वं रामचन्द्रो जनकात्मजेयं, भूमौ हरिस्त्वं कमलालयेयम्। यज्ञावतारोऽसि यदा तदेयं, श्रीदक्षिणास्त्रीप्रतिपत्निमुख्याः ॥३॥ त्वं नारसिंहोऽसि रमा हृदीयं, नारायणस्त्वञ्च नरेण युक्तः। तदा त्वियं शान्तिरतीव साक्षाच्छायेव याता च तवानुरूपा ॥४॥ त्वं ब्रह्म चेयं प्रकृतिस्तटस्था कालो यदेमां च विदुःप्रधानम्। महान्यदा त्वं जगदङ्कुरोऽसि, राधा तदेयं सगुणा च माया ॥५॥ यदान्तरात्मा विदितश्चतुर्भिस्तदा त्वियं लक्षणरूपवृत्तिः। यदा विराड्देहधरस्त्वमेव, तदाखिलं वा भुवि धारणेयम् ॥६॥ श्यामञ्च गौरं विदितं द्विधा महस्तवैव साक्षात्पुरुषोत्तमोत्तम्। गोलोकधामाधिपतिं परेशं, परात्परं त्वां शरणं व्रजाम्यहम् ॥७॥ सदा पठेद्यो युगलस्तवं परं, गोलोकधामं परमं प्रयाति सः। इहैव सौन्दर्यसमृद्धिसिद्धयो, भवन्ति तस्यापि निसर्गतः पुनः ॥८॥

श्रीगर्गसंहितायां ब्रह्मविरचितं श्रीराधाकृष्ण-युगल-स्तोत्रं सम्पूर्णम्।

देव्यपराधक्षमापन-स्तोत्र

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदनुशरणं क्लेशहरणम् ॥१॥
विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाशक्यत्वात्तव चरणयोर्याच्युतिरभूत ।
तदेतत्क्षन्तव्यं जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥२॥
पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः
परं तेषां मध्ये विरल-तरलोऽहं तव सुतः ।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥३॥

जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया ।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥४ ॥

परित्यक्त्वा देवाविविधविधिसेवाकुलतया
मया पञ्चाशीतेरधिकमपनीते तु वयसि ।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥५ ॥

श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातङ्को रङ्को विहरति चिरं कोटि-कनकैः ।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदम्
जनः को जानीते जननि जपनीयं जपविधौ ॥६ ॥

चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः ।
कपाली भूतेशो भजति जगदीशैक-पदवीं
भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥७ ॥

न मोक्षस्याकाङ्क्षा न च विभववाञ्छापि च न मे
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः ।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानी रुद्राणी शिव शिव भवानीति जपतः ॥८ ॥

नाराधितासि विधिना विविधोपचारैः
किं रुक्षचिन्तनपरैर्न कृतं वचोभिः ।

श्यामे त्वमेव यदि किञ्चन मय्यनाथे
धत्से कृपामुचितमम्ब परं तवैव ॥९॥
आपत्सु मग्नः स्मरणं त्वदीयं करोमि दुर्गे करुणार्णवेशि ।
नैतच्छठत्वं मम भावयेथाः क्षुधातृषार्ता जननीं स्मरन्ति ॥१०॥
जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि ।
अपराधपरम्परावृतं नहि माता समुपेक्षते सुतम् ॥११॥
मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि ।
एवं ज्ञात्वा महादेवि यथा योग्यं तथा कुरु ॥१२॥

इति देव्यपराधक्षमापनस्तोत्रं सम्पूर्णम् ।

श्रीशीतलाष्टकम्

विनियोग— ॐ अस्य श्रीशीतलास्तोत्रस्य महादेव ऋषिः अनुष्टुप् छन्दः शीतला देवता लक्ष्मीर्बीजम् भवानी शक्तिः सर्वविस्फोटकनिवृत्तये जपे विनियोगः ।

वन्देऽहं शीतलां देवीं, रासभस्थां दिगम्बराम् ।
मार्जनी-कलशोपेतां, शूर्पालङ्कृतमस्तकाम् ॥१॥
वन्देऽहं शीतलां देवीं, सर्वरोग-भयापहाम् ।
यामासद्य निवर्त्तेत, विस्फोटक-भयं महत् ॥२॥
शीतले शीतले चेति, यो ब्रूयाद्दाह-पीडितः ।
विस्फोटक-भयं घोरं, क्षिप्रं तस्य प्रणश्यति ॥३॥
यस्त्वामुदकमध्ये तु, धृत्वा पूजयते नरः ।
विस्फोटक-भयं घोरं, गृहे तस्य न जायते ॥४॥
शीतले ज्वरदग्धस्य, पूतिगन्धयुतस्य च ।
प्रनष्टचक्षुषः पुंसस्त्वामाहुर्जीवनौषधम् ॥५॥

शीतले तनुजान् रोगान्नृणां हरसि दुस्त्यजान् ।
विस्फोटक-विशीर्णानां, त्वमेकाऽमृतवर्षिणी ॥६ ॥

गलगण्ड-ग्रहा रोगा ये चान्ये दारुणा नृणाम् ।
त्वदनुध्यान-मात्रेण, शीतले यान्ति संक्षयम् ॥७ ॥

न मन्त्रो नौषधं तस्य, पाप-रोगस्य विद्यते ।
त्वामेकां शीतले धात्रीं, नान्यां पश्यामि देवताम् ॥८ ॥

मृणाल-तन्दु सदृशीं नाभिहृन्मध्यसंस्थिताम् ।
यस्त्वां सञ्चिन्तयेद्देवि, तस्य मृत्युर्न जायते ॥९ ॥

अष्टकं शीतला-देव्याः, यो नरः प्रपठेत् सदा ।
विस्फोटकभयं घोरं, गृहे तस्य न जायते ॥१० ॥

श्रोतव्यं पठितव्यञ्च, श्रद्धा- भक्ति-समन्वितैः ।
उपसर्ग-विनाशाय, परं स्वस्त्ययनं महत् ॥११ ॥

शीतले त्वं जगन्माता, शीतले त्वं जगत्-पिता ।
शीतले त्वं जगद्धात्री, शीतलायै नमो नमः ॥१२ ॥

रासभो गर्दभश्चैव, खरो वैशाख-नन्दनः ।
शीतला-वाहनश्चैव, दूर्वा-कन्द-निकृन्तनः ॥१३ ॥

एतानि खरनामानि शीतलाग्रे तु यः पठेत् ।
तस्य गेहे शिशूनां च शीतला-रुङ् न जायते ॥१४ ॥

शीतलाष्टकमेवेदं, न देयं यस्य कस्यचित् ।
दातव्यञ्च सदा तस्मै, श्रद्धाभक्ति-युताय वै ॥१५ ॥

श्रीस्कन्दपुराणोक्तं शीतलाष्टक-स्तोत्रं सम्पूर्णम् ।

श्रीविष्णुसहस्रनामस्तोत्रम्

श्रीगणेशाय नमः ॥ श्री सत्यनारायणाय नमः ॥ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥१ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥२ ॥ व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् । पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥३ ॥ व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे । नमो वै ब्रह्मविधये वसिष्ठाय नमो नमः ॥४ ॥ अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः । अभाललोचनः शम्भुर्भगवान् बादरायणः ॥५ ॥ अथविष्णुसहस्रनामप्रारम्भः ॥ ॐ श्रीपरमात्मने नमः ॥ यस्य स्मरणमात्रेण जन्मसंसारबन्धनात् । विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥१ ॥ नमः समस्तभूतानामादिभूताय भूभृते । अनेकरूपरूपाय विष्णवे प्रभविष्णवे ॥२ ॥ वैशम्पायन उवाच ॥ श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः । युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥३ ॥ युधिष्ठिर उवाच ॥ किमेकं दैवतं लोके किम्वाप्येकं परायणम् । स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् ॥४ ॥ को धर्मः सर्वधर्माणां भवतः परमो मतः । किं जपन् मुच्यते जन्तुर्जन्मसंसारबन्धनात् ॥५ ॥ भीष्म उवाच ॥ जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् । स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ॥६ ॥ तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् । ध्यायन् स्तुवन्नमस्यंश्च यजमानस्तमेव च ॥७ ॥ अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् । लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥८ ॥ ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् । लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥९ ॥ एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः । यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥१० ॥ परमं यो महत्तेजः परमं यो महत्तपः । परमं यो महद् ब्रह्म परमं यः परायणम् ॥११ ॥ पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् । दैवतं देवतानां च भूतानां योऽव्ययः पिता । ।१२ ॥ यतः सर्वाणि भूतानि भवन्त्यादियुगागमे । यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥१३ ॥ तस्य लोकप्रधानस्य जगन्नाथस्य भूपते । विष्णोर्नामसहस्रं मे शृणु पापभयावहम् ॥१४ ॥ यानि नामानि गौणानि विख्यातानि महात्मनः । ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥१५ ॥ विष्णोर्नाम सहस्रस्य वेदव्यासो महामुनिः । छन्दोऽनुष्टुप् तथा देवो भगवान् देवकीसुतः ॥१६ ॥ विष्णुं जिष्णुं महा-

विष्णुं प्रभविष्णुं महेश्वरम् ॥ अनेकरूप-दैत्यान्तं नमामि पुरुषोत्तमम् ॥१७ ॥ अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमहामन्त्रस्य भगवान्वेदव्यास ऋषिः अनुष्टुप् छन्दः श्रीकृष्णः परमात्मा श्रीमन्नारायणो देवता अमृतांशूद्भवो भानुरिति बीजम् देवकीनन्दनः स्रष्टेति शक्तिः त्रिसामा सामगः सामेति हृदयम् शङ्खभृन्नन्दकी चक्रीति कीलकम् शार्ङ्गधन्वा गदाधर इत्यस्त्रम् रथाङ्गपाणिरक्षोभ्यः इति कवचम् उद्भवः क्षोभणो देव इति परमो मन्त्रः श्रीकृष्णप्रीत्यर्थे सहस्रनामस्तोत्रजपे विनियोगः ॥ अथ करन्यासः ॥ ॐ उद्भवाय अङ्गुष्ठाभ्यां नमः । ॐ क्षोभणाय तर्जनीभ्यां नमः । ॐ देवाय मध्यमाभ्यां नमः । ॐ उद्भवाय अनामिकाभ्यां नमः ॥ ॐ क्षोभणाय कनिष्ठिकाभ्यां नमः । ॐ देवाय करतलकरपृष्ठाभ्यां नमः ॥ इति करन्यासः ॥ अथ हृदयादिषडङ्गन्यासः ॥ सुव्रतः सुमुखः सूक्ष्मः ज्ञानाय हृदयाय नमः । सहस्रमूर्द्धा विश्वात्मा ऐश्वर्याय शिरसे स्वाहा । सहस्रार्चिः सप्तजिह्वः शक्त्यै शिखायै वषट् । त्रिसामा सामगः सामबलाय कवचाय हुम् । रथाङ्ग-पाणिरक्षोभ्यः तेजसे नेत्राभ्यां वौषट् । शार्ङ्गधन्वा गदाधरः वीर्याय अस्त्राय फट् ॥ इति हृदयादिन्यासः ॥ ऋतुः सुदर्शनः कालः भूर्भुवस्स्वरोम् । इति दिग्बन्ध ।

अथध्यानम्

ॐ क्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकतेर्मौक्तिकानां
मालाक्लृप्तासनस्थः स्फटिकमणिनिभैर्मौक्तिकैर्मण्डिताङ्गः ।
शुभ्रैरभ्रैरदभ्रैरुपरि-विरचितैर्मुक्तपीयूषवर्षै -
रानन्दी नः पुनीयादरिनलिनगदाशङ्खपाणिर्मुकुन्दः ॥१ ॥

भूः पादौ यस्य नाभिर्वियदसुरनिलश्चन्द्रसूर्यौ च नेत्रे
कर्णावाशाः शिरो द्यौर्मुखमपि दहनोयस्य वासोऽयमब्धिः ।
अन्तःस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यै -
श्चित्रं रं रम्यते तं त्रिभुवनवपुषं विष्णुमीशं नमामि ॥२ ॥

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥३॥
मेघश्यामं पीतकौशेयवासं
श्रीवत्साङ्कं कौस्तुभोद्भासिताङ्गम् ।
पुण्योपेतं पुण्डरीकायताक्षं
विष्णुं वन्दे सर्वलोकैकनाथम् ॥४॥
सशङ्खचक्रं सकिरीटकुण्डलं
सपीतवस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षः स्थलकौस्तुभश्रियं
नमामि विष्णुं शिरसा चतुर्भुजम् ॥५॥

ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद् भूतभृद्भावो भूतात्मा भूतभावनः ॥१॥
पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥२॥
योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥३॥
सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
सम्भवो भावनो भर्त्ता प्रभवः प्रभुरीश्वरः ॥४॥
स्वयम्भूः शम्भुरादित्यः पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता विधाता धातुरुत्तमः ॥५॥

अप्रमेयो हृषिकेशः प्रद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥६ ॥
अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।
प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलम्परम् ॥७ ॥
ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥८ ॥
ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥९ ॥
सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ।
अहः सम्वत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥१० ॥
अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ।
वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ॥११ ॥
वसुर्वसुमनाः सत्यः समात्मा सम्मितः समः ।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ॥१२ ॥
रुद्रो बहु शिरा बभ्रु र्विश्वयोनिः शुचिश्रवाः ।
अमृतः शाश्वतस्थाणुर्वरारोहो महातपाः ॥१३ ॥
सर्वगः सर्वविद् भानुर्विष्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः ॥१४ ॥
लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥१५ ॥
भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥१६ ॥
उपेन्द्रो वामनः प्रांशुरमोघः शुचिरुर्जितः ।
अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥१७ ॥

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।
अतीन्द्रियो महामायो महोत्साहो महाबलः ॥१८॥

महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥१९॥

महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ।
अनिरुद्धः सुरानन्दो गोविन्दो गोविदांपतिः ॥२०॥

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥२१॥

अमृत्युः सर्वदृक् सिंहः सन्धाता सन्धिमान् स्थिरः ।
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥२२॥

गुरुर्गुरुत्तमो धाम सत्यः सत्यपराक्रमः ।
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥२३॥

अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः ।
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥२४॥

आवर्तनो निवृतात्मा संवृतः सम्प्रमर्दनः ।
अहः संवर्तको वह्निरनिलो धरणीधरः ॥२५॥

सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ।
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥२६॥

असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ।
सिद्धार्थः सिद्धसङ्कल्पः सिद्धिदः सिद्धिसाधनः ॥२७॥

वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥२८॥

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥२९॥

ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।
ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ॥३० ॥

अमृतांशूद्भवो भानुः शशविन्दुः सुरेश्वरः ।
औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥३१ ॥

भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः ॥३२ ॥

युगादिकृद्युगावर्तो नैकमायो महाशनः ।
अदृश्योऽव्यक्तरूपश्च सहस्रजिदनन्तजित् ॥३३ ॥

इष्टोविशिष्टः शिष्टेष्टः शिखण्डी नहुषो बृषः ।
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥३४ ॥

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपान्निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥३५ ॥

स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ॥३६ ॥

अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ॥३७ ॥

पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ।
महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥३८ ॥

अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिञ्जयः ॥३९ ॥

विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।
महीधरो महाभागो वेगवानमिताशनः ॥४० ॥

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता विकर्ता गहनो गुहः ॥४१ ॥

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥४२ ॥

रामो विरामो विरजो मार्गो नेयो नयोऽनयः ।
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥४३ ॥

वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥४४ ॥

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो विश्रामो विस्वदक्षिणः ॥४५ ॥

विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययम् ।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥४६ ॥

अनिर्वण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ॥४७ ॥

यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥४८ ॥

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृद् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥४९ ॥

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥५० ॥

धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥५१ ॥

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृद् गुरु ॥५२

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद् भोक्ता कपीन्द्रो भूरिदक्षिणः ॥५३ ॥

सोमपोऽमृतपः सोमः पुरुजित्पुरुषोत्तमः ।
विनयो जयः सत्यसन्धो दाशार्हः सात्वतां पतिः ॥५४॥
जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः ।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ॥५५॥
अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः ॥५६॥
महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् ॥५७॥
महावराहो गोविन्दः सुषेणः कनकाङ्गदी ।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥५८॥
वेधाः स्वाङ्गोऽचितः कृष्णो दृढः संकर्षणोऽच्युतः ।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥५९॥
भगवान् भगहाऽनन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥६०॥
सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।
दिविस्पृक् सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥६१॥
त्रिसामा सामगः सामः निर्वाणं भेषजं भिषक् ।
संन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम् ॥६२॥
शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥६३॥
अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमंकृच्छिवः ।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतांवरः ॥६४॥

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ।
श्रीधरः श्रीकरः श्रेयः श्रीमाँल्लोकत्रयाश्रयः ॥६५॥

स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ।
विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥६६॥

उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतः स्थिरः ।
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ॥६७॥

अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः ।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥६८॥

कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥६९॥

कामदेवः कामपालः कामी कान्तः कृतागमः ।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः ॥७०॥

ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥७१॥

महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥७२॥

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥७३॥

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमनाहविः ॥७४॥

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।
शूरसेना यदुश्रेष्ठः सन्निवासः सुयामुनः ॥७५॥

भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ।
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥७६॥

विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥७७॥
एको नैकः सर्वः कः किं यत्तत्पदमनुत्तमम् ।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ॥७८॥
वर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
वीरहा विषमः शून्यो घृताशीरचलश्चलः ॥७९॥
अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥८०॥
तेजोवृषो द्युतिधरः सर्वशस्त्रभृताम्बरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ॥८१॥
चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥८२॥
समावर्त्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥८३॥
शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः ।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥८४॥
उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ।
अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी ॥८५॥
सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।
महाह्रदो महागर्तो महाभूतो महानिधिः ॥८६॥
कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः ।
अमृतांशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ॥८७॥
सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥८८॥

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।
अमूर्तिरनघोऽचिन्त्यो भयकृद् भयनाशनः ॥८९ ॥
अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ।
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ॥९० ॥
भारभृत्कथितो योगी योगीशः सर्वकामदः ।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥९१ ॥
धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।
अपराजितः सर्वसहो नियन्ता नियमोयमः ॥९२ ॥
सत्त्ववान् सात्त्विकः सत्यः सत्यधर्मपरायणः ।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्धनः ॥९३ ॥
विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ।
रविर्विरोचनः सूर्यः सविता रविलोचनः ॥९४ ॥
अनन्तो हुतभुग् भोक्ता सुखदो नैकजोऽग्रजः ।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥९५ ॥
सनात् सनातनतमः कपिलः कपिरप्ययः ।
स्वस्तिदः स्वस्तिकृत् स्वस्तिः स्वस्तिभुक् स्वस्तिदक्षिणः ॥९६ ॥
अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगः शब्दसहः शिशिरः शर्बरीकरः ॥९७ ॥
अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणांवरः ।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥९८ ॥
उत्तारणो दुष्कृतिहा पुण्यः दुःस्वप्ननाशनः ।
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः ॥९९ ॥
अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।
चतुरस्रो गभीरात्मा विदिशो व्यादिशोदिशः ॥१०० ॥

अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः ।
जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥१०१॥
आधारनिलयोऽधाता पुष्पहासः प्रजागरः ।
उर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥१०२॥
प्रमाणं प्राणनिलयः प्राणाभृत् प्राणजीवनः ।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥१०३॥
भूर्भुवः स्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥१०४॥
यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ।
यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च ॥१०५॥
आत्मयोनिः स्वयञ्जातो वैखानः सामगायनः ।
देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः ॥१०६॥
शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ।
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥१०७॥
सर्वप्रहरणायुध ओं नमः ।
इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् ॥१०८॥
य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात्किञ्चित् सोऽमुत्रेह च मानवः ॥१०९॥
वेदान्तगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ॥११०॥
धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ।
कामानवाप्नुयात्कामी प्रजार्थी प्राप्नुयात्प्रजाम् ॥१११॥

भक्तिमान् यः सदोत्थाय शुचिस्तद्गतमानसः ।
सहस्रं वासुदेवस्य नाम्नामेतत् प्रकीर्तयेत् ॥११२॥

यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च ।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ॥११३॥

न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति ।
भवत्यरोगो द्युतिमान् बलरूपगुणान्वितः ॥११४॥

रोगार्तो मुच्यते रोगाद् बद्धो मुच्येत बन्धनात् ।
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥११५॥

दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ॥११६॥

वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥११७॥

न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥११८॥

इमं स्तवमधीयानः श्रद्धा-भक्तिसमन्वितः ।
युज्येतात्मसुख-क्षान्ति-श्री-धृति-स्मृति-कीर्तिभिः ॥११९॥

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥१२०॥

द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥१२१॥

ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् ।
जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ॥१२२॥

इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ॥१२३॥

सर्वागमानामाचारः प्रथमं परिकल्पते ।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥१२४॥

ऋषयः पितरो देवा महाभूतानि धातवः ।
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् ॥१२५॥

योगो ज्ञानं तथा साङ्ख्यं विद्याः शिल्पादि कर्म च ।
वेदाः शास्त्राणि विज्ञानमेतत् सर्वं जनार्दनात् ॥१२६॥

एको विष्णुमहद्भूतं पृथग्भूतान्यनेकशः ।
त्रीन् लोकान् व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः ॥१२७॥

इदं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ।
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥१२८॥

विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ॥१२९॥

अर्जुन उवाच— पद्मपत्रविशालाक्ष पद्मनाभ सुरोत्तम ।
भक्तानामनुरक्तानां त्राता भव जनार्दन ॥१३०॥

श्रीभगवानुवाच— ॥

यो मां नामसहस्रेण स्तोतुमिच्छति पाण्डव ।
सोहमेकेन श्लोकेन स्तुत एव न संशयः ॥१३१॥

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्र-पादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः ॥१३२॥

नमः कमलनाभाय नमस्ते जलशायिने ।
नमस्ते केशवानन्त वासुदेव नमोस्तु ते ॥१३३॥

वासनाद्वासुदेवस्य वासितं भुवनत्रयम् ।
सर्वभूतनिवासोसि वासुदेव नमोस्तु ते ॥१३४॥

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥१३५॥

आकाशात् पतितं तोयं यथा गच्छति सागरम् ।
सर्वदेवनमस्कारः केशवं प्रतिगच्छति ॥१३६॥

एष निष्कण्टकः पन्था यत्र संपूज्यते हरिः ।
कुपथं तं विजानीयाद् गोविन्दरहितागमम् ॥१३७॥

सर्वदेवेषु यत् पुण्यं सर्वतीर्थेषु यत् फलम् ।
तत् फलं समवाप्नोति स्तुत्वा देवं जनार्दनम् ॥१३८॥

यो नरः पठते नित्यं त्रिकालं केशवालये ।
द्विकालमेककालं वा क्रूरं सर्वं व्यपोहति ॥१३९॥

दह्यन्ते रिपवस्तस्य सौम्याः सर्वे सदा ग्रहाः ।
विलीयन्ते च पापानि स्तवे ह्यस्मिन्प्रकीर्तिते ॥१४०॥

येन ध्यातः श्रुतो येन येनायं पठितः स्तवः ।
दत्तानि सर्वदानानि सुराः सर्वे समर्चिताः ॥१४१॥

इह लोके परे वापि न भयं विद्यते क्वचित् ।
नाम्नां सहस्रं योऽधीते द्वादश्यां मम सन्निधौ ॥१४२॥

स निर्दहति पापानि कल्पकोटिशतानि च ।
अश्वत्थसन्निधौ पार्थ तुलसीसन्निधौ तथा ॥१४३॥

पठेन्नामसहस्रन्तु गवां कोटिफलं लभेत् ।
देवालये पठेन्नित्यं तुलसीवनसंस्थितः ॥१४४॥

नरो मुक्तिमवाप्नोति चक्रपाणेर्वचो यथा :
ब्रह्महत्यादिकं घोरं सर्वं पापं विनश्यति ॥१४५॥

इति श्रीमन्महाभारते शतसाहस्र्यां संहितायां वैयासिक्यामानुशासनिके पर्वणि दानधर्मे भीष्मयुधिष्ठिरसंवादे श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रं सम्पूर्णम् ॥

अथ महामृत्युञ्जयस्तोत्रम्

ॐ अस्य श्रीमहामृत्युञ्जयस्तोत्रमन्त्रस्य श्रीमार्कण्डेय ऋषिः, अनुष्टुप् छन्दः, श्रीमृत्युञ्जयो देवता, गौरी शक्तिः, मम सर्वारिष्टसमस्तमृत्युशान्त्यर्थं सकलैश्वर्य-प्राप्त्यर्थञ्च पाठे (जपे) विनियोगः ।

अथ ध्यानम्

चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तःस्थितं
मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभुम् ।
कोटीन्दुप्रगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं
कान्तं विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावयेत् ॥
ॐ रुद्रं पशुपतिं स्थाणुं नीलकण्ठमुमापतिम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥१॥
नीलकण्ठं कलामूर्तिं कालज्ञं कालनाशनम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥२॥
नीलकण्ठं विरूपाक्षं निर्मलं निलयप्रभम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥३॥
वामदेवं महादेवं लोकनाथं जगद्गुरुम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥४॥
देवदेवं जगन्नाथं देवेशं वृषभध्वजम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥५॥
गङ्गाधरं महादेवं सर्वाभरणभूषितम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥६॥

अनाथः परमानन्दं कैवल्यपदगामिनि ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥७॥
स्वर्गापवर्गदातारं सृष्टिस्थितिविनाशकम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥८॥
उत्पत्तिस्थितिसंहारकर्त्तारमीश्वरं गुरुम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥९॥
मार्कण्डेयकृतं स्तोत्रं यः पठेच्छिवसन्निधौ ।
तस्य मृत्युभयं नास्ति नाग्निचोरभयं क्वचित् ॥१०॥
शतावर्तं प्रकर्तव्यं सङ्कटे कष्टनाशनम् ।
शुचिर्भूत्वा पठेत्स्तोत्रं सर्वसिद्धिप्रदायकम् ॥११॥
मृत्युञ्जय महादेव त्राहि मां शरणागतम् ।
जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः ॥१२॥
तावतस्त्वद्गतः प्राणस्त्वच्चित्तोऽहं सदा मृड ।
इति विज्ञाप्य देवेशं त्र्यम्बकाख्यमनुं जपेत् ॥१३॥
नमः शिवाय साम्बाय हरये परमात्मने ।
प्रणतक्लेशनाशाय योगिनां पतये नमः ॥१४॥

शताङ्गायुर्मन्त्रः

ॐ ह्रीं श्रीं ह्रीं ह्रौं ह्रैं ह्रः हन हन दह दह पच पच गृहाण गृहाण मारय मारय मर्दय मर्दय महामहाभैरव महाभैरवरूपेण धुनय धुनय कम्पय कम्पय विघ्नय विघ्नय विश्वेश्वरीं क्षोभय क्षोभय कटु कटु मोहय मोहय हुंफट् स्वाहा इति मन्त्रमात्रेण समाभीष्टो भवति ।

इति श्रीमार्कण्डेयपुराणे मार्कण्डेयकृतमहामृत्युञ्जयस्तोत्रं सम्पूर्णम् ।

श्रीशिवमहिम्नः स्तोत्रम्

श्रीगणेशाय नमः ॥

पुष्पदन्त उवाच—

महिम्नः पारन्ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।
अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन्
ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥१ ॥

अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि ।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥२ ॥

मधुस्फीता वाचः परमममृतं निर्मितवत-
स्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम् ।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता ॥३ ॥

तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्
त्रयी वस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु ।
अभव्यानामस्मिन् वरद रमणीयामरमणीं
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ॥४ ॥

किमीहः किं कायः स खलु किमुपायस्त्रिभुवनं
किमाधारो धाता सृजति किमुपादान इति च ।
अतर्क्यैश्वर्ये त्वय्यनवसरदुःस्थो हतधियः
कुतर्कोऽयं कांश्चिन् मुखरयति मोहाय जगतः ॥५ ॥

अजन्मानो लोकाः किमवयववन्तोऽपि जगता-
मधिष्ठातारं किं भवविधिरनादृत्य भवति ।
अनीशो वा कुर्याद् भुवनजनने कः परिकरो
यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ॥६॥

त्रयी साङ्ख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥७॥

महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद तन्त्रोपकरणम् ।
सुरास्तां तामृद्धिं विदधति भवद्भ्रूप्रणिहितां
न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥८॥

ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्या ध्रौव्ये जगति गदति व्यस्तविषये ।
समस्तेऽप्येतस्मिन् पुरमथन तैर्विस्मित इव
स्तुवञ्जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥९॥

तवैश्वर्यं यत्नाद्यदुपरि विरञ्चिर्हरिरधः
परिच्छेत्तुं यातावनलमनलस्कंधवपुषः ।
ततो भक्तिश्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥१०॥

अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं
दशास्यो यद्बाहूनभृत रणकण्डूपरवशान् ।

शिरः पद्मश्रेणीरचितचरणाम्भोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर विस्फूर्जितमिदम् ॥११॥
अमुष्य त्वत्सेवा समधिगतसारं भुजवनं
बलात् कैलासेऽपि त्वदधिवसतौ विक्रमयतः ।
अलभ्या पातालेऽप्यलसचलिताङ्गुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः ॥१२॥
यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सती-
मधश्चक्रे वाणः परिजनविधेयस्त्रिभुवनम् ।
न तच्चित्रं तस्मिन् वरिवसितरी त्वच्चरणयो-
र्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥१३॥
अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा
विधेयस्याऽऽसीद्यस्त्रिनयन विषं संहृतवतः ।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो
विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः ॥१४॥
असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः ।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत्
स्मरः स्मर्तव्यात्मा नहि वहिषु पथ्यः परिभवः ॥१५॥
मही पादाघाताद्व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् ।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥१६॥

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः
प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते ।
जगद् द्वीपाकारं जलधिवलयं तेन कृतमि-
त्यनेनैवोन्नेयं धृतमहिमदिव्यं तव वपुः ॥१७॥

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति ।
दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि-
र्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ॥१८॥

हरिस्ते साहस्त्रं कमलबलिमाधाय पदयो-
र्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलम् ।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥१९॥

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ।
अतस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्मसु जनः ॥२०॥

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता-
मृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः ।
क्रतुभ्रंशस्त्वाः क्रतुषु फलदानव्यसनिनो
ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥२१॥

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ।

धनुष्पाणेर्यातं दिवमपि सपत्राकृतममु -
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥२२ ॥

स्वलावण्याशंसाधृतधनुषमह्राय तृणवत्
पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि ।
यदि स्त्रैणं देवी यमनिरतदेहार्धघटना-
दवैति त्वामद्धा वत वरद मुग्धा युवतयः ॥२३ ॥

श्मशानेष्वाक्रीड़ा स्मरहर पिशाचाः सहचरा-
श्चिताभस्मालेपः स्त्रगपि नृकरोटीपरिकरः ।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तृणां वरद परमं मङ्गलमसि ॥२४ ॥

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्संगितदृशः ।
यदालोक्याह्लादं ह्रद इव निमज्यामृतमये
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान् ॥२५ ॥

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।
परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं
न विद्मस्तत्तत्त्वं वयमिह हि यत्त्वं न भवसि ॥२६ ॥

त्रयीं तिस्त्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति ।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः
समस्तं व्यस्तं त्वां शरणद गृणत्योमिति पदम् ॥२७ ॥

भवश्शर्वो रुद्रः पशुपतिरथोग्रः सह महां-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम् ।

अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुतिरपि
प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते ॥२८॥

नमो नेदिष्ठाय प्रियदवदविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः सर्वस्मै ते तदिदमिति शर्वाय च नमः ॥२९॥

बहुलरजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबलतमसे तत्संहारे हराय नमो नमः ।
जनसुखकृते सत्त्वोत्पत्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥३०॥

कृशपरिणति चेतः क्लेशवश्यं क्व चेदं
क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः ।
इति चकितममन्दीकृत्य मां भक्तिराधाद्
वरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥३१॥

असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखिनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति ॥३२॥

असुरसुरमुनीन्द्रैरर्चितस्येन्दुमौले-
र्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य ।
सकलगणवरिष्ठः पुष्पदन्ताभिधानो
रुचिरमलघुवृत्तैः स्तोत्रमेतच्चकार ॥३३॥

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत्
पठति परमभक्त्या शुद्धचित्तः पुमान् यः ।
स भवति शिवलोके रुद्रतुल्यस्तथात्र
प्रचुरतरधनायुः पुत्रवान् कीर्तिमांश्च ॥३४ ॥

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः ।
अघोरान्नापरो मंत्रो नास्ति तत्त्वं गुरोः परम् ॥३५ ॥

दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः ।
महिम्नस्तवपाठस्य कलां नार्हन्ति षोडशीम् ॥३६ ॥

कुसुमदशननामा सर्वगन्धर्वराजः
शिशुशशिधरमौलेर्देवदेवस्य दासः ।
स खलु निजमहिम्नो भ्रष्ट एवास्य रोषात्
स्तवनमिदमकार्षीद्दिव्यदिव्यं महिम्नः ॥३७ ॥

सुरवर-मुनिपूज्यं स्वर्गमोक्षैकहेतुं
पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः ।
व्रजति शिवसमीपं किन्नरैः स्तूयमानः
स्तवनमिदममोघं पुष्पदन्तप्रणीतम् ॥३८ ॥
श्रीपुष्पदन्तमुखपङ्कजनिर्गतेन
स्तोत्रेण किल्बिषहरेण हरप्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः ॥३९ ॥
इत्येषा वाङ्मयी पूजा श्रीमच्छंकरपादयोः ।
अर्पिता तेन मे देवः प्रीयतां च सदाशिवः ॥४० ॥

श्रीपुष्पदन्तगन्धर्वराजविरचितं श्रीशिवमहिम्नःस्तोत्रं सम्पूर्णम् ॥

श्रीशिव-मानस-पूजा-स्तोत्रम्

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं,
नाना रत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम् ।
जातीचम्पकविल्वपत्रसहितं पुष्पं च धूपं तथा
दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥१॥

सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं,
भक्ष्यं पञ्चविधं पयोःदधियुतं रम्भाफलं पानकम् ।
शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं
ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥२॥

छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं
वीणाभेरिमृदङ्गकाहलकलागीतं च नृत्यं तथा ।
साष्टाङ्गप्रणतिः स्तुतिर्बहुविधा ह्येतत् समस्तं मया,
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥३॥

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं,
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः ।
संचारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो,
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥४॥

करचरणकृतं वाक्कायजं कर्मजं वा,
श्रवणनयनजं वा मानसं वापराधम् ।
विहितमविहितं वा सर्वमेतत्क्षमस्व,
जय जय करुणाब्धे श्रीमहादेव शम्भो ॥५॥

श्रीशिव-मानस-पूजा-स्तोत्रं सम्पूर्णम् ॥

श्री रावणकृतशिवताण्डवस्तोत्रम्

श्री गणेशाय नमः ॥ जटाटवीगलज्जलप्रवाहपावितस्थले गलेऽवलम्ब्यलम्बितां भुजङ्गतुङ्गमालिकाम् । डमड्डमड्डमड्डमन्निनादमड्डमर्वयं चकारच्चण्डताण्डवं तनोतु नः शिवः शिवम् ॥१ ॥ जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरीविलोलवीचिवल्लरीविराजमानमूर्धनि । धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके किशोरचन्द्रशेखरे रतिःप्रतिक्षणं मम ॥२ ॥ धराधरेन्द्रनन्दिनीविलासबन्धुबन्धुस्फुरद्दिगन्तसन्ततिप्रमोदमानमानसे । कृपाकटाक्षधोरणीनिरुद्धदुर्धरापदि क्वचिद्दिगम्बरे मनो विनोदमेतु वस्तुनि ॥३ ॥ जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभाकदम्बकुङ्कुमद्रवप्रलिप्तदिग्वधूमुखे । मदान्धसिन्धुरस्फुरत्त्वगुत्तरीयमेदुरे मनो विनोदमद्भुतं विभर्तु भूतभर्तरि ॥४ ॥ सहस्रलोचनप्रभृत्यशेषलेखशेखरप्रसूनधूलिधोरणीविधूसराङ्घ्रिपीठभूः । भुजङ्गराजमालया निबद्धजाटजूटकः श्रिय चिराय जायतां चकोरबन्धुशेखरः ॥५ ॥ ललाटचत्वरज्वलद्धनञ्जयस्फुलिङ्गभानिपीतपञ्चसायकं नमन्निलिम्पनायकम् । सुधामयूखलेखया विराजमानशेखरं महाकपालि सम्पदे शिरोजटालमस्तु नः ॥६ ॥ करालभालपट्टिकाधगद्धगद्धगज्ज्वलद्धनञ्जयाधरीकृतप्रचण्डपञ्चसायके । धराधरेन्द्रनन्दिनीकुचाग्रचित्रपत्रकप्रकल्पनैकशिल्पिनि त्रिलोचने मतिर्मम ॥७ ॥ नवीनमेघमण्डली निरुद्धदुर्धरस्फुरत्कुहूनिशीथिनीतमः प्रबन्धबन्धुकन्धरः । निलिम्पनिर्झरीधरस्तनोतु कृत्तिसिन्धुरः कलानिधानबन्धुरः श्रियं जगद्धुरन्धरः ॥८ ॥ प्रफुल्लनीलपङ्कजप्रपञ्चकालिमच्छटा विडम्बिकण्डकन्धरारुचिप्रबन्धकन्धरम् । स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं गजच्छिदान्धकच्छिदं तमन्तकच्छिदं भजे ॥९ ॥ अखर्वसर्वमङ्गलाकलाकदम्बमञ्जरीरसप्रवाहमाधुरीविजृम्भणामधुव्रतम् । स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं गजान्तकान्धकान्तकं तमन्तकान्तकं भजे ॥१० ॥ जयत्वदभ्रविभ्रमभ्रमद्भुजङ्गमस्फुरद्धगद्धगद्विनिर्गमत्करालभालहव्यवाट् । धिमिद्धिमिद्धिमिध्वनन्मृदङ्गतुङ्गमङ्गलध्वनिक्रमप्रवर्तितप्रचण्डताण्डवः शिवः ॥११ ॥ दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजोर्गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्षपक्षयोः । तृणारविन्दचक्षुषोः प्रजामहीमहे-

CC-0. In Public Domain. Gurukul Kangri Maha Vidyalaya Collection.

न्द्रयोः समं प्रवर्तयन्मनः कदा सदाशिवं भजे ॥१२ ॥ कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वसन् विमुक्तदुर्मतिः सदा शिरस्थमञ्जलिं वहन् । विमुक्तलोललोचनाललामभाललग्नकः शिवेति मन्त्रमुच्चरन् कदा सुखी भवाम्यहम् ॥१३ ॥ इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं पठन्स्मरन्ब्रुवन्नरोविशुद्धिमेति सन्ततम् । हरे गुरौ सुभक्तिमाशु याति नान्यथागतिं विमोहनंहि देहिनां सुशङ्करस्य चिन्तनम् । ।१४ ॥ पूजावसानसमये दशवक्त्रगीतं यः शम्भुपूजनमिदं पठति प्रदोषे । तस्य स्थिरां रथगजेन्द्रतुरङ्गयुक्तां लक्ष्मीं सदैव सुमुखीं प्रददाति शम्भुः ॥१५ ॥

इति श्रीरावणविरचितं शिवताण्डवस्तोत्रं सम्पूर्णम् ।

श्रीशिवपञ्चाक्षरस्तोत्रम्

नागेन्द्रहाराय त्रिलोचनाय भस्माङ्गरागाय महेश्वराय ।
नित्याय शुद्धाय दिगम्बराय तस्मै 'न' काराय नमः शिवाय ॥१ ॥
मन्दाकिनीसलिलचन्दनचर्चिताय नन्दीश्वरप्रमथनाथमहेश्वराय ।
मन्दारपुष्पबहुपुष्पसुपूजिताय तस्मै 'म' काराय नमः शिवाय ॥२ ॥
शिवाय गौरीवदनाब्जवृन्दसूर्याय दक्षाध्वरनाशकाय ।
श्रीनीलकण्ठाय वृषध्वजाय तस्मै 'शि' काराय नमः शिवाय ॥३ ॥
वसिष्ठकुम्भोद्भवगौतमाय मुनीन्द्रदेवार्चितशेखराय ।
चन्द्रार्कवैश्वानरलोचनाय तस्मै 'व' काराय नमः शिवाय ॥४ ॥
यक्षस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय ।
दिव्याय देवाय दिगम्बराय तस्मै 'य' काराय नमः शिवाय ॥५ ॥
पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥६ ॥

इति श्रीमच्छङ्कराचार्यविरचितं शिवपञ्चाक्षरस्तोत्रं सम्पूर्णम् ।

शिवरामाष्टकम्

शिव हरे शिव राम सखे प्रभो
त्रिविध ताप-निवारण हे विभो ।
अजजनेश्वर यादव पाहि मां
शिवहरे विजयं कुरु मे वरम् ॥१॥

कमललोचन राम दयानिधे
हरगुरो गजरक्षक गोपते ।
शिवतनो भव शंकर पाहि मां
शिव हरे विजयं कुरु मे वरम् ॥२॥

स्वजनरञ्जन मङ्गलमन्दिरं
भजति तं पुरुषः परमं पदम् ।
भवति तस्य सुखं परमाद्भुतं
शिव हरे विजयं कुरु मे वरम् ॥३॥

जय युधिष्ठिरवल्लभ भूपते
जय जयार्जित-पुण्य-पयोनिधे ।
जय कृपामय कृष्ण नमोऽस्तुते
शिव हरे विजयं कुरु मे वरम् ॥४॥

भवविमोचन माधव मापते
सुकविमानसहंस शिवारते ।
जनकजारत राघव रक्ष मां
शिव हरे विजयं कुरु मे वरम् ॥५॥

अवनि-मण्डल-मङ्गल मापते
जलद-सुन्दर राम रमापते ।
निगम-कीर्ति-गुणार्णव गोपते
शिव हरे विजयं कुरु मे वरम् ॥६॥

पतित-पावन-नाम-मयी लता
तव यशो विमलं परिगीयते ।
तदपि माधव मां किमुपेक्षसे
शिव हरे विजयं कुरु मे वरम् ॥७॥

अमरता परदेव रमापते
विजयतस्तव नाम घनोपमा ।
मयि कथं करुणार्णव जायते
शिव हरे विजयं कुरु मे वरम् ॥८॥

हनुमतः प्रियतोषकर प्रभो
सुरसरिद्धृतशेखर हे गुरो ।
मम विभो किमु विस्मरणं कृतं
शिव हरे विजयं कुरु मे वरम् ॥९॥

नरहरे रतिरञ्जन सुन्दरं
पठति यः शिवराम-कृतस्तवम् ।
वसति रामरमाचरणाम्बुजे
शिव हरे विजयं कुरु मे वरम् ॥१०॥

श्रीरामनन्दयति-विरचितं शिवरामस्तोत्रं सम्पूर्णम् ।

श्रीआदित्यहृदयस्तोत्रम्

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥१॥

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।
उपगम्याब्रवीद्राममगस्त्यो भगवाँस्तदा ॥२॥

राम राम महाबाहो शृणु गुह्यं सनातनम् ।
येन सर्वानरीन् वत्स समरे विजयिष्यसे ॥३॥

आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ।
जपावहं जपन्नित्यमक्षयं परमं शिवम् ॥४॥
सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ।
चिन्ताशोकप्रशमनमायुर्वर्धनमुत्तमम् ॥५॥
रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् ।
पूजयस्व विवस्वन्तं भाष्करं भुवनेश्वरम् ॥६॥
सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः ।
एष देवासुरगणाँल्लोकान्पाति गभस्तिभिः ॥७॥
एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः ।
महेन्द्रो धनदः कालो यमः सोमो ह्यपाम्पतिः ॥८॥
पितरो वसवः साध्या अश्विनौ मरुतो मनुः ।
वायुर्वह्निः प्रजाः प्राण ऋतुकर्ता प्रभाकरः ॥९॥
आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ।
सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः ॥१०॥
हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् ।
तिमिरोन्मथनः शम्भुस्त्वष्टा मार्तण्डकोऽंशुमान् ॥११॥
हिरण्यगर्भः शिशिरस्तपनोऽहस्करो रविः ।
अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः ॥१२॥
व्योमनाथस्तमोभेदी ऋग्यजुः सामपारगः ।
घनवृष्टिरपां मित्रो विंध्यवीथीप्लवङ्गमः ॥१३॥
आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः ।
कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः ॥१४॥

नक्षत्रग्रहताराणामधिपो विश्वभावनः ।
तेजसामपि तेजस्वी द्वादशात्मन्नमोऽस्तु ते ॥१५ ॥
नमः पूर्वाय गिरये पश्चिमायाद्रये नमः ।
ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥१६ ॥
जयाय जयभद्राय हर्यश्वाय नमो नमः ।
नमो नमः सहस्रांशो आदित्याय नमो नमः ॥१७ ॥
नमः उग्राय वीराय सारङ्गाय नमो नमः ।
नमः पद्मप्रबोधाय प्रचण्डाय नमोऽस्तु ते ॥१८ ॥
ब्रह्मेशानाच्युतेशाय सूरायादित्यवर्चसे ।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥१९ ॥
तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥२० ॥
तप्तचामीकराभाय हरये विश्वकर्मणे ।
नमस्तमोभिनिघ्नाय रुचये लोकसाक्षिणे ॥२१ ॥
नाशयत्येष वै भूतं तमेव सृजति प्रभुः ।
पायत्येष तपत्येष वर्षत्येष गभस्तिभि ॥
एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठतः ।
एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ॥२३ ॥
देवाश्च क्रतवश्चैष क्रतूनां फलमेव च ।
यानि कृत्यानि लोकेषु सर्वेषु परमप्रभुः ॥२४ ॥
एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च ।
कीर्तयन्पुरुषः कश्चिन्नावसीदति राघव ॥२५ ॥

पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ।
एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥२६॥
अस्मिन् क्षणे महाबाहो रावणं त्वं जहिष्यसि ।
एवमुक्त्वा ततोऽगस्त्यो जगाम स यथागतम् ॥२७॥
एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ।
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥२८॥
आदित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥२९॥
रावणं प्रेक्ष्य हृष्टात्मा जयार्थं समुपागमत् ।
सर्वयत्नेन महता यतस्तस्य वधेऽभवत् ॥३०॥
अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः ।
निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ॥३१॥

वाल्मीकीयरामायणोक्तं आदित्यहृदयं सम्पूर्णम् ।

अन्नपूर्णास्तोत्रम्

ध्यानम्

तप्तस्वर्णनिभा शशाङ्कमुकुटा रत्नप्रभा-भासुरा,
नानावस्त्रविराजिता त्रिनयना भूमीरमाभ्यां युता ।
दर्वी हाटकभाजनञ्च दधती रम्योच्चपीनस्तनी,
नित्यं तं शिवमाकलय्य मुदिता ध्येयान्नपूर्णेश्वरी ॥
ॐ नमः कल्याणदे देवि नमः शङ्करवल्लभे ।
नमो मुक्तिप्रदे देवि ह्यन्नपूर्णे नमोऽस्तुते ॥१॥

नमो मायागृहीताङ्गि नमः शङ्करवल्लभे ।
माहेश्वरि नमस्तुभ्यमन्नपूर्णे नमोऽस्तु ते ॥२ ॥
अन्नपूर्णे हव्यवाहपत्नीरूपे हरप्रिये ।
कलाकाष्ठास्वरूपे च अन्नपूर्णे नमोऽस्तुते ॥३ ॥
उद्यद्भानुसहस्राभे नयनत्रयभूषिते ।
चन्द्रचूड़े महादेवि ह्यन्नपूर्णे नमोऽस्तु ते ॥४ ॥
विचित्रवसने देवि त्वन्नदानरतेऽनघे ।
शिवनृत्यकृतामोदे ह्यन्नपूर्णे नमोऽस्तु ते ॥५ ॥
षट्कोणपद्ममध्यस्थे षडङ्गयुवतिप्रिये ।
ब्रह्माण्यादिस्वरूपे च ह्यन्नपूर्णे नमोऽस्तु ते ॥६ ॥
देवि चन्द्रकलापीठे सर्वसाम्राज्यदायिनी ।
सर्वानन्दकरे देवि ह्यन्नपूर्णे नमोऽस्तु ते ॥७ ॥
साधकाभीष्टदे देवि भवदुःख-विनाशिनी ।
कुचभारनते देवि ह्यन्नपूर्णे नमोऽस्तु ते ॥८ ॥
इन्द्राद्यर्चितपादाब्जे रुद्रादिरूपधारिणी ।
सर्वसम्पत्प्रदे देवि ह्यन्नपूर्णे नमोऽस्तु ते ॥९ ॥
पूजाकाले पठेद्यस्तु स्तोत्रमेतत् समाहितः ।
तस्य गेहे स्थिरा लक्ष्मीर्जायते नात्र संशयः ॥१० ॥
प्रातः काले पठेद्यस्तु मन्त्रजापपुरःसरम् ।
तस्यैवान्नसमृद्धिः स्यात् वर्द्धमाना दिने दिने ॥११ ॥

अन्नपूर्णास्तोत्रं सम्पूर्णम् ॥

श्रीसूक्तम्

विनियोग— "ॐ अस्य श्रीहिरण्यवर्णामिति पञ्चदशर्चस्य श्रीसूक्तस्य श्रीआनन्द-कर्दम-चिक्लीतेन्दिरासुता यता ऋषयः श्रीरग्निर्देवते आद्यत्रयस्यानुष्टुप्छन्दः अन्त्यायाः प्रस्तार-पंक्तिश्छन्दो व्यञ्जनानि बीजानि स्वराः शक्तयः बिन्दुः कीलकं ममाभीष्ट-सिद्ध्यर्थे धन-धान्य-सकलसमृद्ध्यर्थे श्रीमहालक्ष्मी-प्रीति-द्वारा-चतुर्विध-पुरुषार्थ-सम्पत्तये श्रीमहालक्ष्मी-सूक्त-महामन्त्र-जपे विनियोगः।" अथ षडङ्गन्यासः। ॐ हिरण्यायै अङ्गुष्ठाभ्यां नमः। ॐ चन्द्रायै तर्जनीभ्यां नमः। ॐ रजतस्रजायै मध्यमाभ्यां नमः। ॐ हिरण्यस्रजायै अनामिकाभ्यां नमः। ॐ हिरण्यजायै कनिष्ठिकाभ्यां नमः। ॐ हिरण्यवर्णायै करतलकरपृष्ठाभ्यां नमः॥ एवं हृदयादि न्यासः॥

ध्यानम्— "अरुणकमलसंस्था तद्रजःपुञ्जवर्णा
करयुगल-धृतेष्टाऽभीति-युग्माम्बुजा च ।
मणिमय-मुकुटाढ्यालङ्कृता कल्पजालै —
र्भवतु भुवनमाता सन्ततं श्रीः श्रीयै नः" ॥

ॐ लं पृथिव्यात्मकं गन्धं समर्पयामि। ॐ हं आकाशात्मकं पुष्पं समर्पयामि। ॐ यं वाय्वात्मकं धूपं समर्पयामि। ॐ रं अग्न्यात्मकं दीपं समर्पयामि। ॐ वं अमृतात्मकं अमृतनैवेद्यं समर्पयामि। (श्रीमहालक्ष्म्यै नमः द्वादशगुणित-ताम्बूलं समर्पयामि) । ॐ सं सर्वात्मकं श्रीमहालक्ष्म्यै नमः सर्वराजोपचारान् समर्पयामि। एवं पञ्चोपचारैः सम्पूज्य पाठान्तेऽपि षडङ्गन्यासं कुर्यात्॥ पाठान्ते च लक्ष्मीगायत्रीं (१०८) जपेत् "ॐ महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि तन्नो लक्ष्मीः प्रचोदयात्॥" इति लक्ष्मीगायत्री मन्त्रः॥

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरणमयीं लक्ष्मीं जातवेदो म आवह ॥१॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥२॥

अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥३॥
कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥४॥
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मनेमीं शरणं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि ॥५॥
आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदन्तु या आन्तरा याश्च बाह्या अलक्ष्मीः ॥६॥
उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥७॥
क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥८॥
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥९॥
मनसः काममाकूतीं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥१०॥
कर्दमेन प्रजा भूता मयि सम्भव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥११॥
आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ॥१२॥
आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१३॥

आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१४॥

ता म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ॥१५॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
श्रियः पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥१६॥

पद्मानने पद्मऊरू पद्माक्षि पद्मसम्भवे ।
तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम् ॥१७॥

अश्वदायी गोदायी धनदायी महाधने ।
धनं मे जुषतां देवि सर्वकामाँश्च देहि मे ॥१८॥

पुत्रपौत्रधनं धान्यं हस्त्यश्वादि गवे रथम् ।
प्रजानां भवसी माता आयुष्मन्तं करोतु मे ॥१९॥

दनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ।
धनमिन्द्रो बृहस्पतिर्वरुणं धनमश्विनौ ॥२०॥

वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥२१॥

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥२२॥

सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥२३॥

विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियां ।
विष्णोः प्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥२४॥

महालक्ष्मीं च विद्महे विष्णुपत्नीं च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥२५॥

पद्मानने पद्मिनि पद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ।
विश्वप्रिये विश्वमनोनुकूले त्वत्-पादपद्मं हृदि सन्निधत्स्व ॥
आनन्दः कर्दमःश्रीदश्चिक्लीत इति विश्रुताः ।
ऋषयः श्रियपुत्राश्च श्रीर्देवी देवता श्रिया ॥२७॥
श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात् पवमानं महीयते ।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥२८॥
ऋणरोगादि दारिद्र्यं पापक्षुदपमृत्यवः ।
भयशोकमनस्तापा नश्यन्तु मम सर्वदा ॥२९॥

ऋग्वेदोक्तं श्रीसूक्तं सम्पूर्णम् ॥

श्रीनवग्रह-स्तोत्रम्

जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम् ।
तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥१॥
दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम् ।
नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम् ॥२॥
धरणीगर्भसम्भूतं विद्युत्कान्ति-समप्रभम् ।
कुमारं शक्तिहस्तं तं मङ्गलं प्रणमाम्यहम् ॥३॥
प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम् ।
सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम् ॥४॥
देवानां च ऋषीणां च गुरुं काञ्चनसन्निभम् ।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥५॥
हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् ।
सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥६॥

नीलाञ्जनसमाभासं रविपुत्रं यमाग्रजम् ।
छायामार्तण्डसंभूतं तं नमामि शनैश्चरम् ॥७॥
अर्द्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् ।
सिंहिकागर्भसम्भूतं तं राहुं प्रणमाम्यहम् ॥८॥
पलाशपुष्पसंकाशं तारकाग्रहमस्तकम् ।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥९॥
इति व्यासमुखोद्गीतं यः पठेत् सुसमाहितः ।
दिवा वा यदि वा रात्रौ विघ्नशान्तिर्भविष्यति ॥१०॥
नरनारीनृपाणां च भवेद्दुः स्वप्ननाशनम् ।
ऐश्वर्यमतुलं तेषामारोग्यं पुष्टिवर्द्धनम् ॥११॥
ग्रहनक्षत्रजा पीडा तस्कराग्निसमुद्भवाः ।
ताः सर्वाः प्रशमं यान्ति व्यासो ब्रूते न संशयः ॥१२॥

श्री व्यासविरचितम् नवग्रह-स्तोत्रम् सम्पूर्णम् ।

गजेन्द्र-मोक्ष-स्तोत्रम्

श्रीशुक उवाच

एवं व्यवसितो बुद्ध्या समाधाय मनो हृदि ।
जजाप परमं जाप्यं प्राग्जन्मन्यनुशिक्षितम् ॥१॥

गजेन्द्र उवाच

ॐ नमो भगवते तस्मै यत एतच्चिदात्मकम् ।
पुरुषायादिबीजाय परेशायाभिधीमहि ॥२॥
यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम् ।
योऽस्मात् परस्माच्च परस्तं प्रपद्ये स्वयंभुवम् ॥३॥

यः स्वात्मनीदं निजमाययार्पितं, क्वचिद्विभातं क्व च तत्तिरोहितम् ।
अविद्धदृक् साक्ष्युभयं तदीक्षते स आत्ममूलोऽवतु मां परात्परः ॥४॥

कालेन पञ्चत्वमितेषु कृत्स्नशो लोकेषु पालेषु च सर्वहेतुषु ।
तमस्तदाऽऽसीद्गहनं गभीरं यस्तस्य पारेऽभिविराजते विभुः ॥५॥

न यस्य देवा ऋषयः पदं विदुर्जन्तुः पुनः कोऽर्हति गन्तुमीरितुम् ।
यथा नटस्याकृतिभिर्विचेष्टतो दुरत्ययानुक्रमणः स मावतु ॥६॥

दिदृक्षवो सस्य पदं सुमङ्गलं विमुक्तसङ्ग मुनयः सुसाधवः ।
चरन्त्यलोकव्रतमव्रणं वने भूतात्मभूताः सुहृदः समे गतिः ॥७॥

न विद्यते यस्य च जन्म कर्म वा न नामरूपे गुणदोष एव वा ।
तथापि लोकाप्यय-सम्भवाय यः स्वमायया तान्यनुकालमृच्छति ॥८॥

तस्मै नमः परेशाय ब्रह्मणेऽनन्तशक्तये ।
अरूपायोरुरूपाय नम अश्चर्यकर्मणे ॥९॥

नमः आत्मप्रदीपाय साक्षिणे परमात्मने ।
नमो गिरां विदूराय मनसश्चेतसामपि ॥१०॥

सत्वेन प्रतिलभ्याय नैष्कर्म्येण विपश्चिता ।
नमः कैवल्यनाथाय निर्वाण-सुख-संविदे ॥११॥

नमः शान्ताय घोराय मूढाय गुणधर्मिणे ।
निर्विशेषाय साम्याय नमो ज्ञानघनाय च ॥१२॥

क्षेत्रज्ञाय नमस्तुभ्यं सर्वाध्यक्षाय साक्षिणे ।
पुरुषायात्ममूलाय मूलप्रकृतये नमः ॥१३॥

सर्वेन्द्रियगुणद्रष्ट्रे सर्वं प्रत्ययहेतवे ।
असताच्छाययोक्ताय सदाभासाय ते नमः ॥१४॥

नमो नमस्तेऽखिलकारणाय निष्कारणायाद्भुतकारणाय ।
सर्वागमाम्नाय महार्णवाय नमोऽपवर्गाय परायणाय ॥१५॥

गुणारणिच्छन्न चिदूष्मपाय, तत्क्षोभविस्फूर्जितमानसाय ।
नैष्कर्म्यभावेन विवर्जितागम-स्वयं-प्रकाशाय नमस्करोमि ॥१६॥
मादृक्प्रपन्नपशुपाश-विमोक्षणाय, मुक्ताय भरिकरुणाय नमोऽलयाय ।
स्वांशेन सर्वतनुभृन्मनसि प्रतीत, प्रत्यग्दृशे भगवते बृहते नमस्ते ॥१७॥
आत्मात्मजाप्त-गृह वित्त-जनेषु सक्तैर्दुष्प्रापणाय गुण-सङ्ग-विवर्जिताय ।
मुक्तात्मभिः स्वहृदये परिभाविताय, ज्ञानात्मने भगवते नम ईश्वराय ॥१८॥
यं धर्मकामार्थ-विमुक्ति-कामाः भजन्त इष्टां गतिमाप्नुवन्ति ।
किं त्वाशिषो रात्यपि देहमव्ययं करोतु मेऽदभ्र दयो विमोक्षणम् ॥१९॥
एकान्तिनो यस्य न कञ्चनार्थं, वाञ्छन्ति ये वै भगवत्-प्रपन्नाः ।
अत्यद्भुतं तच्चरितं सुमङ्गलं, गायन्त आनन्दसमुद्र-मग्नाः ॥२०॥
तमक्षरं ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोग-गम्यम् ।
अतीन्द्रियं सूक्ष्ममिवाति-दूरमनन्तमाद्यं परिपूर्णमीडे ॥२१॥
यस्य ब्रह्मादयो देवो वेदा लोकाश्चराचराः ।
नाम-रूप-विभेदेन फल्व्या च कलया कृताः ॥२२॥
यथार्चिषोऽग्नेः सवितुर्गभस्तयो निर्यान्ति संयान्त्यसकृत्स्वरोचिषः ।
तथा यतोऽयं गुणसम्प्रवाहो बुद्धिर्मनः खानि शरीरसर्गाः ॥२३॥
स वै न देवासुरमर्त्य-तिर्यङ् न स्त्री न षण्ढो न पुमान्न जन्तुः ।
नायं गुणः कर्म न सन्न चासन्निषेधशेषा जयतादशेषः ॥२४॥
जिजीविषे नाहमिहामुया किमन्तर्बहिश्चावृतयेभयोन्या ।
इच्छामि कालेन न यस्य विप्लवस्तस्यात्मलोकावरणस्य मोक्षम् ॥२५॥
सोऽहं विश्वसृजं विश्वमविश्वं विश्ववेदसम् ।
विश्वात्मानमजं ब्रह्म प्रणतोऽस्मि परं पदम् ॥२६॥

योग-रन्धित-कर्माणो हृदि योग- विभाविते ।
योगिनो यं प्रपश्यन्ति योगेशं तं नतोऽस्म्यहम् ॥२७ ॥

नमो नमस्तुभ्यमसह्य-वेग-शक्ति-त्रयायाऽखिलधीगुणाय ।
प्रपन्न-पालाय दुरन्त-शक्तये कदिन्द्रियाणामनवाप्य वर्त्मने ॥२८ ॥

नायं वेद स्वमात्मानं यच्छक्त्याहं-धिया हतम् ।
तं दुरत्यय- माहात्म्यं भगवन्तमितोस्म्यहम् ॥२९ ॥

श्रीशुक उवाच

एवं गजेन्द्रमुपवर्णित-निर्विशेषं, ब्रह्मादयो विविधलिङ्गभिदा भिमानाः ।
नैते यदोप-ससृपुर्निखिलात्मकत्वा, त्तत्राखिलामरमयो हरिराविरासीत् ॥३० ॥
तं तद्वदार्त्तमुपलभ्य जगन्निवासः, स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः ।
छन्दोमयेन गरुडेन समुह्यमान, श्चक्रायुधोऽभ्यगमदाशु यतो गजेन्द्रः ॥३१ ॥
सोऽन्तः सरस्युरुबलेन गृहीत आर्तो, दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रम् ।
उत्क्षिप्यसाम्बुजकरंगिरमाह कृच्छ्रा, न्नारायणाखिलगुरो भगवन् नमस्ते ॥३२ ॥
तं वीक्ष्य पीडितमजः सहसावतीर्य, सग्राहमाशु सरसः कृपयोज्जहार ।
ग्राहाद्विपाटित-मुखादरिणा गजेन्द्रं, संपश्यतां हरिरमूमुचदुच्छ्रियाणाम् ॥३३ ॥

श्रीमद्भागवते अष्टमस्कन्धे गजेन्द्रमोक्षस्तोत्रं सम्पूर्णम् ॥

श्रीमच्छङ्कराचार्यविरचिता दशश्लोकी

न भूमिर्न तोयं न तेजो न वायु-
र्न खं नेन्द्रियं वा न तेषां समूहः ।

अनैकान्तिकत्वात् सुषुप्त्येकसिद्ध-
स्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥१ ॥

न वर्णा न वर्णाश्रमाचारधर्मा
न मे धारणाध्यानयोगादयोऽपि ।

अनात्माश्रयाहं ममाध्यासहानात्
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥२ ॥
न माता पिता वा न देवा न लोका
न वेदा न यज्ञा न तीर्थं ब्रुवन्ति ।
सुषुप्तौ निरस्तातिशून्यात्मकत्वात्
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥३ ॥
न साङ्ख्यं न शैवं न तत्पाञ्चरात्रं
न जैनं न मीमांसकादेर्मतं वा ।
विशिष्टानुभूत्या, विशुद्धात्मकत्वात्
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥४ ॥
न चोर्ध्वं न चाधो न चान्तर्न बाह्यं
न मध्यं न तिर्यङ् न पूर्वाऽपरा दिक् ।
वियद्व्यापकत्वादखण्डैकरूप-
स्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥५ ॥
न शुक्लं न कृष्णं न रक्तं न पीतं
न कुब्जं न पीनं न ह्रस्वं न दीर्घम् ।
अरूपं तथा ज्योतिराकारकत्वात्
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥६ ॥
न शास्ता न शास्त्रं न शिष्यो न शिक्षा
न च त्वं न चाहं न चायं प्रपञ्चः ।
स्वरूपावबोधो विकल्पासहिष्णु-
स्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥७ ॥

न जाग्रन्न मे स्वप्नको वा सुषुप्ति-
र्न विश्वो न वा तैजसः प्राग्यको वा ।
अविद्यात्मकत्वात् त्रयाणां तुरीय-
स्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥८॥

अपि व्यापकत्वाद्धितत्वप्रयोगात्
स्वतस्सिद्ध-भावादनन्याश्रयत्वात् ।
जगत्तुच्छमेतत् समस्तं तदन्यत्
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥९॥
न चैकं तदन्यद् द्वितीयं कुतस्स्यात्
न वा केवलत्वं न चाऽकेवलत्वम् ।
न शून्यं न चाशून्य-मद्वैतकत्वात्
कथं सर्ववेदान्तसिद्धं ब्रवीमि ॥१०॥

इति श्रीशङ्कराचार्यविरचिता दशश्लोकी ॥

श्रीहनुमान-चालीसा

दोहा— श्रीगुरुचरन सरोज रज, निजमनमुकुर सुधारि ।
बरनौं रघुबर विमल जस, जो दायक फल चारि ॥१॥
बुद्धिहीन तनु जानिकै, सुमिरौं पवनकुमार ।
बल बुधि विद्या देहु मोहि, हरहु कलेस विकार ॥२॥
जय हनुमान ज्ञानगुनसागर । जय कपीस तिहुँलोक उजागर ॥३॥
रामदूत अतुलित बलधामा । अंजनिपुत्र पवनसुत नामा ॥४॥
महाबीर विक्रम बजरंगी । कुमति निवारि सुमति के संगी ॥५॥
कंचनबरन बिराज सुबेसा । कानन कुंडल कुंचितकेसा ॥६॥

हाथ बज्र अरु ध्वजा बिराजै । काँधे मूँज-जनेऊ साजै ॥७॥
संकरसुवन केसरीनंदन । तेज प्रताप महा जगबंदन ॥८॥
विद्यावान गुनी अतिचातुर । राम-काज करिबेको आतुर ॥९॥
प्रभुचरित्र सुनिबेको रसिया । राम लखन सीता मनबसिया ॥१०॥
सूक्ष्मरूप धरि सियहिं दिखावा । विकटरूप धरि लंक जरावा ॥११॥
भीमरूप धरि असुर सँहारे । रामचंद्रके काज सँवारे ॥१२॥
लाय सजीवन लखन जिआए । श्रीरघुबीर हरषि उर लाए ॥१३॥
रघुपति कीन्हीं बहुत बड़ाई । कहा भरतसम तुम प्रिय भाई ॥१४॥
सहस बदन तुम्हरो जस गावैं । अस कहि श्रीपति कंठ लगावैं ॥१५॥
सनकादिक ब्रह्मादि मुनीसा । नारद सारद सहित अहीसा ॥१६॥
जम कुबेर दिगपाल जहाँ तें । कविकोविद कहि सकैं कहाँ तें ॥१७॥
तुम उपकार सुग्रीवहिं कीन्हा । राम मिलाय राजपद दीन्हा ॥१८॥
तुम्हरो मन्त्र विभीषण माना । लंकेश्वर भए सब जग जाना ॥१९॥
युग सहस्र जोजन पर भानू । लील्यो ताहि मधुर फल जानू ॥२०॥
प्रभुमुद्रिका मेलि मुखमाहीं । जलधि लांघि गए अचरज नाहीं ॥२१॥
दुर्गम काज जगतके जेते । सुगम अनुग्रह तुम्हरे तेते ॥२२॥
राम दुआरे तुम रखवारे । होत न आग्या बिन पैठारे ॥२३॥
सब सुख लहैं तुम्हारी सरना । तुम रक्षक काहूको डरना ॥२४॥
आपन तेज सम्हारौ आपै । तीनों लोक हाँकते काँपै ॥२५॥
भूत पिचास निकट नहिं आवै । महावीर जब नाम सुनावै ॥२६॥
नासै रोग हरै सब पीरा । जपत निरन्तर हनुमत बलबीरा ॥२७॥
संकट ते हनुमान छुड़ावै । मन क्रम बचन ध्यान जो लावै ॥२८॥
सबपर राम तपस्वी राजा । तिनके काज सकल तुम साजा ॥२९॥
अवर मनोरथ जो कोई लावै । तासु अमित जीवन फल पावै ॥३०॥

चारों युग परताप तुम्हारा । है परसिद्ध जगत उजियारा ॥३१ ॥
साधु संतके तुम रखवारे । असुर निकन्दन रामदुलारे ॥३२ ॥
अष्टसिद्धि नवनिधि के दाता । अस वर दीन्ह जानकी मांता ॥३३ ॥
राम रसायन तुम्हरे पासा । सादर तुम रघुपति के दासा ॥३४ ॥
तुम्हरे भजन रामको भावै । जन्म जन्मके दुःख विसरावै ॥३५ ॥
अंतकाल रघुपति पुर जाई । जहाँ जनमि हरिभक्त कहाई ॥३६ ॥
अवर देवता चित्त न धरई । हनुमत सेइ सर्व सुख करई ॥३७ ॥
संकट कटै मिटै सब पीरा । जो सुमिरत हनुमत बलबीरा ॥३८ ॥
जय जय जय हनुमान गोसाईं । कृपा करौ गुरूदेवकी नाईं ॥३९ ॥
यह सतबार पाठ कर जोई । छूटहि बन्दि महा सुख होई ॥४० ॥

फलश्रुति—

जो यह पढ़ै हनुमान चालीसा । होय सिद्धि साखी गौरीसा ॥४१ ॥
तुलसीदास सदा हरि चेरा । कीजै नाथ हृदय महँ डेरा ॥४२ ॥

दोहा— पवन-तनय संकटहरन मंगलमूरति रूप ।
रामलखन सीतासहित, हृदय बसहु सुरभूप ॥
श्रीहनुमान चालीसा संपूर्ण ।

श्रीसंकटमोचन-हनुमानाष्टक

बाल समै रवि लीलि लियो तब, तीनहुँ लोक भयो अँधियारो ।
ताहि सो त्रास भयो जगको यह, संकट काहुसों जात न टरो ॥
देवन आय करी विनती तब, छाँड़ि दियो रवि कष्ट निवारो ।
को नहिं जानत है जगमें कपि, संकटमोचन नाम तिहारो ॥१ ॥
बालिके त्रास कपीस बसे, गिरि जात महाप्रभु पंथ निहारो ।
चौंकि महामुनि साप दियो तब, चाहिय कौन उपाय विचारो ॥

कै द्विजरूप लै आए महाप्रभु, सो तुम तासुको संकट टारो ।को० ॥२ ॥

अंगदके सँग कीस अनेक गये, सिय खोज कपीस उचारो ।
जीवित ना बचिहौं हमसों जु, बिना सुधि लै इतको पगु धारो ॥
हेरि थके तटसिन्धु सबै तब, लाय सिया सुधि प्रान उबारो ।को० ॥३ ॥

रावन त्रास दियो सियको तब, रक्षक ह्वै करि सोक निवारो ।
ताहि समै हनुमान महाप्रभु, जाय महा रजनीचर मारो ॥
माँगत सीय असोक सों आगि सु, दै प्रभुमुद्रिका सोक निवारो ।को० ॥४ ॥

बान लग्यो उर लछिमन के तब, प्रान तज्यो सुत रावन मारो ।
लै गृह वैद्य सुषेन समेत, तबै गिरिद्रोन सुबीर उपारो ॥
लाय सजीवन श्री हनुमान सु, लछमन के तुम प्रान उबारो ।को० ॥५ ॥

रावन जुद्ध प्रयान कियो तब, नाग कि फाँस सबै सिर डारो ।
श्रीरघुनाथ समेत सबै दल, देखिकै मोह भयो अतिभारो ॥
आनि खगेस तबै हनुमान, सुबंधन काटि कलेस निवारो ।को० ॥६ ॥

बन्धुसमेत जबै अहिरावन, लै रघुनाथ पताल सिधारो ।
देविहि पूजि भली विधि सों, बलिदेन दोऊ जन मंत्र विचारो ॥
जाय सहाय भये तबहीं, अहिरावन सैन्य समेत सँहारो ।को० ॥७ ॥

काज किये बड़ देवनके तुम बीर महाप्रभु देखि विचारौ ।
कवन सो संकट मोर गरीबको, जो तुमसों नहिं जात है टारो ॥
बेगि हरो हनुमान महाप्रभु, जो कछु संकट होय हमारो ।को० ॥८ ॥

दोहा—लाल देह लाली लसै, अरु धरि लाल लँगूर ।
बज्रदेह दानवदलन, जय जय जय कपिसूर ॥

श्रीसंकटमोचन हनुमानाष्टक संपूर्ण

सप्तश्लोकी गीता

ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥१ ॥
स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघाः ॥२ ॥
सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥३ ॥
कवि पुराणमनुशासितारमणोरणीयां समनुस्मरेद्यः ।
सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात् ॥४ ॥
ऊर्ध्वमूलमधः शाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥५ ॥
सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदश्च सर्वैरहमेव वेद्यो वेदांतकृद्वेदविदेव चाहम् ॥६ ॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्यैवमात्मानं मत्परायणः ॥७ ॥

श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे ।
श्रीकृष्णार्जुनसम्वादे सप्तश्लोकी गीता सम्पूर्णा ॥

चतुःश्लोकी भागवत

ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम् ।
सरहस्यं तदङ्गञ्च गृहाण गदितं मया ॥
यावानहं यथाभावो यद्रूपगुणकर्मकः ।
तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ॥

अहमेवासमेवाग्रे नान्यद्यत् सदसत्परम् ।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥

इति महात्म्यम् ॥

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि ।
तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः ॥१ ॥

तथा महान्ति भूतानि भूतेषूच्चावचेष्वनु ।
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥२ ॥

एतावदेव जिज्ञास्यं तत्वजिज्ञासुनाऽऽत्मनः ।
अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ॥३ ॥

एतन्मतं समातिष्ठ परमेण समाधिना ।
भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित् ॥४ ॥

श्रीमद्भागवते महापुराणे द्वितीयस्कन्धे चतुःश्लोकी भागवतम् सम्पूर्णम् ॥

एकश्लोकी रामायण

आदौ रामतपोवनादिगमनं हत्वा मृगं काञ्चनं
वैदेहीहरणं जटायुमरणं सुग्रीवसम्भाषणम् ।
बालीनिग्रहणं समुद्रतरणं लङ्कापुरीदाहनं
पश्चाद्रावणकुम्भकर्णहननमेतद्धिरामायणम् ॥१ ॥

गरुड स्तुति

श्रीविष्णुवाहं प्रणमामि भक्त्या सर्पाशनं दुःखहरं खगेशम् ।
मनोहरं वायुसमानवेगं छन्दोमयं ज्ञानघनं प्रशान्तम् ॥

विष्णुपत्राय शान्ताय बलबुद्धियुताय च ।
पक्षीन्द्रायातिवेगाय गरुडाय नमोनमः ॥

श्रीहनुमत्स्तुतिः

मनोजवं मारूततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ॥
उल्लङ्घ्य सिन्धोः सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिराञ्जनेयम् ॥

अन्नपूर्णा-स्तुतिः

अन्नपूर्णे सदापूर्णे शङ्कर-प्राण-वल्लभे ।
ज्ञान-वैराग्य-सिद्ध्यर्थं भिक्षां देहि च पार्वती ॥

कालिका-स्तुतिः

काली काली महाकाली कालिके परमेश्वरी ।
सर्वानन्द-करे देवि नारायणि नमोऽस्तु ते ॥

शीतला-स्तुतिः

शीतले त्वं जगन्माता शीतले त्वं जगत्पिता ।
शीतले त्वं जगद्धात्री शीतलायै नमोनमः ॥

पीपल-स्तुतिः

अश्वत्थ हुतभुग्वाम गोविन्दस्य सदाप्रिय ।
अशेषं हर मे पापं वृक्षराज नमोऽस्तु ते ॥

तुलसी-स्तुतिः

देवैस्त्वं निर्मिता पूर्वमर्चितासि मुनीश्वरैः ।
नमो नमस्ते तुलसि पापं हर हरिप्रिये ॥

सरस्वती स्तुतिः

शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं
वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम् ।
हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥१॥
या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥२॥
सुधासिंधोर्मध्ये सुरविटपवाटीपरिवृत्ते
मणिद्वीपे नीपोपवनवति चिंतामणिगृहे ।
शिवाकारे मंचे परमशिवपर्यङ्कनिलयां
भजन्ति त्वां धन्याः कतिचन चिदानंदलहरीम् ॥३॥

विष्णुस्तुतिः

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥४॥
प्रातः स्मरामि भवभीतिमहार्तिशान्त्यै
नारायणं गरुडवाहनमब्जनाभम् ।
ग्राहाभिभूतवरवारणमुक्तिहेतुं
चक्रायुधं तरुणवारिजपत्रनेत्रम् ॥५॥

श्रीद्वादशज्योतिर्लिङ्ग स्तुति

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् ।
उज्जयिन्यां महाकालमोंकारममलेश्वरम् ॥
परल्यां वैद्यनाथं च डाकिन्यां भीमशङ्करम् ।
सेतुबन्धे तु रामेशं नागेशं दारुकावने ॥
वाराणस्यां तु विश्वेशं त्र्यम्बकं गौतमीतटे ।
हिमालये तु केदारं घुसृणेशं च शिवालये ॥
एतानि ज्योतिर्लिङ्गानि सायं प्रातः पठेन्नरः ।
सप्तजन्मकृतं पापं स्मरणेन विनश्यति ॥६ ॥

अमृत-संजीवन-स्तोत्रम्

अथापरमहं वक्ष्येऽमृत-संजीवनं स्तवम् ।
यस्यानुष्ठानमात्रेण मृत्युर्दूरात्पलायते ॥१ ॥
असाध्याः कष्टसाध्याश्च महारोगा भयंकराः ।
शीघ्रं नश्यन्ति पठनादस्यायुश्च प्रवर्धते ॥२ ॥
शाकिनी डाकिनी दोषाः कुदृष्टिः ग्रहशत्रुजाः ।
प्रेत-बेताल-यक्षोत्था बाधा नश्यन्ति चाखिलाः ॥३ ॥
दुरितानि समस्तानि नाना जन्मोद्भवानि च ।
संसर्गजविकाराणि विलीयन्तेऽस्य पाठतः ॥४ ॥
सर्वोपद्रवनाशाय सर्वबाधांप्रशान्तये ।
आयुः प्रवृद्धये चैतत् स्तोत्रं परममद्भुतम् ॥५ ॥
बालग्रहाभिभूतानां बालानां सुखदायकम् !
सर्वारिष्टहरं चैतद् बलपुष्टिकरं परम् ॥६ ॥

बालानां जीवनायैतत् स्तोत्रं दिव्यं सुधोपमम् ।
मृतवत्सत्वहरणं चिरंजीवित्वकारकम् ॥७ ॥
महारोगाभिभूतानां भयव्याकुलितात्मानाम् ।
सर्वाधि-व्याधिहरणं भयघ्नममृतोपमम् ॥८ ॥
अल्पमृत्युश्चापमृत्युः पाठादस्य प्रणश्यति ।
जलानि विषशस्त्रारि-नखि-शृङ्गि भयं तथा ॥९ ॥
गर्भरक्षाकरं स्त्रीणां बालानां जीवनप्रदम् ।
महारोगहरं नृणामल्पमृत्युहरं परम् ॥१० ॥
बालाः वृद्धाश्च तरुणाः नरा नार्यश्च दुःखिताः ।
भवन्ति सुखिनः पाठादस्य लोके चिरायुषः ॥११ ॥
अस्मात्परतरं नास्ति जीवनोपाय ऐहिकम् ।
तस्मात्सर्वप्रयत्नेन पाठमस्य समाचरेत् ॥१२ ॥
अयुतावृत्तिकं वाऽथ सहस्रावृत्तिकं तथा ।
तदर्धं वा तदर्धं वा पठेदेतच्च भक्तितः ॥१३ ॥
कलशे विष्णुमाराध्य दीपं प्रज्वाल्य यत्नतः ।
सायं प्रातश्च विधिवत् स्तोत्रमेतत् पठेत्सुधीः ॥१४ ॥
सर्पिषा हवि षाऽपि संयाबेनाथ भक्तितः ।
दशांशमानतो होमं कुर्यात् सर्वार्थसिद्धये ॥१५ ॥

नमो नमो विश्वविभावनाय
नमो नमो लोकसुखप्रदाय ।
नमो नमो विश्वसृजेश्वराय
नमो नमो मुक्तिवरप्रदाय ॥१६ ॥

नमो नमस्तेऽखिललोकपाय ।
नमो नमस्तेऽखिलकामदाय ।
नमो नमस्तेऽखिलकारणाय
नमो नमस्तेऽखिलरक्षकाय ॥१७॥

नमो नमस्ते सकलार्तिहन्त्रे
नमो नमस्ते विरुजप्रकर्त्रे ।
नमो नमस्तेऽखिलविश्वधर्त्रे
नमो नमस्तेऽखिललोकभर्त्रे ॥१८॥

सृष्टं देव चराचरं जगदिदं ब्रह्मस्वरूपेण ते ।
सर्वं तत्परिपाल्यते जगदिदं विष्णुस्वरूपेण ते ।
विश्वं संहृयते तदेव निखिलं रुद्रस्वरूपेण ते ।
संसिच्यामृतसीकरैर्हर महारिष्टं चिरंजीवय ॥१९॥

यो धन्वन्तरि संज्ञया निगदितः क्षीराब्धितो निस्सृतः
हस्ताभ्यां जनजीवनाय कलशं पीयूषपूर्णं दधत् ।
आयुर्वेदमरीरचज्जनरुजां नाशाय सत्वं मुदा
संसिच्यामृतसीकरैर्हर महारिष्टं चिरंजीवय ॥२०॥

स्त्रीरूपं वरभूषणाम्बरधरं त्रैलोक्यसंमोहनं
कृत्वा पाययति स्म यः सुरगणान् पीयूषमत्युत्तमम् ।
चक्रे दैत्यगणान् सुधाविरहितान् संमोह्य सत्वं मुद
संसिच्यामृतसीकरैर्हर महारिष्टं चिरंजीवय ॥२१॥

चाक्षुषोदधिसंप्लाय भूवेदय झषाकृते ।
सिञ्च सिंचामृतकणैः चिरंजीवय जीवय ॥२२॥

पृष्ठमन्दरनिर्घूर्णनिद्राक्षकमठाकृते ।
सिञ्च सिञ्चामृतकणैः चिरंजीवय जीवय ॥२३॥
याञ्चा छलवति त्रासमुक्तनिर्जरवामन ।
सिञ्च सिंचामृतकणैः चिरंजीवय जीवय ॥२४॥
धरोद्धारहिरण्याक्ष घातक्रोडाकृते प्रभो ।
सिंच सिंचामृतकणैः चिरंजीवय जीवय ॥२५॥
भक्तत्रासविनाशात्तु चण्डत्वनृहरे विभो ।
सिंच सिंचामृतकणैः चिरंजीवय जीवय ॥२६॥
क्षत्रियारण्यसंछेद कुठारकररैणुक ।
सिंच सिंचामृतकणैः चिरंजीवय जीवय ॥२७॥
रक्षोराजप्रताब्धिशोषणाशुगराघव ।
सिंच सिंचामृतकणैः चिरंजीवय जीवय ॥२८॥
भूभारासुरसंदोहकालाग्ने रुक्मिणीपते ।
सिंच सिंचामृतकणैः चिरंजीवय जीवय ॥२९॥
वेदमार्गरतानर्ह विभ्रान्त्यै बुधरूपधृक् ।
सिंच सिंचामृतकणैः चिरंजीवय जीवय ॥३०॥
कलिवर्णाश्रमास्पष्टं धर्मध्यैर्कल्किरूपभाक् ।
सिंच सिंचामृतकणैः चिरंजीवय जीवय ॥३१॥
असाध्याः कष्टसाध्या ये महारोगा भयंकराः ।
छिन्धि तानाशु चक्रेण चिरंजीवय जीवय ॥३२॥
अल्पमृत्युं चापमृत्युं महोत्पातानुपद्रवान् ।
भिन्धि भिन्धि गदाघातैश्चिरंजीवय जीवय ॥३३॥

अहं न जाने किमपि त्वदन्यत्
समाश्रये नाथ पदाम्बुजं ते ।
कुरुष्व तद्यन्मनसीप्सितं ते
सुकर्मणा केन समक्षमीयाम् ॥३४॥

त्वमेव तातो जननी त्वमेव
त्वमेव नाथश्च त्वमेव बंधुः ।
विद्याधनागारकुलं त्वमेव
त्वमेव सर्वं मम देव देव ॥३५॥

न मेऽपराधं प्रविलोकय प्रभो-
ऽपराधसिन्धोश्च दयानिधिस्त्वम् ।
तातेन दुष्टोऽपि सुतः सुरक्ष्यते
दयालुता तेऽवतु सर्वदाऽस्मान् ॥३६॥

अहह विस्मर नाथ न मां सदा
करुणया निजया परिपूरितः ।
भुवि भवान् यदि मे नहि रक्षकः
कथमहो मम जीवनमत्र वै ॥३७॥

दह दह कृपया त्वं व्याधिजालं विशालं
हर हर करवालं चाल्पमृत्योः करालम् ।
निजजनपरिपालं त्वां भजे भावयालं
कुरु कुरु बहुकालं जीवितं मे सबालम् ॥३८॥

न यत्र धर्माचरणं न दानं
व्रतं न यागो न च विष्णुचर्चा ।
न पितृगोविप्रवरामरार्चा
स्वल्पायुषस्तत्र जना भवन्ति ॥३९॥

ॐ क्लीं श्रीं क्लीं श्रीं नमो भगवते जनार्दनाय
सकलदुरितानि नाशय क्षेमारोग्यं कुरु करु
ह्रीं दीर्घमायुर्देहि देहि स्वाहा ।
अस्य धारणतो जापादल्पमृत्युः प्रशाम्यति ।
गर्भरक्षाकरं स्त्रीणां बालानां जीवनं परम् ॥४० ॥
शतं पञ्चाशतं शक्त्याऽथवा पञ्चाधिविंशतिम् ।
पुस्तकानां द्विजेभ्यस्तु दद्याद्दीर्घायुषाप्तये ॥४१ ॥
भूर्जपत्रे विलिख्येदं कण्ठे वा बाहूमूलके ।
संधारयेदं गर्भरक्षा बालरक्षा च जायते ॥४२ ॥
सर्वे रोगाः विनश्यन्ति सर्वाबाधा प्रशाम्यति ।
कुदृष्टिजं भयं न स्यान्नच प्रेतादिजं भयम् ॥४३ ॥
मया कथितमेतत्तेऽमृतसंजीवनं परम् ।
अल्पमृत्यु हरं स्तोत्रं मृतवत्सत्वनाशनम् ॥४४ ॥

इति सुदर्शनसंहितायाममृतसंजीवनस्तोत्रम् ।

यह स्तोत्र पं. श्री मक्खनलालजी शर्मा ज्योतिषाचार्य द्वारा अनुभूत है ।

श्रीविष्णुअपामार्जन स्तोत्र

श्रीविष्णुअपामार्जन स्तोत्र, भविष्य पुराणान्तर्गत दाल्भ्य और पुलस्त्य ऋषि का संवाद है। जारण, मारण, भूत, प्रेत, पिशाच, डाकिनी, शाकिनी आदि एवं अन्य विविध प्रकार के रोगों से पीडित मनुष्यों के कष्ट निवारणार्थ दाल्भ्य ऋषि ने पुलस्त्य ऋषि से उपाय पूछा था। पुलस्त्य जी ने विष्णु अपामार्जन विधि संसार के कल्याण के लिए बतलाई। यह उपाय बहुत सरल और सद्यः फलदायक है इस विधि के अनुसार मार्जन करने से भयंकर रोगों से मनुष्य मुक्त होकर दीर्घायु पाता है। इसका माहात्म्य अवर्णनीय है। इसके पठन तथा श्रवण से सब प्रकार के शोक दुःखादि का नाश होता है और सब सौभाग्य ऐश्वर्यादि की बृद्धि होती है। हृदय रोगियों के लिए यह स्तोत्र अति उत्तम है। इसकी विधि इस प्रकार है—

धान्य के ढेर पर अब्रण कलश की स्थापना कर पूजन करे। तत्पश्चात् जलपूर्ण कलश के ऊपर एक साथ एक सौ दर्भा [कुशा] बांध कर रखे। फिर कलश के ऊपर पूर्ण पात्र एवं सुपारी रख कर वहां वराह, नृसिंह वामन और विष्णु इन चार नामों से षोडशोपचार पूजन करे। फिर मुष्टिबंध शत कुशाओं से, कलश के जल से रोगी का मार्जन करे। मार्जन विधि के पूर्व लिखे अनुसार दिग्बंध एवं न्यास विधि करे। पश्चात् स्तोत्र पठन करते हुये मार्जन करे। ११, २१, ५१, १०१, दिनों का प्रयोग करने से भयंकर से भयंकर रोग दूर हो जाते हैं। यह अनुभव सिद्ध उपाय है। आशा करता हूँ कि श्रद्धालु जन इससे लाभान्वित होंगे।

उपरोक्त प्रसंग ज्योतिषाचार्य पं. श्री मखनलालजी द्वारा कई बार का अनुभूत है।

— संपादक

दाल्भ्य उवाच ।

भगवन् प्राणिनः सर्वे विषरोगाद्युपद्रवैः ।
दुष्टग्रहोपघातैश्च सर्वकाल समुद्भवैः ॥१ ॥
आभिचारक कृत्यैश्च स्पर्शरोगैश्च दारुणैः ।
सदा संपीड्यमानास्ते तिष्ठंति मुनिसत्तम ॥२ ॥
येन कर्मविपाकेन ग्रहरोगाद्युपद्रवाः ।
न भवंति नृणां तन्मे यथावद्वक्तुमर्हसि ॥३ ॥

श्री पुलस्त्य उवाच

व्रतोपवासैर्यैर्विष्णुं नान्यजन्मनि तोषितः ।
ते नराः मुनिशार्दूल दुःख रोगादि भागिनः ॥४ ॥
यैर्व्रतं प्रणवं चित्ते सर्वदाहिकृतो नरैः ।
विषग्रहज्वराणां ते सर्वदा दाल्भ्य भागिनः ॥५ ॥
आरोग्यं परमामृद्धिं मनसा यद्यदिच्छति ।
तत्तदाप्नोत्यसंदिग्धं परत्राऽच्युत तोषकृत् ॥६ ॥
नाधिं प्राप्नोति न व्याधिं न विषं ग्रहबन्धनम् ।
कृत्यास्पर्शभयं वापि तोषिते मधुसूदने ॥७ ॥
सर्व दुष्टं समं तस्य सौम्यास्तस्य सदाग्रहाः ।
देवानामव्ययंधुर्यो तुष्टो यस्यः जनार्दनः ॥८ ॥
यः समः सर्व भूतेषु यथाऽत्मनि तथापरे ।
उपवासादिना येन तोषितो मधुसूदनः ॥९ ॥
तोषितेनैव जायंते नराः पूर्ण मनोरथाः ।
अरोगाः सुखिनो भोग भोक्तारो मुनिसत्तम ॥१० ॥

न तेषां शत्रवो नैव स्पर्श रोगाभिचारकाः ।
ग्रह रोगादिकं वापि पापकार्यं न जायते ॥११॥
अव्याहतानि कृष्णस्य चक्रादीन्यायुधानि च ।
रक्षंति सकलाऽपद्भ्यो येन विष्णुरुपासितः ॥१२॥

श्री दाल्भ्य उवाच

अनाराधित गोविन्दो ये नरा दुःख भागिनः ।
तेषां दुःखाभिभूतानां यत्कर्तव्यं दयालुना ॥१३॥
पश्यद्भिः सर्व भूतस्थं वासुदेवं महामुने ।
समदृष्ट्या हृषीकेशं तन्मम ब्रूह्यशेषतः ॥१४॥

पुलस्त्य उवाच

सौवर्णं राजतं ताम्रं मृण्मयं वा नवं दृढम् ।
अव्रणं कलशं शुद्धं स्थापयेत्तंडुलोपरि ॥१५॥
तत्रोदकं समानीय शुद्धं निर्मलमेव च ।
शतमेकं कुशानां च साग्रं तस्योपरिन्यसेत् ॥१६॥
वराहं नारसिंहं च वामनं विष्णुमेव च ।
पूजयेत्तत्र कलशे उपचारैः समंत्रकैः ॥१७॥
विरंचिना सहोत्पन्न परमेष्ठि निसर्गतु ।
दहंतु सर्वपापानि दर्भः स्वस्ति करो भवेत् ॥१८॥
कुशमूलेस्थितो ब्रह्मा कुशमध्ये जनार्दनः ।
कुशाग्रे शंकरं विद्यात्त्रयो देवाः कुशे स्थिताः ॥१९॥
गृहित्वा तु समूलाग्रान्कुशान्छुद्धान् नृप स्पृशेत् ।
मार्जयेत्सर्व गात्राणि कुशाग्रैर्दाल्भ्य शांतिकृत् ॥२०॥

शरीरे यस्य तिष्ठति कुशायाः जलबिन्दवः ।
तैर्नश्यंति च पापानि गरुडेनैव पन्नगाः ॥२१॥
विष्णु भक्ति विशेषेण शुचिस्तद्गतमानसः ।
रोगग्रह विनाशार्थं कुर्याच्छांतिमिमां शुभाम् ॥२२॥
नारसिंहं समभ्यर्च्य शुद्धौ देशे कुशासने ।
मंत्रैरेतैर्यथालिंगं कुर्याद्दिग्बंधमद्भुतम् ॥२३॥
पूर्वे नारायणः पातु वारिजाक्षस्तु दक्षिणे ।
प्रद्युम्नः पश्चिमे पातु वासुदेवस्तथोत्तरे ॥२४॥
ईशान्यां पातु श्रीविष्णुराग्नेयां तु जनार्दनः ।
नैऋत्यां पद्मनाभस्तु वायव्यां मधुसूदनः ॥२५॥
ऊर्ध्वं गोवर्धनो देवो ह्यधरायां त्रिविक्रमः ।
एताभ्यो दशदिग्भ्यस्तु शर्वतः पातु केशवः ॥२६॥
जले रक्षतु वाराहः स्थले रक्षतु वामनः ।
अटव्यां नारसिंहश्च सर्वतः पातु केशवः ॥२७॥
अंगुष्ठाग्रे तु गोविन्दं तर्जन्यां तु महीधरम् ।
मध्यमायां हृषीकेशमनामिक्यां त्रिविक्रमम् ॥२८॥
कनिष्ठिक्यां न्यसेद्विष्णुं करमध्ये तु माधवम् ।
एवं न्यासं पुराकृत्वा पश्चादंगेषु विन्यसेत् ॥२९॥
शिखायां केशवं न्यस्य मूर्ध्निनारायणं न्यसेत् ।
माधवं च ललाटे तु गोविन्दं वै भ्रुवोर्न्यसेत् ॥३०॥
चक्षुषोर्मध्ययोर्विष्णुं कर्णयोर्मधुसूदनम् ।
त्रिविक्रमं कपोले तु वामनं कर्ण मूलयोः ॥३१॥

नासारंध्रद्वये चैव श्रीधरं कल्पयेद्बुधः ।
उत्तरोष्ठे हृषीकेशं पद्मनाभं तथाधरे ॥३२॥
दामोदरं दंतपंक्तौ वाराहं चुबुके न्यसेत् ।
जिह्वायां वासुदेवं च तालौ तु गुरूडध्वजम् ॥३३॥
वैकुंठं कंठ मध्ये तु अनंतं नासिकोपरि ।
दक्षिणे तु भुजे विप्र विन्यसेत् पुरुषोत्तमम् ॥३४॥
वामे भुजे महायोगं राघवं हृदि विन्यसेत् ।
भुजांतरे तु विश्वेशं ग्रीवायामव्ययं न्यसेत् ॥३५॥
वक्षस्थले श्रीनिवासं कुक्षयोः कामदं न्यसेत् ।
जठरे देव देवेशं स्तनयोः परमेष्ठिनम् ॥३६॥
पार्श्वयोः पुष्कराक्षं च सर्वतो विश्वरूपिणम् ।
पीतांबरं सर्वतनौ हरिं नाभौ तु विन्यसेत् ॥३७॥
दक्षिणे तु करे विप्र ततः संकर्षणं न्यसेत् ।
वामे रिपुहरं विद्यात्कटि मध्येऽपराजितम् ॥३८॥
पृष्ठे क्षितिधरं विद्यादच्युतं स्कंधयोस्तथा ।
माधवं वामकुक्षौ तु दक्षिणे जलशायिनम् ॥३९॥
स्वयंभुवं मेढ्र मध्ये उर्वोश्चैव गदाधरम् ।
जानुद्वये चक्रधरं जंघयोरच्युतं न्यसेत् ॥४०॥
गुल्फयोर्नारसिंहं च पादपृष्ठेऽमितौजसम् ।
श्रीधरं चांगुलिषु च पद्माक्षं सर्व संधिषु ॥४१॥
न्यसेत्तु माधवं देहे न्यसेत्पादतलेऽच्युतम् ।
रोमकूपे गुडाकेशं कृष्णं मज्जासुरक्तके ॥४२॥

मनोबुद्धिरहंकारे चित्तेत्वथ जनार्दनः ।
एवं न्यासविधिं कृत्वा साक्षान्नारायणो भवेत् ।।४३ ।।
तनुर्विष्णु मयो यस्य यावत्किंचित्स भाषते ।
एवं न्यासं पुरा कृत्वा यत्कार्य शृणुतद्विज ।।४४ ।।
पादमूले तु देवस्य न्यसेच्छंखं तु निर्मलम् ।
वनमालां हृदि न्यस्य सर्व देवाभि पूजिताम् ।।४५ ।।

अथाङ्ग न्यासः

ॐ नमो भगवते विष्णवे सर्व क्लेशापहर्त्रे हृदयाय नमः
ॐ नमो भगवते विष्णवे सर्व क्लेशापहर्त्रे शिरसे स्वाहा
ॐ नमो भगवते विष्णवे सर्व क्लेशापहर्त्रे शिखायै वषट् ।
ॐ नमो भगवते विष्णवे सर्व क्लेशापहर्त्रे कवचाय हुम् ।
ॐ नमो भगवते विष्णवे सर्व क्लेशापहर्त्रे नेत्रत्रयाय वौषट् ।
ॐ नमो भगवते विष्णवे सर्व क्लेशापहर्त्रे अस्त्राय फट् ।

एवमेव करादिषडंग न्यासं कृत्वा पुनः हृदयादि षडंग न्यासं करणीयम् । तद्यथा—

ॐ नमो भगवते वासुदेवाय हृदयाय नमः ।
ॐ नमो नारायणाय नरोत्तमाय शिरसे स्वाहा ।
ॐ नमो केशवायादि शार्ङ्गिणे शिखायवषट् ।
ॐ नमो दामोदराय देवाय कवचाय हुम् ।
ॐ नमो ऋग्यजुः साममूर्तये नेत्रत्रयायवौषट् ।
ॐ नमो पुरुषोत्तमाय हूँ फट् अस्त्राय फट् ।

आपाद मस्तके चैव विन्यसेत् पुरूषोत्तमम् ।
अपामार्जनको न्यासः सर्वपाप विनाशनः ॥४६ ॥
विष्णुरूर्ध्वमधः पातु वैकुंठस्तुविदिग्दिशि ।
पातु मां सर्वतो रामो धन्वी चक्री च केशवः ॥४७ ॥
अपामार्जनको न्यासः सर्वव्याधिविनाशनः ।
आत्मनश्च परस्यापि विधिरेषः उदाहृतः ॥४८ ॥
वैष्णवेन तु कर्तव्यं सर्वसिद्धि प्रदायकम् ।
पूजाकाले तु देवस्य जपकाले तथैव च ॥४९ ॥
होमारंभेषु सर्वेषु त्रिसंद्यासु च सर्वशः ।
यद्यच्छुभतरं लोके तत्सर्वं प्राप्नुयाद् ध्रुवम् ॥५० ॥
आयुरारोग्य मैश्वर्यमरिपक्षक्षयः सुखम् ।
अभयं सर्वभूतेभ्यो विष्णुलोकं स गच्छति ॥५१ ॥

विनियोग—अस्य श्री अपामार्जनस्तोत्रमाला मंत्रस्य पुलस्त्य ऋषिः श्री वराह नृसिंह वामन देवताः अनुष्टुब्वृहत्तनुर्वृहती छंदांसि हरि मुकुन्देतिबीजं अच्युतानंद गोविन्देति शक्तिः तप्त हाटक केशांतेति बीजं ज्वलत्पावक लोचनेति कवचं वज्रायुध नखस्पर्शेंति व्यापकं ॐ ह्रां ह्रीं ह्रूँ फट् स्वाहेति अस्त्रं मम पापक्षयार्थ क्षिप्रारोग्यावापत्यर्थ अपामार्जन जपे विनिगोगः ।

अथ ध्यानम्

अथ ध्यानं प्रवक्ष्यामि सर्वपापप्रणाशनम् ।
वराह रूपिणं देवं संस्मरन्नर्चयेज्जपन् ॥५२ ॥
बृहत्तनुं बृहद्गात्रं बृहद्दंष्ट्रा सुशोभितम् ।
समस्त देव देवांगैर्युक्तांगं भूषणैर्युतम् ॥५३ ॥

उद्धृत्य भूमिं पातालाद्धस्ताभ्यामनुगृहीतः ।
आलिंग्य भूमिः सहसा मूर्ध्निजिघ्रंतमच्युतम् ॥५४ ॥
रत्न वैदूर्य मुक्तादि भूषणैरुपशोभितम् ।
पीतांबरधरं देवं शुक्लगंधानुलेपनम् ॥५५ ॥
त्रयस्त्रिंशद्देवताभिस्तूयमानं दिवानिशम् ।
नृत्यद्भिरप्सरोभिश्च गीयमानं च किन्नरैः ॥५६ ॥
एवं ध्यात्वा समात्मानं जपेन्नित्यमतंद्रितः ।
सुवर्णमंडपे संस्थं पद्मं ध्यायेत्सकेशवम् ॥५७ ॥
सकर्णिक दलैः स्पष्टमष्टभिः परिशोभितम् ।
कलंक रहितं देवं पूर्णचन्द्र समप्रभम् ॥५८ ॥
तडित्समजटाशोभि स्कंधेनाति विशोभितम् ।
श्रीवत्सांकित वक्षं तं तीक्ष्णदंष्ट्रा सुशोभितम ॥५९ ॥
वनमालादि शोभाढ्यं मुक्ताहारोपशोभितम् ।
पंकजास्यं महाबाहुं तप्तहेमाभ लोचनम् ॥६० ॥
प्रातः सूर्यं समप्रेक्ष्य कुंडलाभ्यां विराजितम् ।
केयूरकांतिसंस्पर्द्धि मुद्रिका रत्नशोभितम् ॥६१ ॥
जपाकुसुम संकाशस्तुतहस्ततलान्वितम् ।
पद्मासन समारूढं हेमपट्ट समाश्रितम् ॥६२ ॥
पीतवस्त्रपरीधानं शुक्लवस्त्रोत्तरीयकम् ।
कटिसूत्रेण हेमेन नूपुरेण विराजितम् ॥६३ ॥
जानूपरि न्यस्तकरं चातिरक्त नखांकुरम् ।
मुक्ताभरण संयुक्तं रत्नकंकणकैर्युतम् ॥६४ ॥

चतुर्थी चंद्रसंकाश सुदंष्ट्र मुखपंकजम् ।
अतिरक्तोष्ठवदनं रक्तास्यमतिभीषणम् ॥६५॥
वामांकस्थश्रियं भक्त शांतिदं तुंग रोहिणीम् ।
अर्हिणीं रक्तपादां च सुनासां शुभ लक्षणम् ॥६६॥
सुभ्रं सुकेशीं सुश्रोणीं सुभुजां सद्विजाननाम् ।
सुप्रतिष्ठां सुदंती च चतुर्हस्तां विचिन्तयेत् ॥६७॥
दुकूले नाति चार्वंगीं हारिणीं सर्वकामदाम् ।
तप्त कांचन संकाशां सर्वाभरण भूषिताम् ॥६८॥
सुवर्ण कलश प्रख्य पीनोन्नत पयोधराम् ।
गृहीत मातु लुंगाभ्यामुद्बाहुभ्यामथान्ययोः ॥६९॥
गृहीत पद्मयुगुलां जांबूनद करान्विताम् ।
एवं देवी! नृसिंहस्य वामांके परिचिंतयेत् ॥७०॥
अतिसुललितगात्रं रुक्मपात्रस्थमन्नम् ।
सुललित दधिखंडं पाणिना दक्षिणेन ॥
कलशममृतपूर्णं वाम हस्ते दधानम् ।
तरति सकल दुःखं वामनं भावयेद्यः ॥७१॥
अभ्रश्यामः शुभ्रयज्ञोपवीती सत्कौपीनः पीतकृष्णाजिनश्रीः
छत्री दंडी पुंडरीकायताक्षी पायाद्देवो वामनो ब्रह्मचारी ॥७२॥
नीलोत्पलदलश्यामं पीतांबरधरं हरिम् ।
शंख चक्र गदा पाणिं ध्यात्वाऽपामार्जनं जपेत् ॥७३॥
ॐ नमः परमार्थाय पुरषाय महात्मने ।
अरूप बहु रूपाय व्यापिने परमात्मने ॥७४॥

निः कल्मषाय शुद्धाय ध्यातृपापहराय च ।
नमस्कृत्वा प्रवक्ष्यामि यत्तसिद्ध्यतुमेव च ॥७५ ॥
नारायणाय विश्वाय विश्वरूप धराय च ।
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतुमेव च ॥७६ ॥
बराहाय नृसिंहाय वामनाय च विष्णवे ।
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतुमेव च ॥७७ ॥
गोविंदं पद्मनाभाय वासुदेवाय शार्ङ्गिणे ।
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतुमेव च ॥७८ ॥
त्रिविक्रमाय रामाय अनंताय महात्मने ।
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतुमेव च ॥७९ ॥
दामोदराय देवाय अनंताय महात्मने ।
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतुमेव च ॥८० ॥
हिरण्य गर्भपतये हिरण्यकशिपु च्छिदे ।
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतुमेव च ॥८१ ॥
भक्तिप्रियाय विभवे विष्वक्सेनाय शार्ङ्गिणे ।
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतुमेव च ॥८२ ॥
चक्र हस्ताय शूराय तार्क्ष्यपत्राय विष्णवे ।
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतुमेव च ॥८३ ॥
दैत्यारये उपेंद्राय भूतानां जीवनाय च ।
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतुमेव च ॥८४ ॥
हयग्रीवाय शर्वाय हृषीकेष हराय च ।
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतुमेव च ॥८५ ॥

नारसिंह महासिंह तस्मैतुभ्यं नमो नमः ।
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतुमेव च ॥८६ ॥
नमस्ते देवदेवेश सुरासुर नमस्कृत ।
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतुमेव च्च ॥८७ ॥
योगेश्वराय रूढाय गुह्याय परमात्मने ।
नमस्कृत्वा प्रवक्ष्यामि यत्तसिद्ध्यतुमेव च ॥८८ ॥
विष्टरश्रवसे तुम्यं क्षीरांभोनिदिशायिने ।
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतुमेव च ॥८९ ॥
जनार्दनाय कृष्णाय उपेंद्रश्रीधराय च ।
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतुमेव च ॥९० ॥
अधोक्षजाय भद्राय श्रीधरायात्ममूर्तये ।
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतुमेव च ॥९१ ॥
प्रद्युम्नं चानिरुद्धं च पुरुषोत्तम केशवम् ।
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतुमेव च ॥९२ ॥
कृष्णाय वासुदेवाय हरये परमात्मने ।
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतुमेव च ॥९३ ॥
सच्चिदानंदरूपाय योगिने परमात्मने ।
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतुमेव च ॥९४ ॥
गदिने पद्महस्ताय चक्रहस्ताय ते नमः ।
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिद्ध्यतुमेव च ॥९५ ॥
वाराहेश नृसिंहेश वामनेश त्रिविक्रमे ।
हयग्रीवेश सर्वेश ऋषीकेश हराऽशुभम् ॥९६ ॥

अपराजितश्च चक्राद्यैश्चतुर्भिः परमायुधैः ।
अखंडितानुभावस्त्वं सर्व दुःख हरोभव ॥९७॥
हरामुकस्य दुरितं दुष्कृतं दुरुपासितम् ।
मृत्युं बंधार्ति भयदं दुरितस्य च यत्फलम् ॥९८॥
परापध्यान सहितं प्रयुक्तं चाभिचारकम् ।
गरस्पर्श-महारोग प्रयोगं जरयाजर ॥९९॥
ॐ नमो वासुदेवाय नमः कृष्णाय शार्ङ्गिणे ।
नमः पुष्करनेत्राय केशवायादि चक्रिणे ॥१००॥
ॐ नमो नारसिंहाय विद्युज्वालाय खड्गिने ।
नमः कमल किंजल्क पीत निर्मल वाससे ॥१०१॥
महाहयरिपुस्कन्ध धृष्ट चक्राय चक्रिणे ।
दंष्ट्रोधृत क्षितिभृते त्रिमूर्तिपतये नमः ॥१०२॥
महायज्ञ वराहेश शेषभोगांश शायिने ।
गदिने पद्म हस्ताय वराहाय नमो नमः ॥१०३॥
बज्रायुध नखस्पर्श दिव्यसिंह नमोस्तु ते ।
महावीराय देवाय ऋग्यजुः साममूर्तये ॥१०४॥
नमोस्तु वटवे तुभ्यं बलिगर्वहराय वै ।
तुभ्यं वामनरूपाय क्रमते गां नमो नमः ॥१०५॥
वराहवेष दुष्टानि शर्वपापानि नो हर ।
मर्द मर्द महादंष्ट्र मर्द मर्द च यत्फलम् ॥१०६॥
नारसिंह करालास्य दंतप्रोत नकोज्वल ।
भंज भंज निनादेन दुष्टान्यस्यार्ति नाशय ॥१०७॥

ऋग्यजुः सामगर्भाभिर्योहि वामनरूप धृक् ।
प्रशमं सर्व दुःखानां नयत्याशु जनार्दनः ॥१०८॥

विनयोग—अथ ज्वरमंत्रस्य कालाग्नि ऋषिः महादेवो देवता
अनुष्टुप् छंदः सकलज्वर सांत्यर्थं जपे विनियोगः ॥
आद्यंतवंतश्च पुराण साराः सूक्ष्मा बृहंतो ह्यनुशासितारः ।
सर्वान् ज्वरान् ध्वन्तु ममानिसारः प्रद्युम्न संकर्षण वासुदेवः ॥१०९॥

ज्वर गायत्री

ॐ भस्मायुदाय विद्महे । एक दंष्ट्राय धीमहि । तन्नोज्वरः प्रचोदयात् ।
त्रिपात् भस्म प्रहरणो यो महादिव्य लोचनः ।
स मे प्रीतिसुखं दद्यात्सर्वामयपतिर्ज्वरः ॥११०॥

एकांहिकं द्वयांहिकं च तनोत्रिदिवसं ज्वरम् ।
चातुर्थकं तथात्युग्रं तथैव सततं ज्वरम् ॥१११॥

त्रिदोषो सन्निपातोत्थ तथैवागंतुक ज्वरः ।
शमनं यातु गोविंद छिंधि छिंध्यस्य वेदनाम् ॥११२॥

नेत्र दुःखं शिरो दुःखं दुःखं चोदर संभवम् ।
अतिश्वासमतिश्वास परितापस वेपथुः ॥११३॥

गुद्घ्राणांघ्रिरोगाश्च कुष्ठरोगस्तथाक्षयम् ।
कामलादि तथा रोगान् प्रमेहांश्चाति दारुणाम् ॥११४॥

येवात प्रभवाः रोगाः ये च पित्तसमुद्भवाः ।
कफोद्भवाश्च ये के चिदेचान्ये सान्निपातिकाः ॥११५॥

आगंतुकाश्च ये रोगाः लूत विस्फोटकादयः ।
ते सर्वे प्रशमं यांति वासुदेवायमार्जिताः ॥११६॥
विलयं यांति ते सर्वे विष्णोरुच्चारणेन तु ।
क्षयं गच्छंतिचाशेषश्चकेणापिहता हरे ॥११७॥
अच्युतानंत गोविंद नामोच्चारण भेषजम् ।
नश्यंति सकलारोगाः सत्यं सत्यं वदाम्यहम् ॥११८॥
अच्युतेति नमः पूतमनंतेतिवचः पुनः ।
गोविंदेति तनोः पूतमज्ञानं ज्ञात पातकैः ॥११९॥
स्थावरं जंगमं वापि कृत्रिमं चापिया द्विषम् ।
दंतोद्भूतं नखोद्भूतं आकाशप्रभवं विश ॥१२०॥
भूतादिप्रभवंयच्च विषमत्यंत दुःखदम् ।
शमनं याति तत्सर्व कीर्तिते वै जनार्दनम् ॥१२१॥
ग्रहाः प्रेतग्रहाश्चैव तता वैनायकाः ग्रहा ।
वेतालाश्च पिशाचाश्च गंधर्वायक्ष राक्षसाः ॥१२२॥
शाकिनि पूतनाद्याश्च तता वै डाकिनी ग्रहाः ।
मुखमंडलिकान् क्रूरान् रेवती वृद्ध रेवतीन् ॥१२३॥
वृद्धिकाख्या ग्रहाश्चोग्रा तथा मातुग्रहा अपि ।
बालस्य विष्णोश्चरितं हंतु बालग्रहानपि ॥१२४॥
वृद्धानां ये ग्रहाः केचिद्देव बालग्रहाः क्वचित् ।
नारसिंहं तु ते दृष्ट्वा द्रुतं यांतु महावने ॥१२५॥
सटा कराल वदनो नारसिंहो महाबलः ।
महाग्रहानशेषान्निःशेषान्करोतु जगतांपतिः ॥१२६॥

नारसिंह महासिंह ज्वाला मालोज्वलानन ।
ग्रहानशेषान् खादध्व पाहि देवाग्निलोचन ॥१२७॥
ये रोगा: ये महोत्पाता: यद्विषं ये महाग्रहा: ।
चक्रुर्भूतानि यां पीडां गृहपीडां सुदारुणाम् ॥१२८॥
शस्त्रक्षिप्तेषु ये रोगा: ज्वालागर्दभकादय: ।
यान्श्चिक्रश्च भूतानि प्राण पीडा कराणि च ॥१२९॥
तानि सर्वाणि सर्वात्मन् परमात्मन् जनार्दन ।
किंचिद्रूपं समास्थाय वासुदेवाऽशुनाशय ॥१३०॥
क्षिप्त्वा सुदर्शनं चक्रं ज्वालामालाति भीषणम् ।
सर्वदुष्ट प्रशमनं कुरु देववराऽच्युत ॥१३१॥
सुदर्शनं महाचक्रं गोविंदस्य करायुधम् ।
तीक्ष्णधारं महातेजं सूर्यकोटि समप्रभम् ॥१३२॥
त्रैलोक्य रक्षाकर्तुश्च दुष्ट दानव दारुणम् ।
सुदर्शन महाज्वाल छिंधि छिंधि महाज्वरम् ॥१३३॥
छिंधि छिंधि महाव्याधीन् छिंधि छिंधि महाग्रहान ।
छिंधि वातं च भूतं च घोरं छिंधि महद्विषम् ॥१३४॥
रूजं दाहं च शूलं च नाशय ज्वालगर्दभम् ।
हा हा हुं हुं फट् फट् द्वयं हन हन द्विष: ॥१३५॥

सुदर्शनचक्र महामंत्र

ॐ नमो भगवते भो भो सुदर्शन दुष्टं दारय दारय दुरितं हन हन पापं मथ मथ आरोग्यं कुरु कुरु हा हा हुं हुं फट् स्वाहा ठं ठं हन हन द्विष: ।

तैलोक्यरक्षा कर्तात्वमरयापय जनार्दन ।
सर्व दुष्टानि रक्षांसि क्षयं यांत्वति भीषणाः ॥१३६ ॥
प्राच्यां रक्ष प्रतीच्यां च दक्षिणोत्तरयोस्तथा ।
रक्षां करोतु भगवान् नारसिंहः स्वगर्जितैः ॥१३७ ॥
दिवि भुम्यंतरिक्षे च पार्श्वतः पृष्ठतस्तथा ।
रक्षां करोतु भगवान् बहुरूपी जनार्दनः ॥१३८ ॥
यथा विष्णुर्जगत्सर्वं सदेवासुरमानुषैः ।
तेन सत्येन सकलं दुष्टं यत्तत्प्रशाम्यतु ॥१३९ ॥
यथा विष्णुस्मृतौ सत्यां संक्षयं याति पातकम् ।
तेन सत्येन सकलं यन्मयोक्तं तथास्तु तत् ॥१४० ॥
अपामार्जनकं शस्त्रं विष्णोः नामाभिमंत्रितम् ।
एतत्समस्तरोगेषु भूतग्रहभयेषु च ॥१४१ ॥
ये ते कुशाः विष्णु शरीर संभवाः जनार्दनोहं स्वयमेव चागतः ।
हंतुं महादुष्टमशेषशेषं सत्यो भवत्वेषवच्चो यथा हरिः ॥१४२ ॥
शांतिरस्तु शिवंचास्तु दुष्टमस्य प्रशाम्यतु ।
यदस्य दुरितं किंचित्प्रक्षिप्तं लवणार्णवे ॥१४३ ॥
स्वास्थ्यमस्तु सदैवास्तु हृशीकेशस्य कीर्तनात् ।
यत एवागतं पापं तत्रैव प्रतिगच्छतु ॥१४४ ॥
एतद्रोगादि पीडाषु जंतूनां हितकाम्यया ।
विष्णुभक्तेन कर्तव्यं अपामार्जनकं जपम् ॥१४५ ॥
अनेन सर्वदुःखानि प्रशमं यांत्यशेषतः ।
सर्वभूत हितार्थाय कुर्यात्तस्मात्सदैव हि ॥१४६ ॥

कुर्यात्तस्मात्सदैवत्यो पाठोऽयं दुःखनाशनम् ।
विष्णुभक्तेन सततं ब्रह्महत्यादि नाशनम् ॥१४७॥
विष्णोः प्रीतिकरं चैव यः पठेन्नियमेन तु ।
विष्णुलोकमवाप्नोति सत्यं सत्यं न चान्यथा ॥१४८॥
य इदं श्रावयेद्विद्वान् श्रध्दाभक्ति समन्वितः ।
ग्रहास्तस्यापसर्पन्ति न रोगो न च राक्षसा ॥१४९॥
धन्यो यशस्वी शत्रुघ्नस्तवोयं मुनिसत्तम ।
पठतांश्रृण्वतां चैव ददाति परमां गतिम् ॥१५०॥

इति श्री भविष्योत्तर पुराणे दाल्भ्य पुलस्त्य संवादे श्रीविष्णुधर्मोत्तरं अपामार्जनस्तोत्रं सम्पूर्णम् ।

विविध-विषय

(१) चारवेद—

ऋग्वेद, यजुर्वेद, (शुक्ल तथा कृष्ण यजुर्वेद) सामवेद, अथर्ववेद, यही चार वेद कहे जाते हैं।

(२) चार उपवेद—

आयुर्वेद, धनुर्वेद, गन्धर्ववेद, तथा तंत्रशास्त्र या अर्थशास्त्र, ये चार उपवेद कहे जाते हैं।

(३) मुख्य १० उपनिषद्—

ईषावास्योपनिषद, केनोपनिषद्, कठोपनिषद, प्रश्नोपनिषद, मुण्डकोपनिषद्, माण्डूक्योपनिषद्, तैत्तिरीयोपनिषद्, ऐतरेयोपनिषद्, छान्दोग्योपनिषद, तथा बृहदारण्यकोपनिषद्।

यही १० मुख्य उपनिषद् कहे गये हैं।

(४) अष्टादश पुराण—

ब्रह्मपुराण, पद्मपुराण, विष्णुपुराण, शिवपुराण, भागवतपुराण, नारदपुराण, मार्कण्डेयपुराण, अग्निपुराण, भविष्यपुराण, ब्रह्मवैवर्त्तपुराण, लिंगपुराण, वाराहपुराण, स्कन्दपुराण, वामनपुराण, कूर्मपुराण, मत्स्यपुराण, गरुड़पुराण, तथा ब्रह्माण्डपुराण।

ये अठारह पुराण कहे गये हैं।

(५) अष्टादश उपपुराण—

सनत्कुमार, बृहन्नारद, नरसिंह, शिवधर्मोत्तर, दुर्वासा, कपिल, मानव, उशनस, वारुण, ब्रह्माण्ड, कालिका, वशिष्ठ, माहेश्वर, साम्ब, सौर, पाराशर, मारीच, तथा भार्गव, यही अठारह वेदमय उपपुराण कहे गये हैं।

(६) षड्दर्शन तथा उनके प्रवर्त्तक—

१ सांख्यशास्त्र-कपिलमुनि
२ योगशास्त्र-महर्षि पतञ्जलि
३ वैशेषिकशास्त्र-कणाद
४ तर्क (न्याय) शास्त्र-गौतम
५ पूर्वमीमांसा- जैमिनी
६ वेदान्तशास्त्र (उत्तरमीमांसा) भगवान वेदव्यास

(७) बीस स्मृतियाँ—

वैसे स्मृतियाँ अनेक हैं, किन्तु मुख्य इस प्रकार हैं—

याज्ञवल्क्य, उशना, अंगिरा, यम, आपस्तम्ब, संवर्त, मनु, अत्रि, विष्णु, हारीत, कात्यायन, बृहस्पति पाराशर, व्यास, शङ्ख लिखित, दक्ष, गौतम, शातातप और वशिष्ठ ।

(८) पञ्च ज्ञानेन्द्रिय तथा उनके विषय—

१ तैजस चक्षु रूप (काला पीला आदि)
२ आकाशीय कान शब्द (वर्णात्मक एवं ध्वन्यात्मक)
३ पार्थिव नाक गन्ध (सुगन्ध एवं दुर्गन्ध)
४ जलीय जीभ रस (खट्टा, मीठा, आदि षड्रस)

(९) अष्टाङ्गयोग—

यम, नियम आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान, समाधि ।

(१०) अष्ट सिद्धियाँ—

१. अणिमा (छोटे से छोटा होना), २. महिमा (बड़े से बड़ा होना), ३. लघिमा (अत्यधिक हल्का होना), ४. गरिमा (अत्यधिक भारी होना), ५. प्राप्ति (जहाँ इच्छा हो वहाँ पहुँचना), ६- प्राकाम्य (सभी

तरह पूर्णता का अनुभव), ७. ईशित्व(अत्यधिक सामर्थ्यवान होना), ८. वशित्व (सबको वश में कर लेने की क्षमता)

(११) नव निधियाँ—

महापद्म, पद्म, शंख, मकर, कच्छप, मुकुन्द, कुन्द, नील, खर्व ।

(१२) नवरस—

शृंगार, वीर, करुण, अद्भुत, हास्य, भयानक, बीभत्स, रौद्र, शान्त ।

(१३) नवग्रह—

सूर्य,चंद्र,मंगल, बुध, गुरु, शुक्र शनिश्चर,राहु, केतु ।

(१४) नवधाभक्ति—

श्रवण, कीर्तन, स्मरण, पादसेवन, अर्चन, वन्दन, दास्य, सख्य, आत्मनिवेदन ।

(१५) त्रिलोक—

स्वर्गलोक, मर्त्यलोक, पाताललोक ।

(१६) चौदहलोक—

१ भूर्लोक, २-भुवर्लोक, ३-स्वर्लोक, ४-महर्लोक, ५-जनलोक, ६-तपोलोक,७ -सत्यलोक, (यह सात ऊपर के लोक हैं)

१- अतल, २-वितल, ३-सुतल, ४-तलातल, ५-महातल, ६-रसातल, ७-पाताल, (यह सात अधोलोक हैं)

(१७) दशदर्भ—

कुश, काश, शर (सरकण्डा) , दूर्वा, यव (जौ), गेहूँ, बलवज, स्वर्ण, रजत, ताम्र ।

(१८) दशमहादान—

सुवर्ण, तिल, हाथी, दासी, रथ, पृथ्वी, भवन, कन्या, कपिलागाय, दुग्धवती गाय ।

(१९) चार पुरुषार्थ—

धर्म, अर्थ, काम , मोक्ष ।

(२०) तीन ताप—

आध्यात्मिक, आधिभौतिक, आधिदैविक ।

(२१) पञ्च कर्मेन्द्रिय और उसके कार्य—

१. वाग (बोलना), २. हाथ (लेना देना) , ३. पाँव, (चलना फिरना), ४. मूत्रेन्द्रिय, (पेशाब करना), ५. गुदा (मलत्याग करना) ।

(२२) द्वादश आदित्य—

धाता, अर्यमा, मित्र, वरुण, अंश, भग, सविता, विवस्वान, पूषा, त्वष्टा, रुद्र, विष्णु ।

(२३) सप्तर्षि—

गौतम, भारद्वाज, विश्वामित्र, कश्यप, जमदग्नि, वशिष्ठ, अत्रि ।

(२४) पञ्चोपचार—

ध्यान, आवाहन, निवेदन, नीराजन, प्रणाम ।

(२५) सप्त नदियाँ—

गंगा, यमुना, गोदावरी, सरस्वती, नर्मदा, सिन्धु, कावेरी ।

(२६) सप्त मोक्षपुरियाँ—

अयोध्या, मथुरा, माया (हरिद्वार), काशी, काञ्ची, (शिवकाञ्ची, विष्णुकाञ्ची), अवन्तिका (उज्जैन), द्वारिका ।

(२७) चारधाम—

बद्रिकाश्रम, द्वारिका, जगन्नाथपुरी, सेतुबन्धरामेश्वर ।

(२८) चार प्रकार के जीव—

स्वेदज, अण्डज, जरायुज, उद्भिज ।

(२९) शंख, गोमतीचक्र, सुदर्शनचक्र, नर्मदेश्वर, सूर्ययन्त्र, वाणलिंग, शालग्राम, इनकी प्रतिष्ठा नहीं होती है ।

(३०) शिवजी को विल्वपत्र, विष्णु को तुलसी, गणेश को दूर्वाङ्कुर। दुर्गा को गुडहल (जवाकुसुम), सूर्यको लाल कनेर के पुष्प बहुत प्रिय होते हैं।

(३१) देवपूजन में जिस द्रव्य की कमी हो उस द्रव्य का स्मरण करके अक्षत से काम ले सकते हैं।

(३२) जिन्हें खल्वाट दोष के कारण शिखा नहीं हो, उन्हे ब्रह्मग्रन्थि के सहित कुशाकी शिखा धारण करा सकते हैं।

(३३) जिसकी तीन पीढ़ियों के नाम गोत्र की जानकारी नहीं हो उन्हें कन्यादान, पितृश्राद्ध, आदि में सम्मिलित नहीं करना चाहिये।

हमारे शास्त्रों में अतिथि सत्कारके लिये बहुत आग्रह किया गया है। विष्णु,दक्ष, यम, व्याघ्रपाद आदि अनेक महर्षियोंने अपनी अपनी स्मृतियों में अतिथि सेवा का बड़ा महत्व बताया है। अत: गृहस्थ को 'अतिथि देवोभव' की श्रद्धा करके अतिथि सत्कार करना ही चाहिये। लिखा है:—

अतिथिः पूजितोयेन पूजिता:सर्वदेवता: ।
अतिथिर्यस्य सन्तुष्टस्तस्य तुष्टो हरिः स्वयम् ॥

(३४) पवित्र पर्वत —

हिमालय, विन्ध्याचल, पारिजात, मलयगिरि, महेन्द्राचल, शुक्तिमान चित्रकूट, ऋक्षवान, सह्यगिरि, ऋष्यमूक, माल्यवान, श्रीशैल या मल्लिकार्जुन, अरुणाचल, रैवतगिरि, कामगिरि या कामाख्या, रामगिरि या रामटेक, गोवर्धन।

(३५) सप्त बदरी —

आदिबदरी, ध्यानबदरी, बृद्धबदरी, भविष्यबदरी, योगबदरी, नृसिंह बदरी, श्रीबदरीनाथधाम।

(३६) पञ्च केदार—

श्री केदारनाथ, श्री मध्यमेश्वर, श्री तुङ्गनाथ, श्री रुद्रनाथ, श्रीकल्पेश्वर।

(३७) पञ्चसरोवर—

मानसरोवर, विन्दुसरोवर, नारायण सरोवर, पम्पासरोवर, पुष्कर सरोवर।

(३८) सप्त क्षेत्र —

कुरुक्षेत्र, हरिहरक्षेत्र, प्रभास क्षेत्र, भृगुक्षेत्र, पुरुषोत्तमक्षेत्र, नैमिष क्षेत्र, गया क्षेत्र ।

(३९) द्वादश अरण्य —

दण्डकारण्य, विन्ध्यारण्य, पुष्करारण्य नैमिषारण्य, कुरुजाङ्गल, उत्पलावर्तकारण्य, जम्बुकारण्य, अर्बुधारण्य, हिमवदारण्य, धर्मारण्य, वेदारण्य, सैन्धवारण्य ।

(४०) स्त्रियों को अपने हाथ से शालग्राम का पूजन नहीं करना चाहिये । ब्राह्मण द्वारा करा लेना उचित है ।

अन्त्यवेला निर्देश

(४१) अन्तवेला में गोदान कराना, रुद्राक्ष धारण कराना, मुँह में तुलसी-गंगाजल डालना और प्राणहीन होने पर दक्षिण की ओर सिर करके शव को लिटाना । मृत्युबेला में उपनिषद्, गीता या धर्मग्रंथ का पाठ करने का विधान है, मंत्रों की ध्वनि से तादात्म में मृत्यु आसान हो जाती है ।

इसके लिए विहित दो प्रसिद्ध मंत्र हैं:

(१)सर्वं खल्विदं ब्रह्म तज्जलानिति उपासीताथ खल क्रतुमयः पुरुषों यथाक्रतुरस्मिल्लोके पुरुषो भवति ।तथेतः प्रेत्य भवति स क्रतुं कुर्वीत ।

यह सब कुछ ब्रह्म है । उसी को प्रारम्भ, मध्य और अंत मानते हुए उसका ध्यान करना चाहिए, मनुष्य अपनी इच्छा का स्वामी है, वह जो अंतिम समय में चाहेगा, वही आगे होगा । इसलिए वह इच्छा करे कि में ब्रह्मभूत हो जाऊँ । छान्दोग्य उपनिषद् ३/१४/१

(२) ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥

जो ओमरूप एकाक्षर ब्रह्म का उच्चारण करता हुआ और मुझे स्मरण करता हुआ प्राण छोड़ता है, वह परम गति को प्राप्त होता है ।

पूजा की सामान्य सामग्री

पंच पल्लव— बड़, पीपल, आम, पाकड़, गूलर ।

पंच रत्न— स्वर्ण, हीरा-मोती, पुखराज, नीलम ।
अथवा—स्वर्ण, चाँदी, ताँबा, भूँगा, मोती ।

पंच गव्यमू १ भाग गोबर, २ भाग गोमूत्र, ४ भाग दूध, २ भाग घृत, २ भाग दही ।

पंचामृत— गाय का दूध (यथेच्छ) तथा दही, घृत, मधु, चीनी (समभाग)

पञ्चधान्य— तिल, मूँग, जौ, उड़द, चावल ।

सप्तधान्य— चावल, जौ, गेहूँ, मूँग, तिल, काँगनी, उड़द ।

सप्तमृत्तिका— घोड़ा, हाथी, राजद्वार, गौ, नदी संगम चौरास्ता तालाब बाल्मीक । इन स्थानों की मृत्तिका ।

सर्वौषधि— मुरा, जटामांसी, वच, कूट, शिलाजीत, हल्दी, दारुहल्दी, आमला, श्वेत चंदन, नागरमोथा ।

नवसमिधा— आक, ढाक, खैर, ऊँगा, पीपल, गूलर, जांट, दूर्बा, कुश ।

नव रत्न — माणिक, मोती, मूँगा, पन्ना, पुखराज, हीरा, नीलम, गोमेद, लहसुनिया । नवग्रहों के क्रमशः यही रत्न हैं ।

सांकल्पिक श्राद्ध— कुशा २, कुशाकी पवित्री १, तीन कुशाओं की पवित्री १, तीनकुशाओं का मोटक १, चावल, तिल, पीली सरसों, चंदन, श्वेत पुष्प, पान, सुपारी, लवंग, इलायची, यज्ञोपवीत, धोती-अंगोछा, मधु, दक्षिणा, भोजन सामग्री ।

तर्पण— आसन १, जलपात्र १, टोपिया १, तिल, जौ, चावल, पवित्री २, मोटक १, कुश, पुष्प, चंदन, अर्घा ।

देवपूजा— शंख, घंटा, पंचपात्र १, आचमनी १, अर्घ पात्र, जलकलश १, आसन १, दीपक १, धूपदानी १, धूप, रोली, मोली (नाल) चंदन, घृत, चीनी, यज्ञोपवीत, चावल, काजल, गेहूँ, सफेद-लालकपड़ा, दूध, दही, रूई, दियासलाई, मिठाई, पुष्प, पुष्पमाला, दूर्वा, पंचपल्लव, तुलसी, शहद, सिन्दूर, अबीर, गुलाल, सुपारी, पान, सप्तधान्य, सर्वौषधि, सप्तमृत्तिका, पंचरत्न, पीली सरसों, कपूर, केशर, अतर, लौंग, इलायची, नारियल, सकोरा, कलश ।

1658

परमहंस पण्डित गणेशनारायण जी का संस्मरण

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुः साक्षात्परब्रह्म तस्मै श्रीगुरवे नमः ॥

राजस्थान के मरुस्थल ने अद्भुत शूरवीर योद्धा, सती, विद्वान, कवि, विश्व प्रमुख उद्योगपतियों को जन्म दिया। इसी क्रम में चिडावे के प्रसिद्ध परमहंस महात्मा गणेश जी महाराज का जन्म जयपुर राज्य के अन्तर्गत नवलगढ़ के पास 'बुगाला' ग्राम में खण्डेलवाल ब्राह्मण वंश में हुआ। आप के पिता का नाम पं. घडसीराम (घनश्यामदयन) जी था। बाल्यकाल में ही आपके पू. पिता श्रीघनश्याम दास जी सपरिवार नवलगढ़ चले आये और यहीं पण्डित रुड़ेन्द्र जी शास्त्री से आपने अध्ययन किया। आप परिश्रमी एवं मेधावी होने के साथ ही अलौकिक प्रतिभा के धनी भी थे। अल्पकाल में ही आपने व्याकरण, ज्योतिष एवं वेद की विभिन्न शाखाओं का सम्यक् अभ्यास कर लिया था। अभी शिक्षा का कार्य पूर्ण नहीं हो सका था कि वैवाहिक संस्कार भी करा दिया गया। परन्तु आप अत्यन्त विरक्त जीवन व्यतीत करते रहे। विवाह के कुछ काल के उपरान्त ही आप गृहस्थाश्रम से विरक्त होकर चिडावा चले आये। आप सदैव नीला वस्त्र धारण करते। एक लगुड़ (डंडा) तथा हांडी सदैव साथ रखते थे। अपने इन दो साधनों के बल से वे त्रैलोक्य की सत्ता का सुख अपने भक्तों को दिया करते थे। इसके अनेक संस्मरण, प्रत्यक्षदर्शियों द्वारा कथा के रूप में सुनने को मिलते रहते हैं। अपने भक्तों के स्मरण मात्र से उनके पास आप ही आप पहुँच जाना सामान्य सी बात थी। एक बार का प्रसंग है, चिडावा पाठशाला के प्रधान आचार्य पं. रामजी लाल जी शास्त्री अपने शिष्यों को ज्योतिष विषयक कोई प्रसंग पढ़ा रहे थे। कुछ पदों का अध्यापन पूर्ण होने के बाद किसी एक पद के सन्दर्भ में आचार्य रामजी लालजी शास्त्री ने कहा— इस पद का सन्दर्भ पं. गणेश जी महाराज से विचार करेंगे। इतना कहा ही था कि अप्रत्याशित रूप से पं. गणेशनारायण जी महाराज विद्यालय में पहुँच गये और कहा, पण्डित ! क्या विचार करना है और स्वतः

658

ज्योतिष का एक प्रसंग सुनाना शुरु कर दिया जो मौलिक प्रसंग का उत्तरार्ध ही था। आचार्य जी ने अपने शिष्यों को सम्बोधित करते हुए कहा—ऋषियों, यही सिद्ध योग तथा इसी को सिद्ध पुरुष कहते हैं। ज्ञातव्य हो कि आचार्य जी अपने विद्यार्थियों को ऋषियों से सम्बोधित करते थे।

आपके आशीर्वाद से आंज विश्व के कोने-कोने में अनेक लोग फलित पूरित जीवन व्यतीत कर रहे हैं। बिरला परिवार की वैभवसाधना भी पं. गणेशनारायण जी महाराज की कृपा का प्रत्यक्ष फल है।

स्व. सेठ जुगलकिशोरजी बिडला से आपका विशेष प्रेम था। वे उनसे बहुत ही घुल मिलकर बातें करते थे। एक बार श्री बिडलाजी उनके पास गये तब पंडितजी ने कहा—'रे जुगल ! आज तो तेरा शुभ दिन है।' सेठजी ने यह सुनकर अच्छा मुहूर्त जान कलकत्ता के लिए सीधे प्रस्थान कर दिया, उन दिनों नारनौल रेलगाड़ी लगती थी। सेठजी ने अपना रथ नारनौल वाले रास्ते पर डाल दिया। चाँदनी रात थी। रास्ते में दायीं तरफ उनको काला सर्प फन उठाये बैठा मिला जो उनके लिए अच्छा शकुन था, परंतु सेठजी उसे अपशकुन समझ कर वापस गये। उन्हें देखते ही पंडितजी ने वापिस आने का कारण पूछा तो उन्होंने सर्प वाली घटना कह सुनाई। पंडित जी बोले "जुगल किशोर ! तूने गलती करी। चला जाता तो चक्रवर्ती बनता, जा अब भी तेरी कीर्ति सर्वत्र फैलेगी।"करणी बरणी चालू रखना भाग जा।

एक बार नवलगढ़ का सेठ पाटोदिया संयोग से रुग्ण हो कर पंडितजी की सेवा में लाभ के लिए आ गया। आपको खोजने का प्रयास किया लेकिन आप पहले दिन तो मिले नहीं। दूसरे दिन आपका पता लगा तो सेठजी नीले रंग का थान लेकर आपकी सेवा में पहुँचे। पण्डितजी कुछ देर तक तो मौन धारण किये बैठे रहे, परन्तु सेठजी के विशेष आग्रह करने पर आपने थान ले लिया और पैर पर लपेटने लगे। मलमल बहुत बढ़िया थी, जिसका दुरुपयोग देख कर सेठजी से न रहा गया और कह उठे कि महाराज यह सिर पर बाँधने के लिए है। पैर पर लपेटने के लिए नहीं। पण्डित जी ने सुनते ही कहा मैं तो तेरी मौत बाँध रहा था इतना सुनते

ही सेठजी के होश उड़ गये और उसके कुछ ही समय बाद वे काल के गाल में समा गये ।

एक बार डा. गुलझारी लालजी ऊँट पर बैठ कर किसी रोगी को देखने जा रहे थे । सँकरे रास्ते के बीच में पंडित जी बैठे थे । डॉ॰ गुलझारीलाल ने ऊँट से उतर कर परमहंसजी का पैर पकड़ा और खेंच कर एक तरफ कर दिया और कुछ बुरा भला भी कहा । परमहंसजी ने उस समय तो कुछ कहा नहीं परन्तु साधु को तिरस्कार की भावना से देखने वाले डाक्टर साहब को सबक सिखाने की दृष्टि से पेट में फोड़ा कर दिया । डाक्टर फोड़े से परेशान होकर अपनी भुआ को साथ लेकर जयपुर इलाज के लिए चले गये । ४ मास इसी पीड़ा में निकल गये । जयपुर के डाक्टर भी इस पीड़ा को दूर करने में असमर्थ रहे । डाक्टर गुलझारीलालजी कृषकाय हो गये । जीने की भी आशा छोड़ दी । एक रोज जब डाक्टर अपने जीवन से पूर्ण निराश हो गये तो रात्रि में पंडितजी स्वप्न में दिखाई दिये, बोले "गुलझारीलाल क्या हाल चाल है" । गुलझारीलालजी को स्वप्न देखते ही याद आया, कि यह परमहंसजी के अपमान का दंड है । वे प्रायश्चित्त स्वरूप खाट पर से उठकर जमीन में धोक लगाने लगे । उनकी सेवा में बैठी भुआजी ने सोचा कि कहीं सन्निपात हो गया हो । उसी में उठकर भाग रहा है अन्यथा तो उठने की शक्ति बची ही नहीं थी भुआजी के बोलते ही आँखें खुल गईं । डॉ॰ शर्मा ने यह कथा अपनी भुआजी से कही तथा बारबार पेट के फोड़े के पास हाथ लगाकर देखने लगे परन्तु न फोड़ा था और न तो दर्द ही था । डाक्टरों ने भी यह देख बड़ा आश्चर्य किया । शीघ्र ही डाक्टर शर्मा पथ्य लेने लगे तथा ठीक हो गये । जयपुर से आते ही परमहंसजी के पास आये और उनके पैरों पड़ गये । पंडित जी ने हांडी में से निकाल कर बाजरे की रोटी के कुछ टुकड़े उनको दिये और बोले— "जा गुलझारी मज़ा कर " । उस दिन के बाद डा. शर्मा उनकी सेवा में रहने लगे और इतना यश कमाया कि जिस रोगी को भी हाथ लगाया वह तुरन्त ठीक हो गया । वे रोटी के टुकड़े आज भी डाक्टर गुलझारीलालजी की पारिवारिक तिजूरी में पड़े हैं ।

एक पद्य उन्हीं की लेखनी से लिखित प्राप्त हो सका उसका मूल चित्र प्रस्तुत है:—



पु०सं० 1658
भारती पुस्तकालय

पं. गणेशनारायणजी की उक्ति—

पल मे पवन घणेरी चलती, पल मैं पत्ते हले न चल
पल मैं पंछी उडतो देख्यो, पल में आय कटा दे गल ।
पल मैं कूप तलाब सुका दे पल मैं कर दे जल ही जल ।
पलभर मैं वो भीख मँगा दे जिसके लारे लश्कर दल ।
पलभर मैं वो राजाकर दे जिसके पल्ले पड़े न खल ।
पल भर में जो ज्वान बणा दे, पल में कर दे वृद्धाबल ।
कहतै हैं करता सैं डरिये, करता ल्यावै घड़ी न पल ॥

पूज्य पं. गणेशजी महाराज का सम्पूर्ण जीवन अपने भक्तों के बीच एक पारिवारिक सदस्य की भाँति ही व्यतीत होता था। भक्तों की भलाई के लिये प्रायः विनोदपूर्ण प्रसंग वे स्वतः उपस्थित किया करते थे। स्व. पं. रामचन्द्रजी शर्मा प्रफुल्ल की माता जी ने एक अद्भुत प्रसंग इस प्रकार सुनाया कि एकबार जब श्रीप्रफुल्लजी के पिता जी व्यवसाय हेतु बम्बई गये थे उसी दिन संयोग से पूज्य परमहंस जी उनके आवास पर आये और प्रफुल्लजी की माताजी को उन्होंने कहा कि बेटी कुछ खाने को दो। स्मरण रहे राजस्थान की कतिपय मान्यताओं के अनुसार परिवार का कोई सदस्य जिस दिन यात्रा पर जाता है उस दिन किसी भी याचक को कुछ देने की परम्परा नहीं है। अतः श्री प्रफुल्ल जी की माता जी यदि उन्हें कुछ देती तो अपशकुन का भय था और यदि नहीं देती तो परमहंस जी की अप्रसन्नता का भय था। इसी धर्म संकट में वह कमरे में चली गयीं। परमहंस जी ने दो तीन बार आवाज लगाई और बाद में उन्होंने कहा कि बेटी ! यदि तू खाने को नहीं देती है तो ले मैं तुझे रोटी दे रहा हूँ। जब प्रफुल्ल जी की माता ने ऐसा सुना तो वे कमरे से बाहर आयीं और देखा कि परमहंस जी के संकेत पर एक कौवा साबुत बाजरे की रोटी चोंच में दबाये हुए आकर दीवार पर बैठ गया और उसने वह रोटी परमहंस जी के तरफ डाल दी। परमहंस जी ने रोटी उठाकर श्री प्रफुल्लजी की माता को दिया और कहा तुमने तो हमे खाने को कुछ नहीं दिया परन्तु मैं तुझे रोटी देता हूँ। श्री प्रफुल्लजी की माता ने बताया कि उस दिन से हमारे घर में दाल रोटी की कमी बाबा की कृपा से नहीं हुई। इसी प्रकार अनेक घटनाएँ लोगों की मुहबोली में सुनने को मिलती हैं, जिनकी अभिव्यक्ति को विषय विस्तार के भय से संकुचित करना पड़ रहा है। स्मरण रहे अभी पूज्य परमहंसजी की स्मृति में संस्थापित पं. गणेशजी मेमोरियल ट्रस्ट ने आपका जीवन चरित्र तथा उस पर आधारित कैसेट तैयार कराये हैं, जो बंबई कार्यालय में उपलब्ध हैं। शुभमस्तु

कार्यालय का पता— **परमहंस श्री गणेशजी पण्डित मेमोरियल ट्रस्ट**
४३, दूसरा भोइवाड़ा, भुलेश्वर, बंबई—४०० ००२

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामया ।
सर्वे भद्राणि पश्यन्ति मा कश्चिद् दुःख भागभवेद् ॥

महर्षि
सं. 1658
भारती पुस्तकालय